HORARATNA

Varanasi
Siddhavinayaka Press
1834 Samvat
1777

॥ श्रीकाशीविश्वनाथपुरीमेंढुंढिराजगणेशकेपासदाऊअग्निहोत्रीकेयहाँसिद्धविनायकयंत्रमेंजोतिषकाग्रं
थहोरारत्नबहुतविवेचनापूर्वकशुद्धकरिकैछपागया॥ लि० सीतारामभिश्रछापनेवालाभूसीजिसैलेनाहोयउ
सेढुंढिराजगणेशकेपासदाऊअग्निहोत्रीकेदुकानपरमिलैगा॥ श्रीसम्वत १९३४ अधिकज्येष्ठशुक्ल १४मां

॥श्रीगणेशाय नमः॥ हेरम्ब पाथोनिधेः पारं दुःपारं ततुमिच्छतः महागणपतेः शुंडा वलंवाय प्रजायतां १ अस्ति श्रीमत्का न्यकुब्जाभिधानं सद्विप्राणां संभवोऽभू
न्निदानं तत्रैवाभूत् श्रीभरद्वाजवंशे श्रीमल्लालः कीर्तिविद्याविशालः २ तदात्मजोभूत्क्षितिदेवदिव्यो विद्यारसाकीर्तिसुखैकवासः सत्यद्रुतोश्रीपतिनिर्मितां
सांव्यक्तां च टीकामकरोद्विचित्रां ३ तस्मात्त्रयुर्ज्योतिषशास्त्रविज्ञः श्रीरवमकर्णाः समभूद्विधिज्ञः नारायणोभूत्तनतः कनिष्ठः सूर्याधिको तस्य सुतस्तरांप्रविष्टः ४
ततोभवन्मिश्रचतुर्भुजाख्यः सतर्कवेदांतविदग्रगण्यः समस्तभूमीपतिलब्धमानः श्रीरामभक्तौ विहितैकतानः ५ ततोभवद्रूपसमास्त्वजेयः कृतीवदा
मोदरनामधेयः श्रीभास्करोक्तौ विवकरोन्मनोज्ञां टीकामपूर्वां बुधहृद्योग्यां ६ दामोदरस्य पुत्रौ जातौ वलभद्रहरिरामौ वलभद्रेण कृतं प्राक् सवासनं टि
प्पनं च मकरंदे ७ ततः टिप्पनं भास्करीये च वीजे कृतं ताजिके वर्षरत्नं त्वपूर्वं निवंधं गुरोः पादपद्मप्रसादात्ततो जातके सन्निवंधं करोमि ८ यद्यपि कृतानि
वंधाः सुविस्तरा जातके पूर्वैः विदग्धैर्न तो विशेषो मयोदितो बुद्धिपूर्वकं वोक्ष्यः ९ नत्वा दामोदरं तातं गुरुं श्रीरामसंज्ञकं होरारत्नं वितनुते वलभद्रः सतां मुदे १० ननु
संवंधादिचतुष्टयकथनं विना कर्थं प्रवृत्तिः उक्तं च सिद्धिः श्रोतृप्रवक्तॄणां संवंधकथनाद्यतः तस्मात्सर्वेषु शास्त्रेषु संवंधः पूर्वमुच्यते किमेवात्राभिधेयः स्यादिति
एवं सुकेन चित् यावत्प्रयोजनं नोक्तं तावत्तत्केन संगृह्यते इत्युच्यते पितामहनारदवसिष्ठकश्यपादिमुनिनिर्मितं ज्योतिःशास्त्रैकस्कंधरूपं जन्म नानाविधफलादे
शफलकं वेदचक्षुरूपं द्विजानामध्ययनीयं शास्त्रं होराशब्दवाच्यं उक्तं च नारदेन सिद्धांतसंहिताहोराद्रूपस्कंधत्रयात्मकं वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमक
ल्मषं विनैतदखिलं श्रौतं स्मार्तं कर्म न सिध्यति तस्माज्जगद्धितायेदं ब्रह्मणा रचितं पुरा अतएव द्विजैरेतदध्येतव्यं प्रयत्नतः इति शूद्रपाठे दोषमाह गर्गः स्नेहा
ल्लोभाच्च मोहाद्वा यो विप्रोऽज्ञानतोपि वा शूद्राणामुपदेशं च दद्यात् स नरकं व्रजेत् ज्योतिःशास्त्रं तु शूद्रेभ्याय कथयस्य सर्वदा नयात्तं वचनं तस्य श्रुतौ क्लिष्टं ग्रहविर्यथे एम
ति अत्र राशिप्रभेदग्रहयोनिभेदवियोनिजन्मनिषेकजन्मादिकाः पदार्थाः प्रतिपाद्यत्वेन विषयभूताः एषां पदार्थानां जातकग्रंथस्य प्रतिपाद्यप्रतिपादकभावः १
संवंधः उक्तं च कश्यपेन राशिप्रभेदं खेटयोनी वियोनिजन्म च निषेकजननं पंचमासविशेषमंगलप्रदं आयुर्दायोदशाभेदास्तेयाचांतर्दशा ... अरिष्टक

मंजीवो राजयोगाश्च नाभसाः चान्द्रयोगादिग्रहद्वयाद्यन्ययोगसंभवाः राशिशीले दृष्टिफले ग्रहभावफलं ततः आश्रयाख्याश्रये योगा योगाः संकीर्णसंज्ञकाः ८
स्त्रीजातकं नष्टयोगं निर्याणं नष्टजातकं द्रेष्काणादिफलं सर्वं होरास्कंधस्य संभवं इति अत्रादिपदाद्वर्षमासदिननक्षत्रादिफलानि ज्ञेयानि अत्र शास्त्रे अधिका
रिणश्च ज्ञाना एव उक्तं च वशिष्ठेन अध्येतव्यं ब्राह्मणैरेव तस्माज्ज्योतिःशास्त्रं पुण्यमेतद्रहस्यं एतद्बुध्वा सम्यगाप्नोति यस्मादर्थं धर्मं मोक्षमग्र्यं यशश्चेति ब्राह्मणेष्वपि प
रीक्षिताय देयमित्युक्तं मरुणो प्रति सूर्येण अजितेन्द्रियाय विदुषे चिरकालनिवासिने आत्मज्ञानविस्मृताय प्रकाश्यं शास्त्रमुत्तमं अनधिकारिणामाह तदेव ज्योतिषं
शास्त्रं मया ज्ञानधियानव प्रकाश्यं तेन प्रकाश्यं होराज्ञानयथा तथा असूयकायानृजवे ज्योतिर्विद्द्वेषिणे ततः अचिरावासिने दुष्टचेतसे दुर्जनाय च इति होराश
ब्दस्योत्पत्तिमाह कल्याणवर्म्मा आद्यन्तवर्णलोपाद्धोरास्माकं भवत्यहोरात्रात् तत्प्रतिबद्धः सर्वग्रहमण्डलाश्विन्याय स्मात् होरेति शास्त्रसंज्ञालमस्य तथा
द्वयशेश्वेति अयमर्थः होराशब्देन प्रागपरवर्णलोपादहोरात्रमेवोच्यते तत्प्रधानकः स्कंधः होरास्कंधः अत्राहोरात्रप्राधान्यं कथमिति चेदिच्छं इह मेषादि
द्वादशलग्नवशेन फलानि वक्तव्यानि तानि च लग्नानि कालवश्यानि स च कालः अहोरात्र इतियुक्तमहोरात्रस्य मुख्यत्वं होराशास्त्रप्रशंसोक्ता जातकरत्नमा
लायां पाटीकुट्टकबीजमन्दिरयदारूढो पियो प्रौढधीः सिद्धांतोक्तसहस्रयुक्तिबहुलो वेत्यसंनन्तफले होरा न तंत्र मनन्तयुक्तिं विदितं दैवज्ञहृष्टेतथा पद्मासनस्तद्वा
सिप्रगल्भगणको हास्यपरंगच्छति होराशास्त्रप्रयोजनमुक्तं सारावल्यां अर्थार्जने सहायं पुरुषाणामापदर्णवे पोतः यात्रासमये मंत्री जातकमपहाय ना
स्त्यपरः नास्त्येपि अजातजन्मनां नृणां फलानि दर्पणावर्णवत् प्रयोजनोत्तरमाह वराहः यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पंक्तिं व्यंजयति शास्त्रमे
तत्तमसि द्रव्याणि दीप इव अत्र व्यंजयतीत्यनेन तात्कालिकजन्मलग्नशुभाशुभं स्थितिवशेन जन्मांतरार्जितशुभाशुभकर्मफलपाकनिरूप्यतां ग्रहाणां फ
लसूचकतैव न तु जनकीर्तिस्पर्शं प्रतीयते अतएव प्राणिनां शुभाशुभफलस्य तत्तत्पुरुषार्जितनानाविधादृष्टजन्यत्वात् ग्रहाणां न शुभाशुभफलजनकत्वं मि
ति निरस्तं तत्फलस्य नतत्पुरुषार्जितादृष्टजन्मत्वेपि ग्रहाणां फलसूचकत्वे बाधकाभावात् एवं सम्यक् होराज्ञाने सूतिजस्य जन्मकुंडलीतो ऽरिष्टं यस्मिन्काले

लभ्यते तदा तस्य जयपुरःसरत्वादिना निराकरणं कर्तव्यं तेन शुभं प्रवरात् शुभफलमुपलभ्यते तदर्थं यात्राराज्याभिषेकादिकं विधेयमिति तात्पर्यं ननु प्राचीन
सदसत्कर्मविपाकरूपस्यावश्यभावित्वादेतत् ज्ञानफलव्यर्थं तथा च शौनकः येन तु यत्प्राप्तव्यं तस्य विधानं सुरेशस्यापि च सोऽपि यः साक्षाद्वियतिज्ञः सोऽपि न शक्तोऽन्य
थाकर्तुं अन्यत्राप्युक्तं यद्भावि तद्भावि भाविविचेतनं तदन्यथा श्लोकार्द्धेन प्रवक्ष्यामि यदुक्तं ग्रंथकोटिभिः सा सा संपद्यते बुद्धिः सा मतिः सा च भावना सहायास्तादृशा
एव यादृशी भवितव्यतेति तथा च दैवस्य बलत्वेन पुरुषकारो निरर्थक इति अत्राहुः केवले दैववशत एव कर्मसिद्ध्यंगीकारे श्रुतिस्मृत्यावेदिता ज्योतिष्टोमेन
स्वर्गकामो यजेत श्रीकामः पुष्टिकामो वा अग्निहोत्रं समाचरेत् इत्यादिविधानं तथा न कलंजं भक्षयेन्न वृक्षमारोहयेदित्यादिनिषेधाश्च निरर्थकाः स्युः किंच यदि
दैवमेव फलेत तदा कृष्याद्युपायेषु प्रवृत्तिर्न स्यात् इति केशवार्कः फलेद्यदि प्राक्तनमेव तत्किं कृष्याद्युपायेषु परः प्रयत्नः श्रुतिः स्मृतिश्चापि कृतानि षेधविध्यात्म
के कर्मणि किं निषिद्धे तिष्ठ अपि वाजयानां नराणां जितं दैवमपि पुरुषकारं विना न घटते इति पुरुषार्थकस्य मुख्यत्वं तथा च वसिष्ठराजः पूर्वजन्मजनितं पुराकृतं क
र्म दैवमिति संप्रचक्षते उद्यमेन तदुपार्जितं वांछितं फलतीति नैव केवलमिति याज्ञवल्क्योऽपि दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता तत्र दैवमभिव्यक्तं पौरुषं पौ
र्वदेहिकमिति तस्मात्प्रयत्नाभावे दैवमेव नास्तीत्यतः सिद्धं प्रयत्नं तस्य मुख्यत्वं अथ च अवश्यंभाविभावानां प्रतीकारो भवेद्यदि तदा दुःखैर्न बाध्येरन् नलरा
मयुधिष्ठिराः तथा नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभमित्याद्युक्तेर्दैवमुख्यत्वं ज्ञातेऽपि च यत्नेनाकार्यसिद्धेरनुपलंभा
त्तस्य मुख्यत्वं तथा च ज्योतिषस्मृत्यावेदितजातकादिफलनिरूपणस्य वैयर्थ्याभास तदिति चेन्नैवं कर्मणां हि वैचित्र्यं कानिचित् दृढमूलानि कानिचिच्छिथि
लमूलानि तत्र च दृढमूलानि स्थिराख्यानि अदृढमूलान्युत्पातसंज्ञकानि यदाह हस्ते यवनः यद्यद्विधानं नियतं प्रजानां ग्रहसंयोगप्रभवं प्रसूतौ भोग्यानि नित्याभिरा ग्र
दर्यंति कालानियोगेति दृशान्तनम् तदर्थभित्तेहि विघ्ननिरुक्तं स्थिराख्यमौत्पातिकसंज्ञकं च कालक्रमाज्ज्ञातकनिश्चितस्य कर्मापि सर्पिस्थिरसंज्ञकं च मुच्यते २
तत् सप्रयत्नानां प्रथितानि तानि निःस्वानि कर्मप्रभवानि सिद्धिः तेभ्यः फलं वा ग्रहाः क्रमस्यादद्युर्यदौत्पातिकसंज्ञितं तदिति एवं यत्र जन्म यत्र शकुनप्रश्नादिभिर्दृ

शाफलपाकक्रमेण संतानविघाताभावे निर्णीते लग्नग्रहांशादिरूपेण पूर्णप्रयत्नेनापि संतानादिप्रतिबंधकीभूतं दुरितं दृढमूलत्वान्निवारयितुं शक्यते यत्र
ग्रहचारवशेन संतानयोगादिसंभवे आयुर्दीयसंभवे राज्यादिसंभवे निर्णीते प्रतिबंधकीभूतं दुरितं दृढमूलत्वान्निवारकं ग्रहसूचितफलसंभवस्तत्र स्थि-
लमूलत्वेन स्वस्त्ययनादिनोपाद्यं तदुक्तं हन्यते दुर्बलं दैवं पौरुषेण विपश्चितेति अन्यच्च यद्यपि पूर्वोपार्जितसंदृष्टकर्मपरिपाकः शुभाशुभफलोपलब्धि
दर्शनादेव ज्ञायते परमभीष्टकालो ज्ञातुं न शक्यते तथाच भाग्यमग्रे खंडितमखंडितमित्यादिनाज्ञानार्थसमर्थस्तत्र तस्यैकशरणात् तथाहि दिनराशिविभा-
गेन सूक्ष्मकालावयवसाधनोपायैर्यंत्रराजतुर्यध्रुवभ्रमादिविचित्रयंत्रोपलक्षितस्पष्टजन्मसमयेपि तल्लग्नादिद्वादशभावचक्रे स्वोच्चमूलत्रिकोणस्वगृ-
हमित्रगृहवर्त्तिनां तथा शत्रुनीचगृहाश्रितानां ग्रहाणां सदसद्दशाक्रमेण भीष्टसमयेपि सरससत्कर्मपरिपाको गम्यते एवं शुभफलसूचकदशापाककाले।
क्रियमाणायात्राविनायासेन फलसाधिका अशुभफलसूचकदशापाककाले क्रियमाणाया त्राह्यानिरेत्यतो वश्यं जानकगणनोपयोगः किंच यत्र दशारि-
ष्टादिपाककाले पुरुषायुर्विनाशसंभावना तत्रापि शान्त्यादिवा तत्प्रतीकारार्थमस्योपयोग इति यत्तु येन तु यत्प्राप्तव्यमित्यादिर्शीन कवचनं तस्यायमर्थः
येन यत्प्राप्तव्यं अवश्यंभोक्तव्यं न बृहस्पतिः कर्तुमशक्तः अर्थाद्दैवान्यदृढकर्मोपार्जितं निराकर्तुं शक्त इत्यर्थः तस्माद्दैवपुरुषकारयोः साविव्यमभ्युगन्त-
व्यमितियुक्तं अत एवाह याज्ञवल्क्यः यथा ह्येकेन चक्रेण रथस्य न गतिर्भवेत् तद्वत्पुरुषकारेण विना दैवं न सिध्यति इति संक्षेपः अथ होराप्रशंसकाल्या-
णवर्मा विधात्रा लिखिता यस्य ललाटेक्षरमालिका दैवज्ञस्तां पठेत्प्राज्ञः होरानिर्मलचक्षुषा गुणाकारोपि वर्णावलीयालिखिता विधात्रा ललाटपट्टे भुवि
प्राणवानां होरादृशा निर्मलया यथावत्तां दैवविद्वाचयतीह नान्यः तत्र प्रथमराशिप्रभेदाध्यायो निरूप्यते तत्र प्रथमतो राशिनामान्याह कल्याणवर्मा मेषवृषमि-
थुनकर्कटसिंहकन्यातुलावृश्चिकः धनुर्विहमकरकुंभो मीन इति राशिनामानि अथ कालपुरुषस्य मेषादिराशिक्रमेण शिरःप्रभृत्यंगविभागमाह वराहः
शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसंज्ञकानि ऊरुजानुकजंघे चरणाविति राशयोजाद्याः कादरायणोपि मेषः शिरोथवदनं वृषभो विधातुः वक्षोभ

वं तुमिथुनं हृदयं कुलीरः सिंहस्तथोदरमथो युवती कटिश्च वस्तिस्तुलाभृदथ मेहनमष्टमं स्यात् धन्वी स्यादूरुयुगं मकरो जानुद्वयं धातुः जंघाद्वयं कुंभः
पादौ मत्स्यद्वयं चेति वस्तिर्नाभिगुह्ययोरंतरं चेति वस्तिर्नाभिरधो द्वयोरित्यमरोक्तेः मेहनं लिंगं अत्र कालपुरुषस्य वक्षस्थले मिथुनराशिरुक्तस्तच्चिंत्यं ननु व
क्षोहृदययोः कोवा लक्षणाभेदः कथं वा युंसो विभुज्यत्वमित्यप्रयोजकत्वात् अत एव वक्ष्यमाणयवनमुनिवाक्ये वीणागदाभृन्मिथुनेऽत्र तृतीयं संप्रजायते स्कं
धभुजांसदेशादृतिस्य भुजस्थलमेवोक्तं श्रीभगवता सूर्येणापि स्वजातके उक्तं शिरोवक्त्रभुजाः क्रोडः कटिरिति क्रमात् वस्तिर्व्यंजनके ऊरू जानुजंघे च य
ग्मुगमिति शीर्षास्य बाहु हृदयमिति वदन कल्याणवर्मानुकूलः शीर्षास्य दोर्हृदः क्रोडः क्रोड इति वदन न स्वदोषप्यनुकूलः अंगविभागप्रयोजनमाह कल्या
णवर्मा कालनरस्य पुरुषाणां चिंतयेत्प्रसवकाले सदसद्ग्रहसंयोगात्पुष्टान्सोपद्रवांश्चापि अयमर्थः यो राशिर्जन्मकाले शुभग्रहाक्रांतः स राशिः कालपुरु
षस्य यदंगे भवति तदंगे पुष्टिर्भवति यो राशिः पापग्रहाक्रांतस्तदाश्रयांगे उपघातः इति भचक्रे मेषादिराशिव्यवस्थामाह यवनः अश्विनीभरणी मेषः कृत्तिका
पादमेव च तत्पादत्रयं केशः वृषः सौम्यदलं तथा सौम्यार्द्रमार्द्री मिथुनमादित्यचरणत्रयं तत्पादः पुष्यमाश्लेषा राशिः कर्कटकः स्मृतः पित्र्यं भाग्यमथा
र्यमाद्यः भागः सिंहः प्रकीर्तितः तत्पादत्रयं कन्या हस्तश्चित्रार्द्धमेव च तुलाश्चित्रादलं स्वाति विशाखा चरणत्रयं तत्पादं मित्रदैवत्यं ज्येष्ठा वृश्चिक उच्य
ते मूलमाप्यं तथा धन्वी आद्यो विश्वस्य च तत्पादत्रयं विष्णुर्मकरो वासवदलं तद्दलं वारुणं कुंभस्तथा पूर्वचरणत्रयं तत्पादमेकं मीनः स्यादाहिर्बुध्न्यं च
रेवती अथ व्यवहारार्थं मेषादिराशिसंज्ञा आह कल्याणवर्मा मेषादीनां क्रियताबुरिजितुमकुलीरलेयपाथोनाः संज्ञाजूककौर्पिकतौक्षिकाकोकेरहृद्य राम
रोगान्त्याः राशिस्वरूपमाह सत्याचार्यः छागो वृषभो वीणागदाधरः मिथुनमंभसि कुलीरः सिंहः शैले कन्या नौस्था सवह्निसस्यकरा पुरुषस्तुलाधरो वृश्चि ३
कोऽथ धन्वी हयांत्यामकरास्य मृगपूर्वकुंभी पुरुषो झषौ मीनः यवनेश्वरोपि आद्यः स्मृतो मेषसमानमूर्तिः कालस्य मूर्धा गदितः पुराणैः सोऽजाविकासंचरकंद
रादि स्तेनाग्निधात्वाकररत्नभूमिः इत्यादि तत्तु कथितो द्वितीयः स वक्त्रकंठायतनं विधातुः वनाद्रिसानुद्विपगोकुलानां कर्षीवलानामधिवासभूमिः २॥

वीणागदाभृन्मिथुनं तृतीयः प्रजापतेः स्कंधभुजांसाः प्रनर्तका गायनाशिल्पकस्त्रीक्रीडारतिद्यूतविहारभूमिः ३ कर्कःकुलीरोऽम्बु तस्य वासःप्रदेश
विल्लिजश्च धातुः केदारवीर्यापुलिनानि तस्य देवांगनारम्यविहारभूमिः ४ सिंहस्तु शैले हृदयप्रदेशः प्रजापतेः पंचममाहुरार्याः तस्याटवीदुर्गगुहावना
द्रिव्याघ्रावनीदुर्गवनप्रदेशः ५ प्रदीपकाशुल्वकरोमकन्यानौस्थाजलेषु भूमिति ब्रुवंति कालार्थवीरां जठरं च विधातुः सशाद्वलस्त्रीरतिशिल्पभूमिः ६ वी
थ्यां तुला पण्यधरो मनुष्यः स्थितः सनाभी कटिवस्तिदेशे सुक्तार्थवीथ्यांपणपत्तनाध्वसार्थो विधातोस्तनस्य भूमिः ७ श्वभ्रेऽष्टमो वृश्चिकविग्रहस्तु प्रोक्तः
प्रभामिद्दंग्गुदप्रदेशो गुहाबिलश्वभ्रविषाश्मगुप्तिवल्मीककीटजगराशिभूमिः ८ धन्वीमनुष्यो हय पश्चिमार्द्धस्तमाहुरूरु भुवनप्रणेतुः समस्थितव्यक्तस
मस्तवाजिशूरास्त्रभृद्युज्यरथाश्वभूमिः ९ मृगार्धपूर्वं मकरोऽर्धगात्रो जानुप्रदेशं तमुशंति धातुः नदीवनीराण्यसराजरूपः श्वभ्रादिवासो दशमः प्रदिष्टः १०
स्कंधे तरिक्तः पुरुषस्य सिंहो जंघेऽर्थमेकादशमाहुरार्याः तस्योदकाधारकुशांस्य पक्षिस्त्रीशौंडिकद्यूतनिवासभूमिः ११ जानेतुमीनद्वयमंत्यराशिः कालस्य
पादौ विहितौ वरिष्ठौ सपुण्यदेवद्विजतीर्थभूमिनदीसमुद्रांबुचयांबुवासः १२ एतत्स्वरूपप्रयोजनं तु हृतनष्टादिषु स्थानपरिज्ञानं तथा च षट्पंचाशिका
यां राशिभ्यः कालदिग्देशाः इति अथ राशीनां ग्राम्यादिसंज्ञा जातकरत्नावल्यां ग्राम्यादिमिथुनतुलास्त्रीचापालिघटानिशास्तु वृषमेषौ मकरादिसार्धं सिंहो
वन्यो दिने जवृषभौ च जलजौ कर्कटमीनौ मकरांत्यमर्धं शिवमतेकुंभः राशिस्वरूपमेतन्मार्कंडेयादिमुनिभिरुक्तं एवं प्रयोजनमुक्तं वराहेन ग्राम्यारण्यजले
ष्वराशिषु जाता भवंति तच्छीला इति अथ राशीनां द्विपदादिसंज्ञामाह वराहः मेषवृषधन्विसिंहाश्चतुष्पदा मकरः पूर्वभागश्च कीटः कर्कटराशिः सरीसृपो वृ
श्चिकः कथितः मकरस्य पश्चिमार्धं कुंभो मीनश्च जलचराः ख्याता मिथुनतुलाधरकन्या द्विपदाख्या धनुषि पूर्वभागश्चेति अत्र वराहेण कर्कराशेर्जलचरत्वं वि
हाय कीटत्वमुक्तं कुंभस्य द्विपदत्वं द्विपदं विहाय जलराशित्वमुक्तं तच्चिंत्यं यतः पूर्वं हृदयवनो त्रैराशिस्वरूपे कर्कः कुलीरोऽम्बुसंस्थः इति कर्कस्य जलचर
त्वं स्कंधे तु रिक्तः पुरुषस्य कुंभः इति कुंभस्य द्विपदत्वमेवोक्तं वक्ष्यमाणगर्गवचने पि भधुकतुलाघटः कन्या इत्यनेन कुंभस्य द्विपदत्वं कर्कस्य जलचरत्वं स्पष्ट

हो॰र॰ मेषो गौ श्रीमत्सूर्येणापि राशिस्वरूपे स्कंधासक्तो रिक्तघटः पुमान्स्यात्कुंभसंज्ञकः कर्कस्य जलसंवासीति स्पष्टतरमुक्तं पराशरजातकेपि न्यग्मयूकपाथोन
४ चापपूर्वार्धकुंभानित्यादिकेन कुंभस्य द्विपदत्वं कर्कस्य जलचरत्वमुक्तं एवं दिनादिबलेवक्ष्यमाणादेवकीर्तिवचनेपिस्पष्टमुक्तं तदुपजीव्यमत्याचार्येणापि कुं
भस्थि कुंभीपुरुष इति स्पष्टमुक्तं राशीनां दिग्बलमाह गर्गः नृपकृत्तुलाघटः कन्यापूर्वमर्धं च धन्विनः लग्नस्था बलिनो नित्यमेतेहि नरराशयः चतुर्थके
कीटो मीनो मकरार्धं च पश्चिमं विद्धि यावलिनो नित्यमेतेहि जलराशयः समवृश्चिकः कीटो बलवान्परिकीर्तितः धनुषोर्धाजगोसिंहा बलिनः खेचतुष्पदाः प्रा
गर्वेनक्रराशेश्च केचिद्दिग्बलमेव हि राशीनां दिनरात्रिसंध्याबलमाह देवकीर्तिः मिथुनतुलकन्यादिवाबलाधन्विनः पूर्वार्द्धं अजवृषसिंहारात्रौ मृगहयो
पूर्वपश्चार्द्धे वृश्चिके मीनकुलीराः मकरान्यार्धं च संध्यायामिति राशीनां शीर्षोदयादियुग्मसौम्यपुंस्त्रीचरादिसंज्ञादिदिगीशत्वं चाह रामकर्करे कन्यालिजूकद
रिमीनघटादिनाख्यामूर्धोदयास्समिथुनांस्त्वपरे निशाख्याः पृष्ठोदयाश्च सफरोत्युभयोदयः स्यान्मीनालिकर्कटविराम इहर्क्षसंधिः दिनाख्यादिनबलादित्य
र्थः एतत्स्पष्टमुक्तं पराशरजातके दिवा शीर्षोदयाश्चैवं संध्यायामुभयोदयाः भक्तं पृष्ठोदयाश्चैव बलाधिक्या उदीरिता इति मीनादिराशीनामंतिमनवांशेऽक्ष
क्षसंधिसंज्ञः ऋक्षसंधिफलमुक्तं सारावल्यां जातोनजीवति जनोमातुरपथ्यो भवेत्स्वकुलहंतायदि जीवतिगंडांते बहुगजतुरगोभवेद्भूपः चरपोषितावुभस्वद्रुक
मेणाचरस्थिरद्विप्रकृतिस्वरूपाः अजाद्यस्त्रिः परिवर्तनेन दिगीश्वराश्च दिगादिनः स्युः अत्र पुरुषस्त्रीप्रभृतिषु राशिषु लग्नवर्तिषु जातानां तत्स्वभावो भवती
ति प्रयोजनं ज्ञेयं यदाह सत्यः ओजा पुरुषा ज्ञेया मेषाद्याः स्त्रीसंज्ञकायुग्माः उग्रेषु क्रूरा पुरुषाः सौम्याः स्त्रीष्वपि लग्नेषु चरसंज्ञा स्थिरसंज्ञा मेषात् द्विः प्रकृतिरा
शयः क्रमशः राशिस्वभावतुल्याः ज्ञेया प्रकृतिप्रसूतानां अजाद्य इति मेषादयः त्रिः त्रिवारमावृत्य पूर्वादिदिशांस्वामिन इत्यर्थः तथा च मेषसिंहधन्वि राम
नः पूर्वस्यां वृषकन्यामकरादिदक्षिणस्यां मिथुनतुलाकुंभा पश्चिमायां कर्कवृश्चिकमीना उत्तरस्यामिति एतत्प्रयोजनं तु सूतिकागृहद्वारज्ञानं तथाह तन्ना ४
ष्टादिषु चौरादेर्यायिदिग्ज्ञानं तथा यात्रायां दिक्शूलस्थानस्य मुख्येन सिद्धं व्यर्थश्रमो भवति दिक्संज्ञितो मलस्नेरत्यादिकं बोध्यं अथ षड्वर्गनिरूपणं तत्र व

गेहः प्रहहोराद्रेष्काणो नवभागो द्वादशांशकस्त्रिंशः वर्गः प्रेन[illegible]स्ययोयंस्य निर्दिष्टः गर्गोपि क्षेत्रहोराथद्रेष्काणो नवांशो द्वादशांशकः त्रिंशांशकश्च व।
र्गोयं सर्वस्य समुदाहृतः अपापि यं दार्थेषु स्थितः स्वेषु स्ववर्गगः परवर्गगतो येवं ग्रहो भवति नान्यथेति श्रीमत्सूर्ययेन सप्तवर्ग उक्तं लग्नं होरा त्रिभागं स्वस्वनवांशान
वमांशकः द्वादशांशस्तत्त्रिंशश्च वः सप्तकं वर्गिकानव ग्रहस्वामिनो नवांशस्वामिनश्च कल्याणवर्मा कुजभृगुबुधेंदुरविशशिसुतसितरुभिरिज्यमंदशांनिजी
वाः ग्रहपा नवभागानाम जमृगघटकर्कटाद्याश्च भुवनाधिपास्तं मत्तजातकविहितं चिंतयेन्मतिमान् पतिभिर्विना नगंतुं महाशास्त्रे एतत्तत्वपेशस्यसुति।
परं ज्ञेयं अत्र नवांशगणनासु प्रागुक्तः गर्गजातके मेषकेशरिचापानां मेषाद्यानवमांशकावृषकन्यामृगांशाश्च मकराद्यानवांशकाः तुलामिथुनकुंभानां
तुलाद्यानवभागकाः कर्कटालिझषाणां च कर्कटाद्यानवांशका इति अत्र नवांशप्रमाणं विंशतिकला[illegible]अंशाः ३।२० तेयावंतो मुक्तास्तावंतः तदा पूर्वोक्त
गणनाक्रमेणावर्तमान नवांशराशिस्वामी नवपतिस्यादिति षड्वर्गप्रयोजने गर्गवाक्येन पूर्वमेव प्रदर्शितं अथ द्वादशांशद्रेष्काणहोरात्रिंशांशकानां वराहः
स्वग्रहद्वादशभागाः द्रेष्काणाः प्रथमपंचमनवमानां होरे विषमेऽर्केंद्वोः समराशौ चंद्रतीक्ष्णांशोः कुजयमजीवज्ञसिताः पंचेंद्रियवसुमुनींद्रियांशानां विष
मेषु समर्क्षेषूत्क्रमेणात्रिंशांशकाः कल्प्याः त्रिंशांशकेराशिज्ञानं होरासाधे विषमे ग्रहे स्वविषमो राशिः समभे समो ज्ञेयः इति अत्र समराशौ ग्रहाणां मं
शानां च वैपरीत्यं ज्ञेयं तथा च श्रुतिकीर्तिः पंचाथ पंचाष्टौ सप्त च पंच वेद च ओजभुवनेषु धरणीसुतमंदसुरगुरुबुधशुक्राणां क्रमेणांशाः पंचैव सप्त चाष्टौ पंच
पंचाथ युग्मभुवनेषु भार्गवशशिसुतसुरेज्यमंदभूमिपुत्राणां यत्नकल्याणवर्मा शरपंचाष्टमुनींद्रियभागास्त्रिंशांशकास्तु विषमेषु युग्मेषूत्क्रमगत्या कुजा।
र्किजीवज्ञशुक्राणामित्यूचेवतु चिंत्यं यतो युग्मेषूत्क्रमगत्या भागाएव विपरीताः एषां ग्रहाणामित्यलाभेन श्रुतिकीर्तिव[illegible]नविरोधादिति अत्र द्वादशांशप्र
माणं सार्द्धद्वयमंशाः २।३० द्रेष्काणं दशांशाः १० होराप्रमाणं पंचदशांशाः १५ इति यवनाचार्यस्तु होराद्रेष्काणस्वामिनः अन्यथा आह आद्यातु होरा भुवनस्य
पत्युः परे कादशस्य क्षेत्रपतेर्द्वितीया स्व द्वादशेकादशराशिपानां द्रेष्काणसंज्ञाः क्रमशस्त्रयोऽत्र सत्याचार्यस्तु पूर्वमतमेवाभिप्रेतं यदाह सत्यः ओजेषु रवेर्हो

हो॰र॰ ५ रा द्रेष्काणस्वामिनः अन्यथां आह आद्यात्तु होराभुवनस्य पत्युरेकादशस्य त्रपतेर्द्वितीया प्रथमायुग्मेषु चौजराशिषाः इंदोः क्रमशोऽर्द्धयाजन्मनिचेष्टोऽस्वहोरास्के राशि
स्तद्रेष्काणास्तत्पंचमनवमभवनपतयः स्युः तेषामधिपतयश्चस्वस्वद्रेष्काणगावलिनः अत्र वहुमुनिसंमतत्वादेतदेव प्रमाणं पूर्वपक्षः एकसंमतत्वादुपेक्ष्यः
तथाच कश्यपः होरार्के ह्योजराशौ युग्मभे चंद्रसूर्ययोः लग्नपंचनवक्षेत्रनाथा द्रेष्काणपाः क्रमात् नारदोपि होरारवींद्वोरोजर्क्षे समभे चंद्रसूर्ययोः स्यु
र्द्रेष्काणा लग्नपंचनवराशीश्वराः क्रमात् सूर्यजातके सूर्योपि होराधिपो ह चंद्रश्च विषमेष्वपि राशिषु युग्मे व्यस्तविधिः स्मृतः होरो ज्ञाभट्टलं वुधैः राशे
स्त्रिभागा द्रेष्काणाः प्रागाशाधिपतिस्तनोः अधिपोऽथ द्वितीयस्य पंचमाधिपतिः स्मृतः एवमंत्यत्रिभागस्य नवमाधिपतिप्रभुः अथ जातके सप्तमां
शस्याप्युपयोगात् तमप्याह श्रीभगवान्सूर्यः ओजराशौ स्वराशाद्यायुग्मे सप्तमतो मताः सप्तमांशाधिपतयः सम्यक्तु तमनीदिताः कल्याणवर्मा
पि मेषालिमिथुनमृगहरिमीनतुलावृषभचापधराः कर्की घटभृत्कन्यापूर्वासु सप्तभागेशाः। सप्तवर्गप्रयोगानां क्रूरेषु जाताश्च शठस्वभावाः सौम्ये
षु जाताः प्रभवंति सौम्याः तथा अंशकाद्वियतेद्व्यं द्रेष्काणे तास्करास्मृताः इत्यादिकमूह्यं राशिषु वर्गोत्तमनवांशमाह सत्यः चरभुवनेष्वाद्यांशाः स्थिरेष्वम
ध्याः द्विमूर्तितथांत्याः वर्गोत्तमाः प्रदिष्टास्तेष्विह जाताः कुलेमुख्याः स्पष्टं चैतद्गतं यवनेनन स्वे स्वगृहे[illegible]कायेवर्गोत्तमास्ते मुनिभिर्निरुक्ताः प्रयोज
नं तु स्वतुमवक्ष्यगते स्त्रिसंगणां द्विरुत्तमस्वांशक भ्रत्रिभागगेषित्यादि मेषाराशिषु ह्रस्वादिसंज्ञामाह वृद्धयवनः आद्यंतराशेरुदयप्रमाणे द्वौ द्वौ मुहू
र्तौ नियतौ प्रदिष्टौ क्रमोत्क्रमाभ्यां मधिकं शरांशश्चक्रार्धयोर्विद्धुदयप्रमाणं एवंप्रमाणानि गृहाणि विद्धि ह्रस्वानि मध्यानि तथायतानि चक्रांगभेदैः
सदृशाकृतीनि चांगप्रमाणानि विकल्पयेति अथायमुदयप्रमाणोमहस्वादिः नवास्तविकः पूर्वार्द्धे विषयादृशः कृतगुणामानमितिच राहोत्क्रमान रम
मृप्येनाह शंतेयं एतत्स्पष्टमाह कल्याणवर्मा ह्रस्वा वृषमीनाजघटाः मिथुनधनुःकर्किमृगास्तुलाश्च समाः वृश्चिककन्यामृगपतिवणिजो दीर्घाः समा ५
ख्याताः इमिलिग्रादिगतैः शीघ्रप्रभृतीनि नरयाशी।।णिसदृशानि विज्ञायांतः स्थितवा गगनचरेश्वतुल्यानि एतत्स्पष्टतरमाह सत्यः दीर्घाधिप तिदी

वै गृहे स्थितोऽप्ययं वक्री दीर्घकालं वक्रिं एवं युक्त्याः वयं बाललघुमध्याकल्पनीयाश्च अथ ग्रहाणामुच्चराशयः तत्र वराहः अजवृषभमृगांगनाकुलीरझषवणिं
जौ च दिवाकरादितुंगाः दशशिखिमनुःयुक्तिथींद्रियांशैस्त्रिनवकविंशैः तिभिश्चतेस्तनीचाः सूर्यस्य मेषराशिः उच्चं मध्ये दशमेंशे परमो
च्चः चंद्रस्योच्चराशिः वृषस्तृतीयेंशे परमोच्चः एवमन्यत्रापि तथा च यवनेश्वरोऽपि सूर्यस्य भागे दशमे तृतीये सोमस्य जीवस्य तु पंचमेंशे शुक्रस्य विंशे त्वधि
सप्तकेच विद्यात्तथा पंचदशे बुधस्य सौमस्य विंशेऽष्टयुतो च नूनं विंशे तथा सूर्यसुतस्य चोच्चं स्वोच्चात्तु यात्सप्तमं शंति नीचं शशांकवीर्यस्य समानसंख्यः एवं
गणितं निमित्तपरमोच्चपरमनीचं च ज्ञेयं अन्यत्र स्वल्पं स्वोच्चे चरणारहितं स्वमूलत्रिकोणेऽश्वभेऽधिष्ण्याद्द्वादशमांशपर्यंतं मेषे परमोच्चं मर्कस्य वृषे श
त्रयपर्यंतं परमोच्चमिंदोः अन्यथा चंद्रस्य वृषे उच्चमूलत्रिकोणयोः सत्येन तृतीयेंशे रूपं चतुर्थांश त्रिंशांशे चरणारहितं पूर्वं पूर्वांशद्वयबलाभावप्रसक्तेः।
एवमेव कन्यायां बुधस्य चतुर्दशांशपर्यंतं बलाभावः एवं राजयोगादौ उच्चपदेन संपूर्णो राशिर्ज्ञेयः परमोच्चपदेन सूर्यादीनां दशशिखिद्व्यादिपदेन स
वै भागाः ज्ञेयाः अत एव वृद्धयवनराजयोगेषु स्वोच्चेषु स्वोच्चान्भागानिति वहुवचनेन सर्वेषां स्वोच्चत्वेन गृहीतत्वात् चैकांश इति तत्र स्वोच्चांशस्वोच्चरा
स्योर्भिन्नप्रयोजनमाह गर्गः स्वोच्चगो रविर्नास्ति जयतां महीपतिं उच्चस्थो धनिनं ख्यातं स्वत्रिकोणगतावपि वृद्धयवनेऽपि स्वोच्चेषु स्वोच्चान्यरिगृहभा
गानतिष्ठन्सु सर्वेषु बलाधिकेषु लग्ने शुभेषु पूर्णवपुष्मतींदौ त्रैलोक्यराज्याधिपतिः प्रसूतो अत्र स्वोच्चांशा एव प्रधानतया उक्ताः अत्रोच्चसप्तमराशौ तैरेव
भागैः परमनीचं उक्तं च सूर्यजातके उच्चभात्सप्तमं नीचं गृहं यातो भवेत्त्वगः उच्चांशा एव नीचांशास्तत्र स्युः परमाभिधाः अतिनीचप्रयोजनमाह गर्गः
अंधं दिगंबरं मूकं परपिंडोपजीवनं कुर्यातामतिनीचस्थौ पुरुषं शशिभास्कराविति तथा स्वोच्चे रूपं चरणारहितमित्यादिकमपि प्रयोजनं ज्ञेयं व्यादि
क्रमेण मूलत्रिकोणराशीन्नाह श्रीसूर्यः सिंहे वृषस्तथा मेषः कन्या कोदंडकः क्रमात् तुलाधरो घटो मतस्त्रिकोणभवनानि च उच्चस्वत्रिकोणानां बलं स्थि
रित्याद्येषां प्रयोजनं तत्र सूर्ये अधिकारद्वयं स्वगृहं मूलत्रिकोणं च तथा बुधस्य कन्यायां स्वगृहस्वोच्चमूलत्रिकोणरूपास्त्रयोऽधिकाराः संति तत्र स्वोच्चं

पंचरंशरहितमित्याद्युक्तं सप्तवर्गजबलं किंरूपं ग्राह्यं किंपादोनं रूपं अर्धमित्यतो शवशेनोच्चस्वगृहमूलत्रिकोणानां विभागमाह मिश्रकाध्याये
कल्याणवर्मा विंशतिरंशाः सिंहे त्रिकोणमपरे स्वभवनमर्कस्य उच्चं भागत्रितयं वृषइंदोः स्यात्त्रिकोणं परेंशाः द्वादशभागा मेषे त्रिकोणमपरे स्वभं तु भौम
स्य उच्चफलं कन्यायां बुधस्य तु गांशकैः सदा चिंत्ययत त्रिकोणजातं पंचभिरंशैः स्वराशिजं परतः दशभिर्भागैर्जीवस्य त्रिकोणफलं स्वभं परं चापे शु
क्रस्यांशास्तिथयः त्रिकोणमपरे स्वराशिश्च कुंभे त्रिकोणं निजभे रविजस्य रविपर्यथा सिंहे शनेः कुंभे विंशतिरंशास्त्रिकोणं दशांशाः स्वगृहमित्यर्थः एतत्त्रिको
णांकस्मृतं सिंहे नखांशप्रमितं खगः गृहं द्वादशप्रमितमित्यादिश्लोके श्रीमन्सूर्येणाप्युक्तमेवोक्तं यत्तु सूर्यारजीवभृगुभानुभवानसांशैः मूलत्रिकोणभ
वनमिति गुणाकरोक्तं नि मूलत्वात् उपेक्ष्यं बलिष्ठराशेर्लक्षणमाह वराहः अधिपयुतो दृष्टो वा बुधजीवनिरीक्ष्यतश्च यो राशिः भवति बलवान्न यदा युक्तो दृ
ष्टोपि वा शेषैः वादरायणोपि जीवज्ञनाथराशिः जैर्युत दृष्टो बलवती होराशेषैर्बलहीनास्यादेवं मिश्रैस्तु मिश्रफलाः बलहीनापदिस्य वीर्निरीक्षिताने
वयुक्ता वा श्रीमन्सूर्येण चैवं दृष्टश्च शुभस्थानगतोपि राशिर्बली भवतीत्युक्तं यो धिनाथयुतो दृष्टो बुधजीवेंदुवीक्षितः शुभस्थानगतो राशिर्वीर्यवानन्य
थानहि राशीनां प्लववसंज्ञा आह कल्याणवर्मा भुवनाधिपदिश्यमप्लवइहयवनैः प्रयत्नतः कथितः तत्र प्लवगो विनिहन्यादचिरेण महीपतिः श
त्रून अस्यार्थः यस्य भुवनस्य राशेः स्वामिन्नोयादिक् तस्यां दिशि स राशिः प्लवसंज्ञ इत्यर्थः यथा मेषवृश्चिकयोः स्वामी भौमस्तस्य दिक् दक्षिणा अनस्त
त्रमेषवृश्चिकोप्लवसंज्ञा विंत्यम्यत्रापि चैवं मेषादीनां वर्णा उक्ताः लघुजातके अरुणसितहरितपाटलपांडुविचित्राः सितेतरपिशंगौ पिंगलकर्बुरबभ्रु
मलिनारुचयो यथासंख्यं अरुणो रक्तः पाटलो श्वेतरक्तः पिशंगः स्वर्णवर्णः पांडुरीषत्शुक्लः पिंगलः कपिलः मलिनारुचयो मत्स्यवर्णः कर्बुरः श्वेतक
पिलवर्णसंयोगः बभ्रुर्नकुलवर्णः यत्तु सारावल्यां लोहितसितशुक्लहरितापाटलपरिधूम्रपांडुविचित्राश्चकृष्णः कनकाभः पिंगः कर्बुरबभ्रुमत्स्यादिवर्णाः
शुरिति कन्यादिवर्णाः स्युरिति कन्यादिराशिषु वर्णो यथा तदयुक्तं न चिंत्यतत्स्पष्टमुक्तं भगवता श्रीसूर्येण रक्तः सितः शुकनिभः पाटलो धूम्रपांडुरः चित्रः कृ।

॥ तुल्यपिंगलः कर्बुरस्तनः बभ्रुर्मत्स्यनिभः पूर्वराशेर्वर्णक्रमात्स्मृताः प्रयोजनंतु सूतिकावस्त्रवर्णिकादिवर्णज्ञानं॥ ८॥ ❁ ॥ ९॥
अथभावसंज्ञावराहः तनुधनसहजसुहृत्सुतरिपुजायामृत्युधर्मकर्मायाःव्ययइतिलग्नाद्भावाश्चतुरस्रास्योष्टमचतुर्थे पातालहिबुकसुखवेश्मबंधुसं
ज्ञाश्चतुर्थंभुवनंचपंचमंत्रिकोणंचाधिपंचंमंत्रीयं दुश्चिक्यंसप्तमंचयामित्रंद्यूनंद्यूनमस्तंचतुच्छिद्राष्टमंद्वादशंरिष्फंकेंद्रादिभवनानिउपचयभ
वनान्याहसत्यएवकेंद्रचतुष्टयकंटकसंज्ञालग्नास्तदशमचतुर्थीनांसंज्ञापरतःपणफरमापोक्लिमंचतत्स्यरतःत्रिषडेकादशदशमान्युपचयानि एतद्वि
स्थानिं अन्यथा तु पचसंज्ञानीत्यर्थः तथाचसत्यःदशमैकादशषष्ठतृतीयसंज्ञानिजन्मलग्नाभ्यामुपचयभवनानिस्युः शेषाणिक्लान्यपचयानिअ
त्रजन्मलग्नाभ्यामितिनिरोपचयलक्षणं यस्माद्भावात्ग्रहादुपचयसंज्ञासातस्मादेवैतान्युपचयानितथाचयवनः षष्ठंतृतीयंदशमंचराशिमेकादशं
चोपचयर्क्षमाहुः होराग्रहस्थानशशांकभेभ्यः शेषाणिचेभ्योपचयात्मकानि अत्रकेचित्त्रिषडेकादशदशमानि यदिपापग्रहेणास्ता मित्रशत्रुणावायदिदृ
ष्टानिभवंति तदाचानुपचयान्यनुपचयसंज्ञानिभवंति तथाचगर्गः अथोचपंसंज्ञास्यास्त्रिलाभरिपुकर्मणां नचेद्भवति दृष्टःखेपापस्यस्यामित्रशत्रुभि
रिति भावानांसंज्ञान्तरमुक्तं सारावल्यां कल्पस्वपोरुषं एतत्प्रतिभाजकामदेस्वविवराणिसुकृमानभवव्ययानि इतिकेचित्तानिपराणिनामेति अत्रभा
वसंज्ञाफलनिर्देशप्रयोजनमाद्रेया तत्रलग्नस्यकल्पसंज्ञत्वाद्देहदृढान्वेषणमारोग्यान्वेषणंचलग्नात्कार्यं द्वितीयस्यकुटुंबसंज्ञात्वाद्धनजाति
वेचारोद्वितीयादेवंभ्रातृपुरुषार्थान्वेषणंतृतीयात् बंधुसुखार्थान्वेषणंचतुर्थात् पुत्रबुद्ध्यंतरान्वेषणंपंचमात् शत्रुरोगान्वेषणंषष्ठात् भार्यका
विवाहान्वेषणंसप्तमात् मरणापापभयान्वेषणमष्टमात् पित्रादिगुरूणांतपसांचान्वेषणंनवमात् आस्पदशब्दस्यस्थानदाचित्वादाज्ञाशब्दस्यप्र
त्ववाचित्वात्स्थानप्रभुत्वसन्मानकर्मविचारोदशमात् भवशब्दस्यविद्यादिगुणसंपन्नप्राप्तिवाचकत्वादेषांद्रव्यादिलाभस्यचविचारएकादशात्तद्
व्ययविचारोव्ययभावादिति अथैवंविचारणमुक्तंपराशरजातके लग्नादिव्ययपर्यंतभावसंज्ञानुरूपतःफलदाशुभसंदृष्टायुक्तावाशोभनप्रदाः
पदृष्टयुताभावाः कल्याणान्तरदायकाः नितरांशत्रुनीचस्थैर्नमिश्रोच्चगतैस्त्वतैः सौम्यैर्दृष्टयुताभावाः ग्रहवीर्यात्फलप्रदाः इतिराशीनफलमाहवाद

हो॰र॰ रायणाः केंद्रस्थाः सवलास्तु मध्यमफलाः पणफराश्रिताः ज्ञेयाः आपोक्लिमगाः सर्वे हीनवलाः राशयः कथिताः स्थानकेंद्रादिसंज्ञाभावानामेवन राशीनामिति
७ सूचितं अन्यथा राशौ राशिवलीवन्हिरामदेह दाह को दृष्टास्तद्दृष्टदर्शक इत्यादिवत् विरुद्धार्थप्रसक्तेः तथा च राशीनामेव केंद्रादिसंज्ञेति सुंदरमिश्रो
क्तमपास्तं केंद्रस्थाइतिक्रवर्त्ती वराहस्य शब्दाल्पत्वेनार्थाल्पतास्पष्टैवइति राशिप्रभेदाध्यायः १ अथ ग्रहयोनिभेदो निरूप्यते तत्र व्यवहारार्थं
ग्रहयोनिभेदः शुकजातके सूर्यो भानुस्तथादित्यो रविः प्रभाकरस्तथा दिनेशस्तमोहन्ता च दिनकर्त्ता दिवामणिः शीतगश्चंद्रमा सोमो रजनीपति
रेव च शीतरश्मिर्निशानाथः रात्रीशः कुमुद्दिनीपतिः आरो वक्रो महीसूनुरुधिरो रक्त एव च अंगारक इति ख्यातः क्रूरदृक् क्रूरकृत्तथा सौम्यो ज्ञोत्रपुत्रु
धश्चेति सोमजो वोधनस्तथा एते सौम्यस्य पर्याया कुमारश्च प्रभासुतः गुरुर्जीवो देवमंत्री देवतानां पुरोहितः देवेज्यश्चांगिरसस्सूनुः वृहस्पतिरिति।
स्मृतः शुक्रो भृगुर्भृगुसुतः आस्फुजिच्च सितस्तथा उशना दैत्यपूज्यश्च कामः कविरितिस्मृतः कोणो मंदः शनिः कृष्णः सूर्यपुत्रो यमस्तथा पंगुः शनैश्चरः।
शौरिः कालछायासुतासितः राहुः स्तमोसुरोगुश्च स्वर्भानुश्च विधुंतुदः धाता च सैंहिकेयश्च भुजंगो भुजगस्तथा ८ शिखी केतुर्ध्वजो धूम्रो मृत्युपुत्रो निलस्त
था अथ कालपुरुषस्यात्मादिस्वरूपान्यह हानाहकल्याणवर्मा आत्मा रविः शीतकरस्तु चेतः सत्वधराजः शशिजोथ वाणी ज्ञानं सुखं चेंद्रगुरु मदश्च शु
क्रः शनिः कालनरस्य दुःखं आत्मादयो गगनगैर्वलिभिर्वलवत्तरा दुर्वलैर्दुर्वलो ज्ञेया विपरीतं शनेः फलं शनौ वलिनि दुःखाभावः अवले दुःखप्राचुर्य
मित्यर्थः इदं च फलं तन्मतं ग्रहाणां दशासु वोध्यं राजादि ग्रहाणामाह स एव राजा रविः शशधरश्च वुधः कुमारः सेनापतिः क्षितिसूनुः सचिवौ सितेज्यौ प्रे
ष्यस्तयोस्तरणिजः सवला नराणां कुर्वंति जन्मसमये निजमेव रूपं अत्रार्कौ राजा चंद्रो राज्ञी गुरुर्मंत्री शुक्रो मंत्रिणः पत्नीज्ञेयः उक्तं च सूर्यजा।
तके अर्कः राजा शशी राज्ञी गुरुर्मंत्री शुक्रो मंत्रिणः पत्नीज्ञेयः नेता भूमिसुतः खगः सौम्यः कुमारो मंत्री च गुरुस्तद्वल्लभा भृगुः प्रेष्यस्तथैव संप्रो ल॰
क्तः सर्वदा तनुजो मम एषा प्रयोजने जन्मनि प्रश्नलग्ने वा यो ग्रहः सवलः स राजत्वादिकं करोति निर्वलो राजत्वादिनाशकरः यद्वा जन्म ७

न्मप्रश्नकाले वा बलवानुपचयस्थो यो ग्रहः स्यात् सदा तदुक्तो राज्ञादिकस्तस्य साधकः स्यादन्यथा हानिकरः वर्णानाह वराहः रक्तः श्यामो भास्क
रो गौर इंदुर्नात्युच्चांगो रक्तगौरश्च वक्रः दूर्वाश्यामो ज्ञो गुरुगौरगात्रः श्यामः शुक्रो भास्करिः कृष्णदेहः प्रयोजनं तु बलिनः सदृशी मूर्तिरित्यादि
ना वर्णज्ञानं तथा प्रश्नकाले चौरादेर्वर्णज्ञानमपीति। अथ ग्रहाणां वर्णस्वामित्वं दिगीशत्वं च होरामकरंदे ताम्रः श्वेतः शोणानीलातिपीत
चित्रः कृष्णश्चेति सूर्यादिवर्णाः प्राच्यादीशाः सूर्यशुक्रारदैत्याः मंदश्चंद्रः सौम्यजीवौ क्रमेण सूर्यादिस्वामिकदिशः इत्यर्थः अन्यथा रक्तः श्यामः इ
त्यादिना पौनरुक्त्यात् तथा च ताम्रगणविशिष्टद्रव्यस्य सूर्यस्वामी श्वेतरूपविशिष्टस्य चंद्र इत्याद्यग्रे वक्ष्यति एतत्स्पष्टमुक्तं सूर्यजातके ताम्रः शुभ्राणि र
क्तानां तथा हरितयोः विचित्रासितयोः सूर्यमुखाः स्वामिनः स्मृताः प्रयोजनं तु जन्मयात्राप्रश्नादौ बलिष्ठग्रहवर्णद्रव्यलाभः अन्यथा हानिकराः ग्रहा दौष्ट्यतत्त
द्वर्णपुष्पैर्दिक्स्वामिपूजा कार्येति दिक्स्वामिप्रयोजनं तु केंद्रस्थग्रहे सूतिकागृहद्वारज्ञानं हृतनष्टादिषु चौरादिर्गमनीयदिग्ज्ञानं प्रयोजनं सारावल्यां
पावकजलगुहकेशवशक्रशचीवेधसः पतयः सूर्यादिग्रहदेवतास्तन्मंत्रैः समभिपूज्यतामाशाकनकगजवाहनादीन्प्राप्नोति नृपारितः शीघ्रं यवनेश्वरो
पि देवा ग्रहाणां ज्वलनवह्निर्विष्णुप्रजापतिः स्कंदमहेंद्रदेव्यः चंद्रार्कचंद्रार्कजभौमजीवशुक्राश्रयस्तेषु यजेत शांत्यै तथा चौरनामानयने बलवद्ग्र
होक्तदेवतापर्यायनाम वक्तव्यः अथ ग्रहाणां क्रूरसौम्यविभागो होरामकरंदे क्रूरग्रहाः कुजदिवाकरसूर्यसूनुः क्षीणोडुपः शशिसुतः सुहितस्तु तैः
स्यात् पूर्णेंदुजीवभृगुजाः शुभसंज्ञिताः स्युस्तैः संयुतस्तु हिनरश्मिसुतोपि सौम्यः अत्र बुधो रविभौमशनिभिर्युतः पापत्वमेति न तु क्षीणेंदुसंयुतो पि यद्वाह
कल्याणवर्मा गुरुबुधशुक्राः सौम्याः शौरिकुजार्का नित्सर्गतः पापाः शशिजोशुभसंयुक्तः क्षीणश्च निशाकरः पाप इति आयुर्दाय विधौक्त
स्त्रयोदश्या शुक्लद्वितीयापर्यंतं तीक्ष्णत्वं क्रूरत्वं ग्रगतेन भवति अत एव यवनेश्वरेण क्षीणचंद्रस्य पापत्वेनोक्तं तदुक्तं मासे तु शुक्लप्रतिपत्प्रवृत्ते
पूर्णः शशी मध्यबलो दशाहं श्रेष्ठो द्वितीयेऽल्पबलस्तृतीये सौम्यैश्च दृष्टो बलवान्स देव क्रूरग्रहार्कः कुजसूर्यजौ च पापौ सुशुक्रशशांकजीवाः सौम्याः सौम्य

सुसैम्योव्यतिमिश्रितोन्यैर्वीर्यैस्तत्तुल्यप्रतिमत्वमेति राहुकेत्वोः पापत्वमुक्तं वसिष्ठेन सूर्यभौमशनिराहुकेतवः क्रूरसंज्ञखचराः क्षयचंद्रः पूर्णचंद्रगुरु
शुक्राश्चंद्रजासर्वकर्मसु हिंसोन्यखेचराः इतिग्रहाणांविप्रादिवर्णाधीशत्वं सूक्ष्मजातके जीवसितौ विप्राणां क्षत्रसारौस्मृग्विशांचंद्रः शूद्राधिपः शशि
सुतः शनैश्चरः संकरजातीनां भवानां प्रयोजनं च हृतनष्टादिषु ग्रहवलात् चौरादीनां जातिज्ञानं तदुक्तं च वयोजनिश्चलग्नयादिति एषामपद्यातेन
वर्णोपघाती वाच्यः यदाहुस्त्यः गुरुशुक्रौ रविभौमौ चंद्रः सौम्यः शनैश्चरेनि विप्रक्षत्रियविट्शूद्रसंकराणां प्रभुत्वकराः अजयजयेपि सुष्यवशी
तौवित्तनाशनेलाभे अथ ग्रहाणां वेदेशमुक्तं सारावल्यां ऋग्वेदाधिपतिर्जीवो यजुर्वेदाधिपः सितः सामवेदाधिपो वक्रः शशिजोथर्ववेदयाः प्र
योजनंतु शाखेशवलेउपनयनादिप्राशस्त्यमिति ग्रहाणां पुंस्त्रीनपुंसकविभागः पंचेतत्त्वविभागश्च वृहज्जातके बुधं सूर्यसुतौ नपुंसकाख्यौ श
शिशुक्रौ युवती नराश्च शेषाः शिखिभूखपयोमरुद्गणानामधिपाः भूमिसुतादयः क्रमेण जन्मनि चिंतायां च हृतनष्टादिषु वलवतः स्वपक्षमेव
कुर्वंतीति प्रयोजनं पंच भूतप्रयोजनं तत्रैव छायायां महाभूतकृतां च सर्वे निर्व्वजयंति स्वदशामवाप्य कं द्विग्नि वाय्वंवरजानुगुणांश्च नासास्यत्वक्दृ
कू श्रवणानुमेयात् ग्रहाणां सत्वादिगुणांस प्रयोजनमाह गुणाकरः सत्वं शशी ज्योषकराः सितज्ञौ रजस्तमश्चाननयार्कपुत्रौ यंस्याभवद्ध्यंश
गतो दिनेशस्तत्तुल्यसत्वादिगुणो नरः स्यात् वराहोपिसत्वरजस्तमांस्त्रिंशांशेयस्यभास्कररत्वादृगिति अत्र पूर्वोक्तपंचभूतलक्षणं सत्वादिगु
णलक्षणं च वक्ष्यमाणपंचमहापुरुषराजयोगविचारे विस्तारं लिख्यंते तत्रैव एवावधार्यंनन्वर्कस्योदृश्चत्रिंशांशका भावादनयोः सत्वादिगु
णानिरूपणं व्यर्थं स्यादिति चेन्नयतोर्व्वलवद्ग्रहवशादपि प्रकृतिर्भवंतितदुक्तंदेवकीर्तिनावलज्झिग्गुणोभवेज्जात इति अत्रत्रिंशांशकतो गुण
विचारोस्त्यः यदाहश्रीसूर्यः यस्य त्रिंशांशगश्चाहंतद्गुणो जातको भवेत् सत्वादिप्रकृतिरंतरात्मनो भवतीत्युक्तं शुक्रजातके सत्वादिंप्रकृतिंस्वीया
मयच्छंत्यतरात्मनइति अथ ग्रहस्वरूपं तत्र वराहः मधुपिंगलदृक् चतुरस्रतनुः पित्तप्रकृतिः सविताल्पकचः तनुवृत्ततनुर्बहुवातकफः प्रा

त्रश्चेंदुर्मृदुवाक्शुभदृक् मधुपिंगलदृष्टिश्चतुरस्रतनुः प्रसारितभुजद्वयेव्यायसमः तनुवृत्ततनुः कृशवर्णांगः क्रूरदृक्तरुणमूर्तिरुदारः पैत्तिकः
सुचपलः कृशमध्यः श्लिष्टवाक् सततहास्यरुचिर्ज्ञः पित्तमारुतकफप्रकृतिश्च क्रूरदृग्भौमः कृशमध्यस्तनूदरः श्लिष्टवाक् गद्गदभाषी बृहत्तनुः पिं
गलमूर्धजेक्षणो बृहस्पतिः श्रेष्ठमतिः कफात्मकः भृगुः सुखी कांतवपुः सुलोचनः कफानिलात्मासितवक्रमूर्धजः मंदोऽलसः कपिलदृक् कृश
दीर्घगात्रः स्थूलद्विजः परुषरोमकचोऽनिलात्मा स्नाय्वस्थ्यसृक्त्वगथ शुक्रवसासमज्जा मंदार्कचंद्रबुधशुक्रसुरेज्यभौमाः स्थूला महांतो द्वि
जा दंता यस्य स स्थूलद्विजः मज्जा अस्थ्यंतरगतो धातुविशेषः प्रश्नसमये तु जन्मकाले यो ग्रहो बलवान् तद्धातुसारस्तज्जातो भवति यद्वा
हृतनष्टप्रश्ने एवंविधरूपाश्चौरादयः व्याधितप्रश्ने चैवं तत्स्वामिलग्ने जन्मांशस्वामिवशेन तद्दोषोद्भवा पीडा च वक्तव्येत्यादि अथ ग्रहाणामवस्था
वर्षाणि शुक्रजातके बालवयस्को भौमः कुमारो विधौ बुधो गुरुस्त्रिंशत् शुक्रः षोडशवर्षो रविः पंचाशद्वर्षश्च चंद्रः सप्ततिवर्षः शतवर्षः शनिरा
हुकेतोः स्यात् येषां प्रसूतिसमये सदसत्फलदायकाः खेटः बलसहितः स्वावस्थाकालस्वरूपं विशेषतः कुर्यात् अथ ग्रहाणां वस्त्रज्ञानं धातुज्ञा
नं च जातकरत्नमालायां स्थूलं नूतनमेव वह्निकहतं वस्त्रं जलैराहतं मध्यस्थं दृढमेव जीर्णकमिदं रव्यादितश्चिंतयेत् ताम्रं स्यान्मणिहेम
मिश्रितमतो रौप्यं तु मुक्तायसी प्रश्ने जन्मनि वा बलाधिकतरच्छायादिकं चिंतयेत् अत्र स्वगृहे स्थितगुरोः सुवर्णमपि वेदितव्यं एतदुक्तं वाद
रायणेन अर्कस्य ताम्रं मणयो हिमांशोर्भौमस्य हेम इंदुसुतस्य युक्तिः जीवस्य रूप्यं स्वगृहे स्थितस्य तस्यैव हेमोशनसश्च मुक्ता तीक्ष्णांशुदेहप्रभव।
स्यसीसं तत्स्नायसं वा प्रवदंति तज्ज्ञाः प्रयोजनं च सूतिकागृहे बलवद्ग्रहधातुमताः वाच्याः तत्र शुभदशायां तद्द्रव्यलाभः अथाशुभदशायां तद्द्रव्य
हानिर्ज्ञेया अथ ग्रहाणां रसस्थानानि सारावल्यां कटुलवणतिक्तमिश्रमधुराम्लकषायं रसविशेषाणां सुरगृहकाग्निविहारार्थशयनपांसूत्क
राणां च रव्यादयः स्वामिन इति शेषः अंकं जलगृहं पांसूत्करो चकारः स्थानं प्रयोजनं तु मासि तृतीये स्त्रीणां दोहको जायते रूपं मासाधिपस्य भावे लग्न।

योगादिमिच नित्यमिति भोजनप्रश्ने च तद्ग्रहलग्ननवांशवशात्तत्तद्रसान्वितभोजनः वक्तव्यं उत्तरार्द्धे प्रयोजनं तु बलवद्ग्रहवशात्तत्स्वस्थानज्ञानं
हो॰र॰ हतनष्टादीनां स्थानज्ञानं अथ ग्रहाणामयनादिस्वामित्वमृतुस्वामित्वं चोक्तं सारावल्यां अयनक्षणादिवसर्तुकमासमाख्यनदर्धशाब्दं दिनेशाद्याः शि
९ शिराद्यानामीशाः शशिसितभौमेंदुबुधजीवाः अयनादिस्वामिप्रयोजनमाह मणित्थः लग्नांशपतिस्तुल्यः कालोंशसमसंख्यः वक्तव्यो रिपुविष
येगर्भाधानेयकार्ये संयोगे अस्यार्थः लग्ने यावंतो नवांशाः उदिता भवंति तावत्संख्यः कालोंशकः स्वामिवशेन वक्तव्यः तद्यथा यदि नवांशस्वामी रवि
र्भवति तदा तावदयनांतरं कार्यसिद्धिर्भवति एवं चंद्रे तावन्मुहूर्तोनंतरं भौमे तावद्दिनांतरमित्यादि विज्ञेयं एवं प्रश्नलग्नात्सर्वेपि कालो ज्ञेयः केचि
त्तु प्रश्नलग्ने यस्य ग्रहस्य नवांशकोदयो भवति स च ग्रहस्तस्मान्नवांशकात्यावत्संख्ये नवांशे भवति तत्संख्यो नवांशस्वामिग्रहवशेनायनादिक
कालो वक्तव्य इत्याहुः ऋतुस्वामिप्रयोजनं तु नष्टजातके ऋतुनिर्देशः स च लग्ने यो ग्रहो भवति तद्दर्शनकार्यः यदि लग्ने न कोपि ग्रहस्तदा द्रेष्का
णास्वामिवशेन यदि च लग्ने द्व्याद्याः ग्रहाः भवंति तदा बलवद्ग्रहवशेन तथा च मणित्थः द्व्याद्यैर्लग्नोपगतैर्यो बलवांस्तद्ग्रहमृतुनिर्देशदिति अथ
दृष्टिः वराहः दशमतृतीये नवपंचमे चतुर्थाष्टमे कलत्रं च पश्यंति पादवृद्ध्या फलानि चैवं प्रयच्छंति अन्यच्च पूर्णं पश्यति रविजस्तृतीयदशमे त्रि
कोणमपि जीवः चतुरस्रं भूमिसुतः सितार्कबुधहिमकराः कलत्रं च चकारेणानुक्तसमुच्चयार्थे तेन कुजार्कीन्यानां समुच्चयात्सप्तमे सर्व एव सं
पूर्णदृष्टयः इत्यर्थः यवनेश्वरोपि यामित्रभे दृष्टिफलं समग्रं स्वपादहीनं चतुरस्रयोश्च त्रिकोणयोर्दृष्टिफलार्धमाहुर्दुश्चिक्यसंज्ञे दशमे च पादं राम॰
फलं विशेषं प्रवदाम्यथातो भौमस्य पूर्णा चतुरस्रभे स्यात् फलं च जीवस्य पृथात्रिकोणं पूर्णा शनेः स्याद्दशमे तृतीये स्वाक्रांतभात्सप्तमभे समस्तं फलं ९
दृष्टत्वं निखिलग्रहाणां सूर्यजातके श्रीसूर्योपि तृतीयदशमे शौरिः जीवस्तद्वत्त्रिकोणके चतुरस्रं धरासूनुः कलत्रे निखिला ग्रहाः पूर्णं पश्यंति
सर्वत्र प्रयच्छंति फलं तथेति गार्गिरपि दुश्चिक्यदशमाख्यौ त्रिकोणस्थान्बृहस्पतिः चतुर्थाष्टमगान्भौमः शेषाः सप्तमसंस्थितान् भवंति तौ क्षिपा।

नित्यमुक्ताधिकफलाग्रहाद्इति अत्रभौमशेषाः सप्तमसंस्थितिपाठेलेखकदोषजोज्ञेयः अन्यथापूर्वोपन्यस्तमुनिवचनैर्विरुद्धतास्यात् केवलंभ
मादिवभौमादीनांसप्तमेपूर्णदृष्टिर्नवदंति तच्चिंत्यं अथमित्रामित्रविभागःसत्याचार्यःसुहृदस्त्रिकोणभवनात् ग्रहस्यसुतभेव्यये धनभवनेस्वज
नेनिधनेस्वधर्मस्वोच्चेचभवंतिनोशेषास्त्रस्यार्थः ग्रहस्यस्वात्रिकोणभवनाच्छुभं ज्ञेयंचभवने व्यये द्वादशेधनभवनेद्वितीयेस्वजनेचतुर्थेभवने
निधनेऽष्टमभवनेधर्मेनवमेस्वोच्चभेवनेचसुहृदःतद्भवनस्वामिनोमित्राणीत्यर्थः शेषाअनुक्तराशिस्वामिनः शत्रवः तेत्रद्विराशिस्वामीमित्रंए
कराशिस्वामीसमः सूर्यचंद्रमसोस्तुएकराशिस्वामित्वेपिमित्रत्वं[illegible]मिवेदितव्यंतद्यथासूर्यमूलत्रिकोसिंहस्तस्मात् द्वादशस्थानंकर्कस्तत्स्वामि
चंद्रःसचएकराश्यधिपोपिस्वमित्रमेव एवंसिंहापं[illegible]धनुर्मीन[illegible]स्वामीगुरुःसोपिस्थानस्वामिनोशुक्रशनीशत्रूइति एवंचंद्रादीनाम
पि अनयैवरीत्याख्यातानांमित्रसमशत्रूनसिद्धवत्कृत्याह वराहः शत्रूमंदसितौसमश्चाशशिजोमित्राणिशेषारवेस्तीक्ष्णांशुर्हिमरश्मिजश्च
सुहृदौशेषासमाःशीतगोःजीवहृत्क्षकराःकुजस्यसुहृदोज्ञोरिःसितार्कीसमौमित्रेसूर्यसितौवुधस्यहिमगुः शत्रुःसमाश्चापरे सूरेःसौम्यसितावः
रिरविसुतोमध्योपरेत्वन्यथासौम्यार्कीसुहृदौसमौकुजगुरूःशुक्रस्यशेषावरी शुक्रज्ञौसुहृदौसमःसुरगुरुःसौरस्यचान्येरयः येप्रोक्ताःस्वत्रिको
णाभादिषुपुनस्तेऽमी तथाकीर्तिताश्रीसूर्योपि शत्रूमंदसितौसौम्यःसमोमित्राणिमेपरेस्त्र हिमेद्रसुतोमित्रेस्वशिनोन्येसमाःखगाः अहमिंदुगु
रू मित्रेज्ञोरिःशुक्रयमौसमौभौमस्याथविदोमित्रौशुक्रोहमरिरिज्वभूः अतोन्येपिगुरोःसौम्यसितौशत्रूयमःसमःसुहृदोन्येभृगोःसौम्ययमौमित्र
समौस्मृतौ गुर्वारवरयोन्यस्युःमित्रेशुक्रवुधौशनेःगुरुःसमोवैरिणोन्येएवंमित्रादिकाःस्मृताइतिवसिष्ठोपिरवेःसमोज्ञःसितसूर्यपुत्रावरीपरे
येसुहृदोवराप्यःचंद्रस्यनारीरविचंद्रपुत्रौमित्रेसमाःशेषनभश्चराःस्युःसमौसितार्कीशशिजश्चशत्रूमित्राणिशेषाःपृथिवीसुतस्यशत्रुःशशी
सूर्यसितौचमित्रेसमाश्चपरेस्युःशशिनंदनस्यगुरोर्ज्ञशुक्रौरिपुसंज्ञकौतुशनिःसमोन्येसुहृदोभवंतिशुक्रस्यमित्रेवुधसूर्यपुत्रौसमौकुजार्यौवि

हो॰र॰ नरावरीतौ शनेः समौ वाक्पतिरिंदुसूनुः शुक्रौ च मित्रौ रिपवः परेपि ध्रुवंप्रद्यसां चतुराननेन शत्रुत्वमित्रत्वसमत्वमुक्तं ॥ ८ ॥ ॥ ८ ॥
१० कश्यपोपि रवेः समात्तौ मित्राणि चंद्रारेज्याः परावरौ इंदोर्न शत्रुस्तौ मित्रे रविजौ विनरे समाः समौ कुजस्य शुक्रार्कौ बुधो रिः सुहृद्गोपरे तस्य चेंद्र
रिर्मित्रे रविजौ विनरे समाः गुरोः कुजेंदु मित्राण्या किं मध्योपरावरौ भृगोः समौ वीज्यकुजौ मित्रे ज्ञार्कीं परे रिपू शनेर्गुरुः समो मित्रे ज्ञशुक्रौ शत्रवः
परे नारदेनाप्येवमुक्तं केचित्त्वन्यथा निसर्गमैत्रीमाहुः सा च यवनेश्वरोक्ता यथा रवेर्गुरुर्मित्रमतोन्यथान्ये गुरुस्तु भौमं परिहृत्य सर्वे चांद्रेरनर्कौ
भृगुनंदनस्य रवींदुवर्ज्यं सुहृदः परिष्टाः भौमस्य शुक्रः शशिजस्य मित्रे इंद्रौ बुधं द्वेव गुरुं च विद्यात् सौरस्य मित्राणि कुजेंदुसूर्याः शेषानरीन् वि
द्धि षु तेचतद्दिति त्र च वसिष्ठकश्यपनारदादिमुनीनां सत्यादिबहूनामाचार्याणां सम्मतेश्च वराहादीनां च तात्कालिकमैत्रीमाह श्रीभगवान्
यः दशायबंधुसहजस्वांत्यस्थास्तु परस्परं सुहृद्भवेद्धि सुहृन्समो मित्रं परः समः यथा त्रिकोणषष्ठाष्टसप्तैकस्थिताः खेचराः अन्योन्यं रिपुतां याति
न तत्कालं यानि सारथे एवं नोपि मुख्यपूर्वोक्तं मैत्री उक्ता न यथा मूलत्रिकोणाद्धनकर्मबंधुपुत्रव्ययस्थानगता ग्रहेंद्राः तत्कालमेते सुहृदो भवंति
सो व्याधिपो मुख्यतमश्च मैत्री कल्याणवर्मा च व्ययांबुधनस्वायेषु तृतीये मित्रमाश्रिताः तात्कालिरिपवः षष्टसप्ताष्टैकत्रिकोणगा हितसमरिपुसंज्ञा
येनिसर्गा निरुक्ताः अधिहितमध्यास्तेपि तत्कालभिन्नं विबुधसम [illegible] दास्याः सृतिकाले ग्रहेंद्राः अधिरिपुमध्यास्तेशत्रवश्चिंतनीयाः अथ ग्रह
णां षड्बलानि तत्र दिक्स्थानकालचेष्टाबलान्याह कल्याणवर्मा दिक्स्थानं कालचेष्टाकृतं बलं सर्वनिर्णयविधाने वक्ष्ये चतुःप्रकारं ग्रहस्था
रिक्तो भवेद्बलतः लग्ने जीवबुधौ दिवाकरकुजौ व्योम्नि धुने भास्करिः बंधौ विंदुसितौ निशाकृतिमिरे च त्रिकोणस्वभौममित्रस्वांशकसंस्थिताः
शुभफले दृष्टो बलीयान् ग्रहः स्त्रीक्षेत्रे शशिभार्गवौ नरगृहे शेषाः क्वचित्स्थाने जंजी वाकोस्फुजितौ हि विज्ञ सततं मंदेंदुभौमा निशि होरा भास्करदिना राम
दिपाश्च बलिनः सौम्यः सितान्ये सिते संग्रामे जयिनो विलोमगतयः संपूर्णगा वा ग्रहाः सूर्यदृपुभरुक्त्वरेणबलिनो मन्योक्तचेष्टाबलं जयलक्ष १०
णं तु ग्रहयुद्धप्रकरणे निरूपितं वराहेणाविपुलो स्निग्धद्युतिमान् उत्तरदिक्स्थो जयोन्वितः ग्रहपराजयलक्षणं तत्रैव दक्षिणदिक्स्थ पुरुषा वे

पथरथांप्यसन्निहृतोऽगुः अग्निरुद्रौ विद्धतीनिनिष्प्रभोविवर्णोंश्च यः सजित इति अत्रविपुलादिलसराय तो दक्षिणादिक्स्थोविजयीस्निग्धः इति
विलोमगत्या वक्रिणः संपूर्णागावः संपूर्णारश्मयः उत्तरमयनं प्राप्ताः शशिशुक्रकुजार्कसुरमंत्रिणो बलिनः याम्ये रविशशिपुत्रौ हृद्येपि शशिजः
स्वर्गसंस्थाश्च पुंस्त्रीनपुंसकाख्याः क्षेत्रेष्वाद्यंतमध्यमं प्राप्ताः सूर्योन्निर्गत्य सदानवोदिता यवनराजमतं प्राप्तात्रिभागेतिबली शशांकः शुक्रोपि शशा
र्धे वनिजो निशांते प्रातर्बुधो मध्यदिने विवस्वत्यः सर्वत्र जीवोर्कसुतो दिनांते शुक्लार्बुधगुरुसिताः शशिसूर्यौ वृत्तरोत्तरं बलिनः स्वाभाविकबलमेतद्द
लसाम्ये चिंतयेन्मतिमान् उच्चराशौ विलोममेव बलं नाम्येरिहेष्यते कालस्यातिबहुत्वात्तस्मात्क्रमेति विक्षिनेस्वोच्चे स्थिता अष्टफलाः मवंतिमूल
त्रिकोणे स्वगृहे च मध्याः दृष्टेक्षिता मित्रगृहाश्रिता वा वीर्येकनीयः समपीडकुटुंबितिशुक्लप्रतिपद्दशकेमध्यमबलः कीर्तितोयवनवृद्धैः अंत्योद्वितीयस्य।
शकेस्वल्पबलश्चंद्रमाज्ञेयश्चाहितकलासमूहः प्रसन्ननिजमंडलश्चपरिपूर्णः अप्रतिहतमिह कुरुते भूपतिबलमूढगणाधिपंतिः राशेस्त
दीश्वरस्य च बलेन परिकल्प्य मृक्षभेदफलंयुगमंत्फलोपलब्धौ निवृत्तिरेकत होराग्रहबलसाम्ये निसर्गतश्चिंतनीयमाचार्यैः लग्नाधिपेन तुल्य।
मिह चूडामणिर्वदति उच्चमूलत्रिकोणस्वगृहविभागस्तु प्रागुक्त एव अथ दीप्तादिफलं चाह गुणाकरः दीप्तः स्वोच्चगतः स्ववेश्मनि भवेत्स्वस्थस्त
था हर्षितः मित्रर्क्षे शुभवर्गगो गगनगः शांतः प्रदिष्टो बुधैः शक्तो रश्मिविताभवेत्स्वविकलः सूर्यांशुलुप्तद्युतिः दीनो नीचगतः खलोशुभयुतः खेटादि
तोपीडितः दीप्तेप्रताप विजिताखिलशत्रुपक्षो लक्ष्मीयुतः समदकुंजरराजकेलिः स्वस्थे गृहाश्वमणिधान्यकुटुंबयुक्तः सेनापतिर्भवतिहंत्रा।
खिलारिपक्षात् कनकयुक्तो हर्षितो निर्जितारिः ससुखधनविलासो धर्मधीयुक्प्रशांते वसनकुसुमकांताकेलिनिष्ठस्वशक्तेव्रजनिगतधनत्वं।
दैन्ययुक्तस्तु दीने स्थानच्युतः क्षतघनो विकलेऽविभीतिः स्यात्पीडिते गदयुतो बहुदुःखशोकः दुःखान्वितो गतधनो वनिताविमुक्तो देशांतरंव्रज
ति वीतसुहृद्खलाख्ये ग्रहाणां संक्षेपेणावलमाह कल्याणवर्माच्चाभावान्सत्यशुभशौचयुताः सुरूपास्तेजस्विनः स्मृतिविदो द्विजदेवभक्ताः सद्दृष्टमा

त्वंजलभूषणसंप्रियाश्च सौम्यग्रहैर्बलयुतैः पुरुषा भवंति लुब्धाः कुकर्मनिरताः निजकार्यनिष्ठाः पापान्विताः सकलहास्यतमोभिभूताः क्रूराः शाषः व
धिरता मलिनाः कृतघ्नाः पापग्रहैर्बलयुतैः पिशुनाः कुरूपाः पुं राशिषु च ग्रहैर्द्रैः वीराः संग्रामकांक्षिणो बलिनः निःस्नेहाः सुकठोराः क्रूराः मूर्खाश्च जायंते
युवतिभवनस्थितेषु च मृदवः संग्रामभीरवः पुरुषाः जलकुसुमवस्त्रनिरताः सौम्याः सकलाश्च वस्त्रसंतुष्टाः इति ग्रहयोनिप्रकरणं अथाधानप्रकर
णं सारावल्यां राशपादिफलविचारः कस्य विधेयो विना समुत्पत्तेः आधानमतो वक्ष्ये कारणभूतं समस्तजंतूनां अनुपचयराशिसंस्थे कुमुदाकरबांधवे रु
धिरदृष्टे प्रतिमासं युवतीनां भवति रजोदर्शनं ध्रुवं लोके इंदुर्जलं कुजोग्निर्जलेन संकरस्त्वग्निरेव पित्तं स्यात् एवं रक्ते क्षुभिते न पित्तेन रजः प्रवर्त्तते स्त्रीषु
एवं यद्भवति रजो गर्भस्य निमित्तमेव कथितं तत् स्त्रीजन्मभादनुपचयग्रगृहस्थे यदि कुजः पश्यति तदा रजो दर्शनं गर्भधारणायोग्यं स्यात् परंतु
वृद्धवंध्यातुराद्यतिरिक्तासु स्त्रीषु बोध्यं तथा च वादरायणः स्त्रीणां गतोऽनुपचयर्क्षमनुष्णरश्मिः संदृश्यते यदि धरात्तनयेन तासां गर्भग्रहार्त्तवं
पश्यंति तदानवंध्यावृद्धातुराल्पवयसामपि चैतदिष्टमिति उपचयसंस्थे विफलं प्रतिमासं दृष्टे नैतस्य उपचयभवने शशिभृद्दृष्टो गुरुणा सुहृद्भिर्वा
सौ पुंसां करोति योगं विशेषतः शुक्रदृष्टः चंद्रे कुजेन दृष्टे पुष्पवती सुहृद्विट् न संयोगं सौम्येन उपपत्तिना भृगुना कांतेन रूपवता राजपुरुषे
ण रविजेनाम्मौलिभृत्येन एकैकेन फलं दृष्टेन्यैः कुजादिभिः पापैः समस्तैः स्वगृहं त्यक्त्वा गच्छति वेश्यापदं युवतिः उपचयभुवने शशिभृद्दृष्टे इत्या
नोपचयभवनं पुरुषस्यैव यदाह वादरायणः पुरुषोऽपचयगृहस्थो गुरुणा यदि दृश्यते हिमम यूषः स्त्रीपुरुषसंप्रयोगं तदा वदेदन्यथा नैवमिति अयं वि
चारश्चतुर्थदिने तदाह मणित्थः ऋतुविरमे स्नाता या यद्रूपः संस्थितः शशी भवति वलिना गुरुणा दृष्टो भर्त्ता सह संगमश्च तदानुपूर्वोक्त सारावलीप
द्येषु क्रदृष्टे चंद्रे स्वपुरुषयोगोऽन्यदृष्टे राजपुरुषादिभिः पुष्पवतीसंयोग उक्तोस्ति तत्र साध्वीनां परपुरुषाभावात्कथं योगो घटत इति चेदुच्यते राजपुरु
षादिचेष्टास्वरूपादियुतेन स्वपुरुषेणैव योगो वाच्यो न तु परपुरुषेण वेश्यापदं चात्राति निर्लज्जत्वद्योतकमिति सर्वसुस्थं सारावल्यां हि प्रथार इयो विल।

२ ग्नास्तुरतंकुर्वंति सप्तमेयद्वत् तं द्वत्पुरुषाणामपिप्रभोधानेसमादेश्य अस्तेऽ शुभहष्टयुतेसरोषकलहसदा सौम्यः सौम्यसुरतवात्स्यायनसंप्रयोगका
रव्यातेतत्रशुभाशुभकर्मभिरधिवासिताविषयवृत्तिः गर्भेवानियत्रिंसंयोगेशुक्रशोणितयोः उपचयगोरविशुक्रौबलिनौपुंसः स्वमंशकंप्राप्तौ।
युवतेर्वाकुजचंद्रौयदागर्भसंभवोभवति अयमर्थोन्यायसिद्धः तंद्यथा सूर्यस्यपुंग्रहत्वादुपचयगतः तदीयपुंस्त्वोपचयकरः शुक्रःउपचयेस्थि
तश्चेत्शुक्रपुष्टिकरः अत्रउभयोर्बलंपुरुषस्ययुज्यतेएवंस्त्रीपुंसोः प्राबल्यात्शुक्रशोणितसंनिपातेहिगर्भग्रहणंभवतीतिज्ञेयं अत्रसमुद्रजातक।
टीकाकृतः पुरुषस्त्रीजन्मराशिंविहायमेषाद्याः पुंराशयोवृषाद्याःस्त्रीराशयइतिव्याख्यातंतदसत्यतःस्पष्टमेतदुदितंशुक्रजातकेसूर्यशुक्रौस्वांश
कस्थौपुरुषोपचयगौस्त्रीणांकुजेंदुवीर्याढ्यौस्वांशोपचयसंस्थितौगर्भप्रदौपंचमेचनिर्बलेक्रूरसंयुतेसुतेशेस्तंगतेनीचेनगर्भःक्रूरसंयुते सारावल्यां
शुक्रार्कभौमशशिभिःस्वांशोपचयसंस्थितैर्धर्मेथवात्मजेवाबलवतिगर्भस्यसंभवोभवतिमिथुनस्यसप्तमोभावोयादृक्मदलालसंभवतितादृक्।
श्लेष्माभिःस्वदोषैस्तनस्तुतुल्यगुणोनिषिक्तःस्यात् अयंयोगोनिषेककालेज्ञेयःउक्तंचसूर्यजातके सद्युतैश्चंद्रशुक्रारैःस्वांशोपचयसंस्थितैः॥
आधानलग्नेगर्भसंभवोभवतिध्रुवंअत्रलग्नस्थोपिगुरुर्ज्ञेयःउक्तंगर्गेणलग्नस्थोवासुतस्थोवाधर्मस्थोवाबलीगुरुः प्रोक्तस्तेशुभवारेचधारयेद्गर्भं।
मुत्तमंअन्येपिनिषेकलग्नाद्योगाउक्तास्तेनैवपुंग्रहाः षष्टलाभस्थाः पंचमेशांप्रदावली अन्येविषमराशिस्थागर्भयोगाइमेस्मृताः लग्नात्म
जेशौसंयुक्तावन्योन्यंचाभिवीक्षितौ परस्परंक्षेत्रगौवागर्भयोगाइमेस्मृताः ओजराश्यंशगेचंद्रेलग्नेपुंग्रहवीक्षिते स्ववर्गोष्विंदुजीवभौमाः सु।
गर्भयोगकः इतिअन्यान्शुभाशुभयोगानाहश्रीशुक्राचार्यः लग्नाधिपः सुतस्थानेजायास्थानगतोपिवा सुतजायाधिपोलग्नेतत्स्याद्गर्भसंभ।
वःनिषेककालेसूर्यस्यसप्तमस्थौकुजार्कजौ पुंसोरोगप्रदावाकौकुजमंदौद्विरिष्फगौ पुंसोमृत्युप्रदोवार्कःपूर्णदृष्ट्याचवीक्षितः मध्येमंदारयोरेकतरे १२

ज्यो.र. हन्यौ सूर्यः विधौ जिनामिमे योगाः न विचार्याः कदाचनेति विशेषयोगाः मीनराजजातके मंदारयोः सप्तमराशिसंस्थयोः यदा निषेको मरणं तदा पितुः र
१२ विः शशांकान्नवपंचजनन्याः एके नरोगः पुरुषप्रवादाः यदा हिमांशुर्व्यययगो दिवाकरश्छिद्रंगतो भूतनयश्चतुर्थः मृत्युस्तदा संभवतेऽस्य भाभ्यां शस्त्रेण सौ
रोगानुबंधनेन मृत्युकरः शीतकरः स्वविष्के १०।१२ सुखस्थितः सूर्यसुतः सभौमः नगर्भसंभूतिमिह प्रदिष्टं योगैः समैस्तैः प्रवदंति कश्चात् मूर्तिस्थिता
लीसाकरः कुजो वा सक्षीणमूर्तिर्विधुर्विष्फगो वा दृष्टाफलं तस्यात्सुरतोपचोरे नीचाश्रितैर्वा दिभिरत्र पुंसां अथ पितृमातृपितृव्यमातृष्वसृसंज्ञ
कान् ग्रहान्तत्फलं चाह कल्याणवर्मा दिवसे मातापितरौ शुक्ररवीशनीति निशायां च मातृभगिनीपितृव्यौ विपर्यास्कीर्तितौ यवनवृद्धैः दिवसे निष
कस्या जातस्य चेति शेषः एवं निशायामिन्यत्रापि लग्नादि विषमर्क्षगतः पितुः पितृव्यस्य खेचरः समक्षः मातृभगिनीजनन्योः समगृहगोऽन्यो न्यथा
तेषु अन्यथोक्तवैपरीत्येषु मातृपित्रादिषु अन्यः विपरीतफलः अथ लड्न्यर्थः विशेषउक्तो होरामकरंदे आरोग्युरस्त्ये पितृमातृखेटौ फलं तु पूर्णवद
तुस्वकीयं अनेन तयोस्तुल्यमतीव मध्ये पापं शुभं वा परिकल्पनीयं सारावल्यां अथवा निषेककाले विलग्नसंस्थो यदा रुधिरमंदौ नजूहगतेऽथवेंदौ न
दीक्षिते वा पतति गर्भः होरेंदुयुतैः सौम्यैस्त्रिकोणजायार्थस्वांबुसंस्थैर्वा पापैस्त्रिस्त्र्यायगैः सुखी तु गर्भो निरीक्षिते रविणा यद्विचंद्रराशिर्लग्नरा
शिर्वा निरीक्षितइत्यर्थः क्रूरांतस्थचंद्रसूर्यौ वा युगपदेवमरणाय सौम्येरदृष्टस्तिर्यग्वर्तीनां गर्भसहितानां अत्र लग्नं हृत्पापांतस्थोऽत्रे योग इति वराहः
तद्यथा पापद्वयमध्यसंस्थितौ लग्नेंदू न च सौम्यवीक्षितौ युगपत्पृथगेव वा वदेन्नारीगर्भयुता विपद्यते उदययानैः पापैः सौम्यैरनिरीक्षितैर्मरणम्।
स्याः अत्र द्वादशगैः क्रूरैर्योगमाह गर्गः अशुभैर्द्वादशर्क्षस्थैः शुभदृष्टिविवर्जितैः आध्यनं लग्नेमरणं योषितः प्रवदेद्बुधः सारावलीपद्येमूलं मृ
स्य वराहेणापि अभिलषद्भिरुदयर्क्षमसद्भिर्वित्यनेन द्वादशे क्रूरग्रहाङ्गाकारनि उदयस्थैर्कजेवाक्षीणेंदौ भौमसंदृष्टे व्यययगे रवौ शनिक्शेषानाले
लोहिते सगर्भैव स्त्री म्रियते शस्त्रेणाथवा शुक्रे पापद्वयांतस्थे चंद्रे चतुर्थे क्रूरैर्लग्नगतैर्वा विपद्यते गर्भः होराष्टमे क्षितिसुते म्रियते सगर्भे सहजनन्या

वराहेणोयंयोगो ऽन्यथोक्तः क्रूरैः शशिनश्चतुर्थगैर्लग्नाद्वा निधनाश्रिते कुजे अन्त्रविधनाश्रिते कुजे चंद्राद्वा मातृवधयोगद्वये द्वैये हिबुकगते धरणीसुते रि
ष्फगते क्षपाकरे क्षीणे गर्भपातः समेम्रियते पापग्रहैर्दर्शनप्राप्ते लग्ने रविसंयुक्ते क्षीणे दैवा कुजे अथवा म्रियते व्ययधनस्थैः पापैस्तथैव सौम्यग्रहादृष्टैः या मित्र
गेर्के दृष्टे लग्नगते वा कुजे निषिक्तस्य गर्भस्य भवति मरणं शस्त्रच्छेदैः सहजनन्याः वलिभिर्बुधगुरुभृगुभिः दृष्टे ऽर्के वच विवर्द्धते गर्भः मासाधिपवलतुल्यैः
सौम्यैः संयुज्यते भावैर्मासि तृतीये स्त्रीणां दोहदको जायते वश्यं मासाधिपस्य भावैर्लग्नयोगादिभिश्चिन्त्यं अथ प्रतिमासं गर्भस्यावयवोत्पत्तिं मासाधि
पानाह यवनः आद्ये तु मासे कललं द्वितीये शिरस्तृतीये भवति स्वधात्वा अस्थीन्यं यस्त्वायु शिराश्चतुर्थे मज्जा च चर्माण्यपि पंचमे तु षष्ठे नखस्तु रोमनखा
सक्तश्चेतः स्थिताः सप्तममासि चेतः तृष्णाशनास्वादन मष्टमे स्यात्स्पर्शापराधो नवमे मतिश्च श्रोतोभिरुद्घाटितपूर्णदेहो गर्भो र्कमासे दशमे प्रसू
तः कुजास्फुजिज्जीवरवींदुसौरशशांकलग्नेंदुदिवाकराणां मासाधिपत्यं प्रभवांनचैषां जयो यथा ते ग्रहवत्कुर्वंति मासि लक्षणसंयुक्तो गर्भोस्तु
भः इत्युक्तं शुकजातके मासलक्षणसंयुक्तो गर्भः सुखमवाप्नुयात् वराहेण प्रथमद्वितीयमासयोर्विपर्यय उक्तः तद्दृशिष्टवाक्यानुरोधाद्विज्ञेयं
तथा च वसिष्ठः सितो वनेयाम रफूज्य सूर्यचंद्रार्कि सौम्योदयपेंदुसूर्याः मासाधिपाः स्युः क्रमशो दशैते निपीडितो नाशयति स्वमासमिति अत्रान्यो
न्यविरुद्धयोर्द्वयवनवसिष्ठयोरेकवाक्यता कथमर्हति परंतु वहुसंमतत्वाद्वसिष्ठोक्तपक्ष एव प्रमाणं तथा च गर्गः कललं प्रथमे मासि तस्य मासा
धिपो भृगुः द्वितीये मासि भूसूनुर्गर्भंपिंगास्ववीजवत् गर्भांकुरस्तृतीये स्यात्तस्य मासाधिपो गिरा मज्जास्थिसंभवो मासि चतुर्थे भास्करोधिपः पंचमे
मासि सोमेशस्त्वचस्तत्रापि संभवः सर्वांगसंभवः षष्ठे तस्य मासाधिपः शनिः ज्ञानेंद्रिययुतः पश्चात्सप्तमे त्वीश्वरो बुधः आधाने शो ऽष्टमे मासि स्यु
तृष्णासंभवो भवेत् ऊर्द्ध्वगो गर्भसंस्थश्च मासेशो नवमे शशी प्रसूतिर्दशमे मासि मासेशो भास्करो मतः यस्य मासाधिपो रिक्तो नीचो वास्तंगतो ऽपि वा
तस्मिन् गर्भः क्षयं याति प्रसवो ऽथ भविष्यति मासे तु विशेषमाह पराशरः द्रवत्वं प्रथमे मासि कललाख्यं प्रजायते द्वितीये तु घनः पिंडः पेशी प्रच्छन्नवद्बु

हो॰ म॰ रः पुंस्त्रीनपुंसकानांहिभागवस्थाक्रमादिमा तृतीये त्वंकुराद्यंगकरांघ्रिशिरसामतं अंगप्रत्यंगभागाश्च सूक्ष्माः स्युर्युगपत्तथा चतुर्थे व्यक्ततातेषांभागा
१३ नामपिजायते पुंसांशौर्यादयोभावाभीरुत्वाद्यास्तुयोषितां नपुंसकानांसंकीर्णाः भवंतीतिप्रचक्षते मातुश्चास्यहृदयंविषयानभिकांक्षति अन्येमातुर्म
अ नोभीष्टंकुर्याद्गर्भसमृद्धये मातुश्च द्विषयालाभात्तदार्त्तोजायतेसुतः प्रबुद्धंपंचमेचित्तंमांसशोणितपुष्टिता षष्ठेस्थिस्नायुनखरकेशरोमविविक्तता
बलवर्णौचापचितौसप्तमेत्वंगपूर्णता आधानमुखःखहस्ताभ्यांश्रोत्ररंध्रेपिधायसः उद्विग्नोगर्भसंवासाद्दस्तोगर्भालयान्वितः स्मरन्पूर्वानुभूतान्स
मानायानानुपातनानू मोक्षोपायमभिध्यायन्वर्ततेभ्यासतत्परः अष्टमेत्वक्श्रुतीस्यातामोजश्चैतन्यहृद्ध्रुवं शुद्धमेनंचरंतंचनिमित्तंजीवितमतं अ
ष्टमेनपुनर्गर्भस्यंचलंतंप्रधावति अतोजातोष्टमेमासिजीवेद्योथमशोभनः समयःप्रसवस्यास्यमासेषुनवमादिषु मासिमासिग्रहाणांशांतिः कर्त्त
व्यत्याहवसिष्ठः मासेमासेमासपादिग्रहाणांशांतिं कुर्यात्सूतिपर्युत्सवहोमैर्दानैःसज्जनानांचपाकैर्गर्भंसम्यग्रक्षयेत्पुत्रकामेति अथपुंस्त्रीनपुं
सकायोगानाहवराहः विषमर्क्षेविषमनवांशसंस्थिताःगुरुशशांकलग्नार्काः पुंजन्मकराःसमभेषुयोषिताः समनवांशगताः बलिनोविषमेर्कगु
रुनरंभ्रिस्ययसमगृहेकुजेंदुसिताः यमलंहिशरीरांशेष्विंदुजदृष्ट्यास्वपक्षसमंस्तत्स्पष्टमुक्तंसुकजातके रविजीवौयुग्मचंद्रनवांशस्थौवुधेक्षितौपुं
युगंमीनकन्यांशशिस्थौपुंस्त्रीयुग्मंवदेत् भौमेंदुशुक्राःमीनस्त्रीनवांशस्थावुधेक्षिताःस्त्रीयुगंयुग्मांशेगर्भेपुंस्त्रीयुगंभवेत् बृहज्जातकेद्व्यंगस्थाहि
स्वभावराशिनवांशस्थाइतिव्याख्येयं अन्यथास्वग्रंथेनऋषिप्रणीतग्रंथेनचविरोधःस्यात् वराहः लग्नाद्विषमोपगतःशनैश्चरःपुत्रजन्मदोभवति
निगदितयोगबलात् अवलोक्यविनिश्चयोवाच्यःनिगदितेतियत्रपुरुषयोगसंभवःस्त्रीयोगसंभवश्चदृश्यतेतदातत्रैवयोगकर्तृग्रहाणांबला॰ राम
धिक्यंतस्यैवनिश्चयोवक्तव्यइतिभावः अत्रविशेषःसुकजातके लग्नंत्यक्त्वाचविषमेपुत्रदोभास्करात्मजः समेकन्याप्रदःप्रोक्तोनान्यग्रहनिरीक्षित १३
इतिहोरामकरंदे एकोपिकेंद्रेगुरुवर्गोबलीयान्वांशेस्ववर्गेनरस्लेटदृष्टः स्तेनरंस्तोक्षगतोथकेंद्रेस्त्रीसंज्ञकःस्त्रीजनकस्तथैव अथक्लीबयोगः॥

सारावल्यां अन्योन्यं रविचंद्रौ विषमर्क्षसमर्क्षगौ मिथो वीक्षितौ इंदुजरविपुत्रौ दृष्ट्या विहीनौ नपुंसकं कुरुतः सूर्यसमराशिगत वक्रो विषमर्क्षगावलोक
यति त्रिषमर्क्षे लग्नेंदू कुजेक्षितौ खंडसंभवं कुरुतः बुधचंद्रौ कुजदृष्टौ विषमर्क्षसमर्क्षगौ तथा कुरुतः ओजनवांशकसंस्थौ लग्नेंदू सितार्कतनयेक्षितौ वा क्लीः
पश्यति वक्रः समभे सूर्यचंद्रोदयौ च विषमर्क्षे यद्येवं गर्भस्थः क्लीबो मुनिभिः सदा संदृष्टः ओजसमराशिसंस्थौ ज्ञेंदू खंडः कुजेक्षितौ कुरुतः नरभे विषम
नवांशे होरेंदु सितावधार्किदृष्टौ वा यथा ते हेजायास्थाने यदा मिश्रं च हिबुके तथा नपुंसको भवेज्ज्ञातो यदि रक्षेत्स्वयं हरिः एते क्लीबयोगाः पूर्वोक्तस्त्री
लाभभावे वक्तव्याः यदि तु तेष्वमेतेषां च संभवस्तदा तेषामेव बलवत्त्वं न तु जन्महोराप्रकरंदे बलाबलं विज्ञोक्ये ग्रहाणां योगकारिणां स्त्रीपुंसो निर्णयः क्ली
बयोगास्तु तदसंभवादिति अत्र द्वित्र्यादियुतयोगानाह कल्याणवर्मा लग्ने समराशिगते चंद्रे लग्ने निरीक्षिते बलयुतेन गणितविदा वक्तव्यं मिथुनं गर्भे।
संस्थितं नूनं लग्नेंदु समराशौ शशिसितयोर्विषमे गुरुवक्रसौम्येषु द्विशरीरेवा बलिषु प्रवदेत्स्त्रीपुरुषमत्रैव द्विशरीरांशकयुक्तान्ग्रहान्विलग्नं च प
श्यतींदुयुते कन्यांशे द्वय कन्ये पुंस्त्वमश्व निर्दिश्यते गर्भे मिथुनांशे कन्येका द्वौ पुत्रौ त्रितयमेवं स्यात् नृमिथुनं धनुरंशगतान ग्रहान्विलग्नं च पश्यतींदु
सुतः मिथुनांशस्थश्च यदा पुरुषत्रितयं तदा गर्भे कन्यामीनांशस्थान् विहगानुदयं च युवतित्रिभागगतः पश्यति शशिरगुतनयः कन्यात्रितयं तदा गर्भे।
एवं वराहः धनुर्धरस्यांतगते विलग्ने ग्रहेस्तदंशोपगतैर्बलिष्ठैः ज्ञेनार्किणा वीर्ययुतेन दृष्टेः संति प्रभूता अपि कोशसंस्थाः धनुर्धरस्यांतगते विलग्ने।
धनुर्लग्नस्यांतिमनवांशे अत्र प्रभूता पंच सप्त दश मिताः इत्युन्यत्तः गर्भाधानलग्नात्प्रसवमासज्ञानं पृथक्जातके गर्भाधानं च यो राशौ नवमे मासि सं
पन्ने स्थिरभे दशमे मासि द्वादशे चैकादशे च सः कस्मिन्राशौ चंद्रे सति प्रसवो भविष्यतीत्येतज्ज्ञानार्थमाह गार्गिः यावत्संख्ये द्वादशांशे शीतरश्मिर्यदा स्थि
तः तत्संख्येय स्ततो राशिजन्मदैः तत्र ते भवेत् अस्यार्थः मेषादिगणनया यावत्संख्ये द्वादशांशे चंद्रमा व्यवस्थितस्तद्राशिस्तावत्संख्यो यो राशिस्तत्र वर्त
माने जन्म वक्तव्यमिति अत्र चंद्रद्वादशांशप्रमाणेन २।३० कलात्मकेन १५० सकलस्यैव राशिरष्टादशशतकला १८०० लभ्यते तदा भुक्तद्वादशकला

प्रमाणेन किमित्यनुपातलब्धं चंद्रराशिभुक्तकलात्मकं ज्ञेयं ततोऽनुपातकलाकल्पनया चंद्रनक्षत्रं ज्ञेयमिति शेषः अन्ये तु तत्कालेंदुना यावत्संख्यो द्वादशभागोऽधिष्ठितस्तावत्संख्या राशिस्थे चंद्रे सति प्रसवकाले प्रसवो वक्तव्यः तथा च सारावल्यां यस्मिन्द्वादशभागे गर्भाधाने व्यवस्थितश्चंद्रस्तत्तुल्ये चैव प्रसवं गर्भस्य समादिशेत्प्राज्ञः समुद्रजातकेपि यत्तमे द्वादशेंऽतः सूतिस्तत्संख्यये विधाविति अत्र चंद्रलग्नयोर्मध्ये यो बलवान् तस्य द्वादशांशकवशेन चंद्रराशिर्ज्ञेयः इत्युक्तं शुकजातके लग्ने द्वयोर्यो बलवान्तस्य हि द्वादशांशकान्विते शशिस्थिते विधौ प्रसवः इति अत्र गर्गशुकाचार्ययोरेकवाक्यत्वात्सारावल्यां समुद्रजातकादिमते मूलं मृग्यं दिनरात्रिकालज्ञानं सारावल्यां तत्कालदिवसनिशासंज्ञः समुदयति राशिभागो यः यावानुदयस्तावांवाच्यो दिवसस्य रात्रेर्वा अत्रोदाहरणं तत्र प्रश्नकाले दिनमानं ३०।०० रात्रिमानं ३० चरस्पष्टचंद्रो राश्यादि ४।१०।२५।३५ लग्नं च ३।८।१२।२० अत्र चंद्रः सिंहराशौ पंचमे द्वादशांशे धन्वाख्ये स्थितः ततो धनुषः पंचमे मेषराशौ चंद्रे सति जन्मतः सामान्यज्ञानं तत्र नक्षत्रानयनार्थमनुपातः अत्र पंचमे द्वादशांशे भुक्तकलादिः २५।३५ ततो यदि द्वादशांशप्रमाणेन १५० राशिकला १८०० लभ्यंते तदाभ्याभिर्भुक्तकलाभिः २५ किमित्यत्र फलार्थं द्वयोः सार्धशतेनापवर्ते इति इच्छायाः २५।३५ गुणः गुणिते जाता ३०७ ततो नक्षत्रप्रमाणेन ८०० भक्ते लब्धं शून्यं अश्विनी तत्तच्चरणप्रमाणलिप्ताभिः ८०० भक्तिशेषं ३०७ लब्धं चरणो भुक्तः १ तेनाश्विनीद्वितीयचरणे जन्म इति ज्ञानं अथ कालज्ञानं तत्र कर्कराशी रात्रिबलसंज्ञकस्तेन रात्रौ जन्मेति ज्ञानं अथ घटिकादिज्ञानार्थमुपायः यदि त्रिंशद्भिरंशैर्निशाप्रमाणं त्रिंशत् घटिकात्मकं लभ्यंते तदा लग्नभुक्तांशैः ८।१२।२० किमत्रापि फलार्थयोस्त्रिंशतापवर्ते कृते लब्धं रूपं तेन भुक्ते गुणिते षलब्धमविकृतं अतो जाता रात्रिगतघटिका ८।१२।२० एवं सर्वत्र ज्ञेयं एवं कालज्ञाने चंद्रात् दिनज्ञाने च जाते जन्मोक्तं चिंत्यमित्याहुः कल्याणवार्मा दृष्ट्वाधानं प्रथमं प्रसूतिकालं सुनिश्चितं कृत्वा जातकविहितं च विधिं विचिंतयेत्तत्र गणितज्ञ इति अथ जन्मनि चंद्रज्ञाने प्रकारांतरं यदेकराशिसंस्थितौ भुजेश्वरक्षयाकरौ तदैव गुर्विणीवधूः प्रसूयते तु नान्यथा प्रश्नादासन्नप्रसवे कदाचिन्मिलति अथ प्रश्नलग्नात्कर्ममासज्ञानमुक्तं स

मुद्रजातके लग्नेशकांशुयावन्तस्तावन्तोगर्भमासकाः सुनफागाहलीसुकोयावद्धहेष्यतन्मिनंदति वराहः उदयतिमृदुभांशेसप्तमस्थेचमंदेयदि
भवतिनिषेकः सूतिरब्दत्रयेण शशिनितुविधिरेवद्वादशाब्देप्रकुर्यान्निगदितमिहचिंत्यंसूतिकालेपियुक्त्यामृदोः शनैश्चरस्यभांशेमकरांशे।
कुंभांशेवोदयतिलग्नवर्तिनीत्यर्थः समुद्रजातके लग्नेयमांशेमंदेस्ते निषेकश्चेत्समात्रयात् सूतिः कर्काशगतस्थेचंद्रेस्तेद्वादशाब्दकं इति।
अथजात्यंधादियोगाः सारावल्यां स्यानांयस्थानेरविशशिनौसिंहराशिगौलग्ने दृष्टौकुजसौराभ्यांजात्यंधः संभवति तत्र आग्नेयसौम्यदृष्टौ।
रविशशिनौबुहुदेस्करांकुरुतः नयनविनाशोपियथातथाभुवनांशप्रवक्ष्यामि व्ययभवनगतश्चंद्रोवामंचक्षुर्विनाशयति हीनः सूर्यस्तथैवस
व्यंशुभदृष्टोयाप्यतांनयति याप्यतामपूर्णफलतां अत्रराशिषुवक्ष्यमाणेष्वंशांशेषुयदार्कचंद्रौद्वादशस्थौभवतस्तदानेत्रनाशोवश्यंभवति
तद्दशायामन्यथानेत्रपीडाव्रणादिज्ञेयमित्यर्थः क्रूरे गृहसंबंधियतशशिनिवृषेभौमसौरसंदृष्टेमूकः सौम्यैर्दृष्टोवाचंकालांतरेवदिति अत्रवि
शेषोगर्गजातके कुलीरालिझषांतस्थः पापश्चंद्रेवृषस्थितेमूकः पापेक्षितेसौम्यैश्चिरेणालभतेगिरं मिश्रदृष्टेग्रहबलान्मूकोमूकोचिरादिति।
क्रूरेषुराशिसंधिषुशशिनिचसौम्यैरवीक्षितेतुजडः बुधनवभागसंस्थोशशीनीचेमंदतःस्यात् सौम्यत्रिकोणसंस्थेलग्नाच्छेषग्रहैर्बलही
नैः द्विगुणास्यपादहस्तोयोगेस्मिन्नाहितोगर्भः त्रिकोणेनवपंचमे यदाहगर्गःबलहीनैर्ग्रहैःसर्वैर्नवपंचमगेविधौ द्विगुणाघ्रिशिरोहस्तोभव
त्येकोदरस्तथैवतेति .वामनकोमकरांत्येलग्नेरविचंद्रसौरिभिर्दृष्टेशशिनिविलग्नेकर्किणिकुजार्कदृष्टेतथाकुब्जः मीनोदयेचदृष्टेकुजार्कश
शिभिः पुमान्भवतिपंगुर्व्यर्थाभवंतियोगाः सौम्यग्रहवीक्षिताः सर्वेभगवमागार्गिः लग्नद्रेष्काणगोभौमः सौरः सूर्येंदुवीक्षितः कुर्यादशिरसंतद्व
त्यंचमेवाहुवर्जितं विपादंनवमेस्थानेयदिसौम्यैर्नवीक्षितः एतेचसर्वयोगाजन्मकालेपिविचारणीयाः जन्मकालोक्ताश्चात्रचिंत्याः तदुक्तंसारा।
वल्यां इत्याधानविधानंप्रसूतसमयेपियोजयेद्योग्यंआधानेतत्रोक्तंप्रसूतिविहितंतदपिचिंत्यं इत्याधानाध्यायः अथसूतिकाध्यायः हृदय

वनः वाच्यं शिशोर्जन्म पितुः परोक्षं सुधाकरः पश्यति चेन्न लग्नं चरस्थितेऽर्केऽष्टमधर्मगे वा विदेशसंस्थे पितरीह वाच्यं अत्र चंद्रे लग्नमपश्यति स्व
देशस्थस्यैव पितुः सन्निधौ जन्म वाच्यं चरराशिस्थेऽर्के नवमाष्टमस्थे विदेशस्थे पितरि जन्म वाच्यं अस्मिन्योगे पि लग्नं चंद्रदृष्टिवर्जितं ज्ञेयमित्युक्तं
शुकेन चरराशिगते भानौ भवमाष्टमसंस्थिते शिशोः पिता विदेशस्थो लग्नं चंद्रेण नेक्षितमिति लग्नस्थिते वा सुरनाथपुत्रे या मित्रसंस्थेऽप्यथ।
वा महीजे चंद्रेऽथवा सूर्यमहीजमध्ये विदेशसंस्थे जनके बभूव शुकजातके दिनेऽर्ककुजसंदृष्टे रात्रौ मंदकुजेक्षिते पितुः परोक्षे वक्तव्यं जन।
नं जातकस्य च सूर्यमंदौ चरर्क्षस्थौ भौमेन युवतौ क्षितौ परदेशे पिता तस्य मृतो वाच्यो विनिश्चयात् भाग्यबंधुगतौ पापौ लग्नेशे बलवर्जिते॥
सूतिकाले पिता दुःखी शिशोरंत्याष्टरिष्फगे एके द्वादशाष्टमगे पापे लग्नेशे हीनबले जन्मनि मातादुःखयुता वाच्येत्यर्थः अर्कांशकस्थिते मं।
देऽर्केणावनिरीक्षिते जन्मकाले पिता रोगी कुजदृष्टेऽथ जायते वागीशे नीचसंस्थे च चंद्रे राश्यंशसंधिगे मूको वापि जडो वापि सौम्यैः पापसम
न्वितैः सूर्याच्च पंचमे द्यूने नवमे क्रूरखेचराः क्रूरैर्दृष्टाः स्थिरराशौ स्वदेशे बंधनं पितुः चरेऽन्यदेशे मार्गे च द्विः स्वभावे नबंधनमिति अस्मिन्नेव।
योगे सूर्यात्पंचमसप्तमनवस्थानपापानां पापदृष्टिगतत्वमपि प्रयोजकः पापदृष्टिश्च न प्रयोजकेत्याह वराहः क्रूरर्क्षगतावशोभनौ सूर्याद्द्यूननवा
त्मजस्थितौ बद्धस्तु पिता विदेशगः स्ववा राशिवशात्तथा पथीति अत्र वराहमिहिरेण राहुकेतोर्निरासार्थमेव द्विवचनं दत्तं पूर्वोक्तशुकजातक
वचने तु बहुवचनत्वाद्राहुकेत्वोरपि ग्रहणं कृतमिति ज्ञेयं सारावल्यां शीर्षोदये विलग्ने मूर्ध्ना प्रसवोऽन्यथा चरणैः उभयोदये च हस्तैः शुभदृष्टे।
शोभनोऽन्यथा कष्टः अयं मूर्ध्नादिप्रसवे जन्मकाले निर्णयो गर्भजातके शिरसा प्रसवो ज्ञेयः सुमयः स्कंधदर्शनात् अंघ्रिभ्यां प्रसवो कालो। राम
जंघासंदर्शनाद्भवेत् कराभ्यां प्रसवः कालो मणिकबंधस्य दर्शनात् मणिन्यः लग्नाधिपे शकपनौ लग्नस्थे वक्रिणि ग्रहे चापि विपरीतगतो मो १५
क्षो वा योगगर्भस्य संक्लेशः सारावल्यां भवनांशसदृशे देशे प्रसवो ज्ञेयः सदा त्र युवतीनां भिग्नगृहांशे वर्गे निचरराश्यंशेन तथान्यगृहे स्वगृह

नवांशे लग्नेस्य गृहेन्यस्मिन्नपीन्दुः स्वचलग्ननवांशयोर्मध्ये यो बलवान् स्वराशिस्वरूपोक्तप्रदेशे जन्म वाच्यं तत्र स्थिरे स्वगृहे जन्म चरे न्यगृहे द्विः
स्वभावे मार्गे सर्वस्मिन्वांशोस्वनवांशे स्वगृहे जन्म वाच्यं शत्रुनवांशे शत्रुगृहे जन्म वाच्यमित्यर्थः पितृमातृगृहे वर्गेत स्वजनगृहे शुक्रलयोगात् पितृमा
तृगृहे प्रागुक्तो तद्वलात् पितृमातृगृहेषु प्रसूतिर्वक्तव्या तत्रार्कशन्योरन्यतरो यदि बलवान् भवति तदा पितृगृहे जन्म पितृव्यस्वसृपितृव्यादिगृहे
प्रसूतिः यदि च चंद्रशुक्रयोरन्यतरो बलवान् भवति तदा मातृगृहे मातृस्वसृमातुलादिगृहे प्रसूतिर्वक्तव्या प्राकारनदीषु च प्रसवो नीचाश्रितैर्भौ
म्यैः नेक्षते लग्नेंदू यद्येकस्थौ तदा दृष्टव्यां अत्र बहुवचनात् आदिभिरेकराशिगैर्ग्रहैर्लग्नेंदू न दृष्टौ तदा अटव्यां विजने जन्म अर्थात् दृष्टौ जनाकीर्णे
जन्म वाच्यं अत्रैकराशिगैः सौम्यैरेव योगो भवतीत्युत्पलः सलिलभलग्ने चंद्रो जलराशौ वीक्षते थवा पूर्णः प्रसवं सलिले विंद्यादुदयद्वा
मगश्च यदा तत्र कर्कमीनमकरपश्चिमार्धलग्नगं पश्येवस्थिते चंद्रे जले जन्म अथवा पूर्णो दुर्जलभं लग्नगं पश्यति तदापि जले जन्म अथवा ज
लराश्याबुदयगते चंद्रो दशमचतुर्थलग्नगतस्तदा जले जन्म सौम्यलग्ने पूर्णो स्वगृहगते शशिनि सलिलसंपाते. पातालस्थे च शुभे जले जेलग्ने
स्तगे शशिनि अत्र स्वराशिगे पूर्णो दोबुधे लग्नगे अन्यैः सौम्यैश्चतुर्थगैः सलिलपातेस्विलं जलं तत्र संपातः संवधीयस्तेनिनौकादिके जन्म वाच्यमत्र
त्वबुधात् शुक्रस्य चतुर्थगत्वासंभवात् चतुर्थगो गुरुर्ज्ञेयः उक्तं च समुद्रजातके पूर्णो रोः स्वगृहे ज्ञे गे जीवे तुर्ये तु रामत इति अथवा जललग्ने स
प्तमगे दोनौ कायां जन्म वाच्यं वृश्चिककुलीरलग्ने सौरे चंद्रेक्षिते त्वर्वटे भवति प्रसवः स्त्रीणां वदंतिय वना सहमणित्यैः अवटेगर्ते रविजे जल
लग्ने क्रीडायानेबुधेक्षिते प्रसवः रविणादेवागारे तथोखरेचैवचा द्रेणारण्यभवस्लग्ने गिरिवप्रदुर्गे तथानरविलग्ने रुधिरेक्षिते श्मशाने।
शिल्पिकनिलये च सौम्येन सूर्येक्षिते गोनृपदेवे वासे शुक्रेदुजाभ्यां रमणीयदेशे सूर्यस्य दृष्टे द्विजवन्हिहोत्रे न रोदये संप्रवदंतिसूतिं अत्र नरा
शिगे शनौ भौमादि दृष्टे श्मशानादौ जन्म वाच्यं उक्तं च समुद्रजातके पुलग्नगं यमं पश्येदर्कादिश्चेन्यगो कुले चरेश्मशाने शिल्पीय गृहे वन्हि गृहे वा।

हो॰र॰ रे जायांत्रिकोणसंस्थैः क्रूरैरानंदवर्जितः प्रसवः दशमचतुर्थगतैः सौम्यैः संपन्नयो वहुलाः क्लेशामातुः क्रूरैर्वर्ध्यस्तगैःशशांकयुक्तैर्वा चंद्रात्सप्तमरा-
१६ शौपापामरणायसंदिष्टाः चंद्राद्दशमेभानुमातुर्मरणंकरोतिपापयुतः शुक्रात्पंचमभवनेसौरियुतोथवादृष्टः कुजसौरयोस्त्रिकोणेचंद्रेस्तगतेवियुज्य
तेमात्रा दृष्टेसुरेंद्रगुरुणासुखान्वितोदीर्घजीवीच अत्रैकराशिरयोगभौमशन्योर्योगः ज्ञेयः उक्तंचसमुद्रजातके एकस्यांवर्धयोः कोणःस्तेचंद्रे।
विसृज्यतेवयाइति चंद्रात्त्रिकोणराशौरविजोमातुर्वधंदिशति रात्रौशुक्रात्तथैवदिवसेभौमः पापेनसंदृष्टः म्रियतेपापैर्दृष्टे शशिनिविलग्नेकु
जेस्तगेत्यक्तः लग्नस्तलाभगतयोर्वसुधासुतमंदयोरेवं अत्रलग्नेचंद्रेपापैर्दृष्टेसप्तमैकादशस्थयोर्भौमशन्योर्मात्रात्यक्तोपिम्रियते उक्तंचस्वल्पे।
जातके लग्ने ज्ञे पापसंदृष्टेवसुधासुतमंदयोः लाभास्तसंस्थयोर्वात्तोमात्रात्यक्तोविनश्यति पश्यतिसौम्योवलवान्यादृग्गृह्णातितादृशोजातः
शुभपापग्रहैर्दृष्टेपरैःसंगृहीतोपिम्रियते पूर्वोक्तयोगद्वयेचंद्रेसवलशुभग्रहदृष्टेतादृग्ब्राह्मणाद्विवर्णोमात्रात्यक्तंवालंगृह्णाति उक्तंचभौमजा
तके मातृसंत्यक्तयोगेषुचंद्रं पश्यंतियेशुभाः ग्रहवर्णसमोवालंगृह्णातिनियतंनरः शुभपापदृष्टेचंद्रेपरहस्तगोपिवालोम्रियतेज्ञति एकां।
शावस्थितयोर्यमारयोस्त्यज्यतेमात्रा सर्वेष्वेतेषुयोगेषुयदाशशीसुरेज्यसंदृष्टः भवतितदादीर्घायुर्हस्तगतः सर्ववर्गेषु लग्नात्सप्तमभुवने
भौमेरविपुत्रवीक्षितेनिजभं यादृक्पश्यतिसौम्यस्तत्तुल्यगुणंसुतंसमाधत्तेपितृजननीसादृश्यंरवेशशांकस्यवलयोगात् सिंहाजगोभिरुदये
सुतोनालेनवेष्टितोजंतुः लग्नेकुजेथसौरेराश्यंशसमानगात्रेच राश्यंशेति राशिर्लग्नंतत्रयद्राशिनवांशस्योदयोभवतिसराशिः कालपुरुषस्य
यस्मिन्नंगेप्यवस्थितस्तस्मिन्नंगेनालवेष्टितइत्यर्थः सूर्यश्चतुष्पदस्थः शेषाद्विशरीरसंस्थितावलिनः कोशावेष्टितदेहौयमलौखलुसंप्रसूयेते॥ राम
गर्गः भौमइष्ककाणगेचंद्रेसौम्येक्षयधनस्थितैः सर्पस्तद्वेष्टितस्तद्वत्पापलग्नेविनिर्दिशेत् अथजारजातयोगः होरामकरंदे नप्राग्लग्नंपश्यतींदुंच १६
जीवः सूर्योपतेशीनरश्मिंचयद्वा सार्कंचंद्रेपापयुक्तेथवासान्निः संदिग्धंजारजातस्यजन्म अत्रसूर्येंदूएकत्रपृथक्स्थौवापापयुक्तौगुरुणा

नदृष्टो जारजातजन्म करो इत्युक्तं। शुकजातके नपश्यति गुरुश्चंद्रं लग्नं च परजातकः। सार्के चंद्रे नक्षितिजे जीवं सूर्ये द्वापापसंयुतौ एकस्थौ वा पृथक्स्थौ वा नेः
क्षिते गुरुणा तथेति योगांतरमाह गुणाकरः नीचस्थितश्चंद्रदिवाकरे ज्याकुर्वेत्यमी जन्मनि जारजाते लग्नेऽथवा सूर्यसुतेन दृष्टाः सौम्यैश्च शुक्रो
दय शीतभासः तिथिवारसंयोगेन जारजातयोगमाह तातमिश्रः स्वातौ द्वितीया रविवारयोगे सोमात्मजे सप्तमि रेवतीषु स्यात् द्वादशी वा संवमंद
वे जारेण जातं प्रवदंति बालं. नवमस्थो गुरुर्यत्र धने चंद्रार्कमंडले अन्यजातः सवित्ते यो योगे स्मिन्यततेध्रुवं चंद्रारभानवः षष्ठे गुरुः पंचमगो य
दि योगे स्मिन्नात्र संदेह स्यान्यजातः सउच्यते जातकोत्तमे अर्यम्णाभे स्याद्द्वितीया सर ऽष्टमी विश्वे चतुर्थी गुरुवासरं च अहिर्बुध्नभे भौमदिने चतुर्दशी।
स्याज्जारजातस्य च जन्मकाले दिनांते च तिथिशांते लग्नशांते प्रसूतिषु वारसंपाते च यो जातः सोऽन्यजातः प्रकीर्तितः भग्नपादर्क्षसंयोगा द्वितीया द्वादशी यदि
सप्तमी चार्कमंदारे जारजो जायते ध्रुवं अत्रापवादमाह गार्गिः गुरुक्षेत्रगते चंद्रे तद्युक्ते चान्यराशिगे तद्द्रेष्काणे तदंशे वा न परैर्जात इष्यते शुकजातके सौम्य
राश्यंशगे चंद्रे जारजातयोगापवादः उक्तः सौम्यराश्यंशगे चंद्रे गुरुराश्यंशगे पि वा जारजातस्य योगे पि न परैर्जात इष्यते अथार्कलग्नद्वादशांशवशे।
नदीपज्ञानमुक्तं गर्गेण लग्नस्य प्रथमे भागे सूर्ये प्राच्यां प्रदीपकः द्वितीये च तृतीये च भवेद्दीशानकोणगः चतुर्थे चोत्तरे वायोः कोणे पंचमषष्ठगे सप्त
मे पश्चिमायां च नैरृत्यां नवमेऽष्टमे दशमे र्के दक्षिणस्यामग्निकोणे च दीपकः द्वादशैकादशे प्रोक्तो दीपाभावः स्वयंभुवा अन्यच्च तत्रैव चरे लग्ने क
रे दीपः स्थिरे तत्रैव संस्थितः द्विस्वभावे तथा लग्ने करेण परिचालितः द्रेष्काणे प्रथमे चंद्रे दीपः पूर्णो द्वितीयके अर्धपूर्णो हि तैलेन तैलहीनस्तृतीयके
सारावल्यां चंद्रस्य पूर्णत्वे दीपपूर्णत्वं क्षीणत्वे तैलक्षयत्वमुक्तं तत्र यद्युक्तिसद्ध्यं यतोऽमावास्यायां सर्वस्याधकारे जन्मसंभवः स्यात् लग्नभुक्तानुमानेन द
ग्धवर्तीं विनिर्दिशेत् तनुस्थानगतश्चंद्रोप्यष्टमस्थो यदा भवेत् बालस्य जन्मसमये दीपस्योपरि पूर्णता वर्तिपूर्णस्तु लग्नराशिवर्ण सदृश एव वाच्यः॥
लग्नस्य योत्र वर्णो निर्दिष्टस्तेन वर्तिरादिश्यते इति मणित्थोक्तेः सारावल्यां बलवति सूर्ये दृष्टे बहुप्रदीपान्वदेत्कुपुत्रेणान्यर्क्ष्यगतवीर्ये स्नेहो ज्योति

त्तशीर्भवति भौमार्कारहितैरन्यैर्ग्रहैर्बलहीनैः सूतौ तृणौर्ज्योतिरिति वर्तिन्त्वेषा कृतसौरांशे जलजांशे चंद्रोऽर्कजसंयुतोऽथवा हिबुके तद्दृष्टे वा कुर्याज्जन्म सि
प्रसवं न संदेहः एतेषां च योगानां बलवत्तिसूर्ये दृष्टे इत्यसंयोगापवादकः यदि च एतेषु योगेषु चंद्रोऽरविदृष्टः संयोग्यपवाद एव तथा च यवनेश्वरः सौ
रांशकस्थे शशिनि प्रलग्ने जले जलर्क्षांशकमाश्रिते वा स्वांशस्थिते सौरविलोकिते वा जातस्तु मिश्रे यदि नार्कदृष्टः अथ गृहस्वरूपं होरामकरंदे जीर्णं
काष्ठयुतं रवौ शशिगृहे स्यान्नूतनं मंदिरं दग्धं वा क्षितिभूरिशिल्पिविहितं सौम्ये दृढं वा कुजे कांतं चित्रयुतं नवं भृगुसुते जीर्णं भवेत्सूर्यजे द्वारं केंद्रगताद्
थातिबलिनो लग्नस्थतो वा भवेत् विशेषाहोरासारे एवं द्वारं स्थिरांशे तु द्व्यंशे द्वारद्वयं भवेत् चरांशे च बहुद्वारं सूतिका संभवं वदेत् पूर्वपदस्यार्थः रव्या
दिग्रहमध्ये यः सर्वापेक्षया प्रबलस्तादृशं सूतिकागृहं वक्तव्यं बलिनि चंद्रे शुक्लपक्षे उपलिप्तं सूतिकागृहं वक्तव्यं तथा च यवनः संवृद्धे नाथ चंद्रमसोप्य
लिप्तमिति विशेषमाह वृद्धयवनः गृहं शशांके नसुसंस्कृतं भवं मनोज्ञरूपं विबुधान्वितं च सत्सूत्रयुक्तं मणिकुट्टिमान्वितं षड्वर्गशुद्धेन च तुंगगेन भौ
मेन दग्धं स्वनवांशकस्थे परांशकस्थे शिथिलस्वभावं क्रूरैस्तु युक्ते यदि पापदृष्टे सौम्येक्षिते वा धनधान्ययुक्तं २ सूर्येण चित्रं बहुगैरिकाद्यैः प्रभासमेतं च
दृढभूमिकं च एकत्रसंस्थं च परत्र शीर्णं पापेक्षिते वा तपनस्वभावं ३ बुधेन चोक्तं बहुवेशयुक्तं पट्टावृतं भूरिधनाढ्यमेव शुचिप्रगल्भैः पुरुषैः समेतं विचित्र
रूपं प्रभया समेतं ४ जीवेन नानाविधरत्नयुक्तं सुभूरिशालं बहुमंडलाढ्यं वितानपत्रध्वजवस्त्रसंघैः प्रमंडितं धातुरसैर्विशालैः ५ स्वभावरम्यं सुवि
दृश्यलोकं मनोरमं स्फाटिककांचनाढ्यं समं विशालं सुविभक्तमार्गं विचित्ररूपं प्रवदंति शुक्रे ६ जीर्णं कुचेलैर्मनुजैः प्रयुक्तं रक्तान्वितं भानुसुते किलाथ राम
भवेद्गृहं कंटकसंप्रयुक्तं रौद्रं करालं विकृतं बलाढ्यं ७ अंशाधिनाथे स्वनवांशसंस्थे मित्रांशगे सौम्यखगांशके वा परांशकस्थे त्वतिशीर्णमुक्तं मिश्रांश १७
के मिश्रमिति ब्रुवंति गृहद्वारनिर्णयमाह द्वारमिति जन्मकाले यः केंद्रस्थो ग्रहो भवति तस्य या दिक् तद्दभिमुखं द्वारं वक्तव्यं यदि च केंद्रे भूयांसस्तत्र
न्मध्ये यो ऽतिबली तद्दभिमुखं द्वारं यदि च केंद्रे कोऽपि ग्रहो नास्ति तदा लग्नराशिदिगभिमुखं द्वारं वक्तव्यं उत्पन्नस्तूलनयोर्द्विरंशास्तद्दभिमुखं सूतिका

गृहद्वारमिति मिश्रमिश्रयोर्नेः संवादेनानुभूतत्वाच्चवृत्तमेव यद्वा शिद्धादशांशस्तद्वाशिदिग भिमुखं द्वारं वक्तव्यमित्याह सारावल्यां स्वलग्नवशादेव गृहद्वा
रमुक्तं वा सगृहे गृहद्वारं दिक्पालकादृष्टे द्वलोपेतान् भवनगृहसंयोगे प्रतिवेश्मनिश्चितनीयास्तु देवालयां वुमावक्वोशविहाराद्यावकरस्थाननिद्राग
हं च भास्करं शशिकुजगुरुभार्गवार्किबुधयोगात् अत्र विशेषो जातककविंतामणौ तनुभात्पंचगृहं पश्चिमस्थलं धनभे गृहांगणमिहास्तभे मुखं स्वं चले।
सस्म्नासु रसभूरुहोगराजलेपुष्पभूरुहो विधौ बुवते सवीर्यान् अथ कंटकी भिरीक्षितसुते सितजलस्थेम्प्रवटः शनौ सु रगृहं गुरौ स्मृतमिति अवटो गर्तः
अत्र गृहांगणपश्चिमादिस्थले सुबले केन्द्रेमः सारवृक्षान्वदेत् चंद्रे दुग्धवृक्षान् भौमे कटुकान् कंटकान्वाप्यथ बुधे फलयुतान् शुक्रे पुष्पवृक्षान् शनौ वा
री चिकवृक्षान् तत्र वदेदिति विशेषः अथ समस्तवास्तुनिकुत्र सूतिकागृहद्वारमिति निर्णयार्थमाह वराहः मेषकुलीरतुलालिघटैः प्रागुत्तरतो गुरुसौम्य
गृहेषु पश्चिमतश्च वृषेण निवासो दक्षिणभागकरौ मृगसिंहौ तस्मिन्नेव सूतिकागृहे कस्मिन्न देशे शयनमिति ज्ञानार्थमाह द्वौ द्वौ क्रमान्नेष मुखाश्च
तुराशयः स्युः प्राच्यादितो हि तनवश्च विदिक्षु गेहे शय्यासु तद्वदिह षड्भिनवान्त्य पादाः मंगस्ततैर्भवति वान तिहि देहैः अयं भावः क्रियमुखाः मेषाद्याराशयः क्र
मेण दिशासु ज्ञेयाः तद्यथा मेषवृषौ पूर्वस्यां मिथुनः आग्नेय्यां कर्कसिंहौ दक्षिणस्यामित्यादि तथा च लग्नराशिर्यद्दिग्गतो भवति तद्दिग्भागे शयनं वक्तव्यं श
य्यास्वपि तद्वदस्तु वत् शय्यास्वपि च वदेत् परं तु लग्नात्षट्त्रिनवान्त्यराशयः शय्यायाः पादाः प्रकल्प्याः तथा च येन लग्नेन प्रसवस्तद्दिशि शय्यायाः शिरः।
लग्नात्तृतीयं सव्य पाद दक्षिणपादः द्वादशो वामः षष्ठस्तु पश्चाद्दक्षिणः नवमो वाम इत्यर्थः प्रयोजनमाह भंगः स्वलैरिति यत्र पापग्रहं तत्र तन्नस्त दृशउपा
घातो वक्तव्यः यत्र हि स्वभावराशयोपि तत्र विनतर्क अत्र यदि स्वोच्चत्रिकोणमित्रर्क्षस्थः पापो भवति न तदाशुभफलकरः हि स्वभावराशयोपि यद्दिक्षु
भस्वामियुत दृष्टा न भवंति न वेदविनतत्वमित्युपलक्ष्या व्याख्यानात् उक्तंच जातकचिंतामणौ क्रूरैः स्यादुपघातः स्वोच्चादिगतैर्न चैवायं स्वस्वामिसौम्य
दृष्टैः हि शरीरैर्नो विनतत्वं च सारावल्यां स्वच्छ स्थितिभवनद्युतिसमानि तत्र चिन्हानि आभरणानि च विंद्यात् शुभदृष्टियुतानि दैवज्ञः नीचस्थैर्भूशयनं -

हो॰र॰ चंद्रेप्यथवासुखेवित्लिग्नेवास्वोच्चेदशमजीवेद्वित्रिचतुर्भूमिकेगृहेप्रसवः मंदर्क्षांशेः शालंचतुर्थदशमस्थितैःसौम्यैः वराहेण धनुषिसवलेत्रिशालंद्विशालंम
१८ न्येषुयमलेषुइत्युक्तंद्विभागराशिमंडलकेंद्रेषुखगेषुतच्चालानुषमृगहयवलवर्गगृहंद्विशालंत्रिशालंवबालस्यातरिक्षादिके जन्मज्ञानमुक्तं होराप्रदी
पे धनुर्मीनेचकन्यायांमिथुनेचविशेषतः अंतरिक्षेभवेज्जन्मशेषभूमौविनिर्दिशेत् जन्मसमयेबालस्यरोदनज्ञानमुक्तं तत्रैवमेषत्रयेधनुः सिंहेवा
लोच्चैः खलुरोदिति अर्धशब्देनमकरेकन्यायांकुंभभेतथातुलालिमीनेरुदनमल्पंचचिरकालतः लग्नचंद्रमसोर्मध्येवाव्यवलिविवेकृतः इतिअथबालस्य
गौरवर्णादिज्ञानं जन्मप्रदीपे जीवेंदुभूमिपुत्राणांद्रेष्काणेगौरवर्णता कृष्णत्वंमंदद्रेष्काणेशेषाणांचैवमिश्रिता वर्णास्तुजातिकुलदेशानुमानतोह्यिय
इति अथोपसूतिकाज्ञानंसारावल्यां शशिलग्नविवरयुक्तगृहेस्तुल्याः सूतिकाश्चवक्तव्याः अनुदितचक्रार्धयुतेरंतर्वहिर्नान्यथात्वेके लक्षणरूपविभूष
णयोगास्तासांशुभैर्योगात् क्रूरैर्विरूपदेहाः लक्षणहीनाश्चरौद्रमलिनाश्च मिश्रेमध्यमरूपावलसहिते सर्वमेतदवधार्यं अत्रचंद्रमारभ्यलग्नप
र्यंतंगणताकर्त्तव्या तदंतर्वर्तिनोग्रहाः अनुदितेदृश्यचक्रार्धेयदिभवंति तदातावंत्यउपसूतिकागृहमध्येवक्तव्याः अन्यथादृशचक्रार्धेयदिभवंति
तदागृहाद्बहिर्वाच्याः लग्नादारभ्यसप्तमपर्यंतंअदृश्यचक्रार्धमपरंदृश्यं यदाह वराहः शशिलग्नांतरसंस्थाग्रहतुल्यप्रसूतिकावक्तव्या उदगार्धेऽभ्य
तरगावाह्याश्चक्रस्यदृश्येर्धेसमुद्रजातकेपियावंतः शशिलग्नांतर्ग्रहास्तत्संख्यसूतिकाः उत्तरेमध्यगावाह्येवाह्यास्तत्समलक्षणाः सूर्यजातके श्रीस
र्येपि चंद्रलग्नांतरस्थैर्हिग्रहैर्वाच्याश्चयोषितः मध्येषट्केमध्यगास्ताः वाह्येषट्केचवाह्यगाः इतिवहुसंमतत्वादयमेवमुख्यः पक्षः लग्नगेचंद्रेविशेषश्च
द्रिकायांयोषितोलग्नगेचंद्रेतिस्रः स्युः सूतिकोद्भवाइति अन्येतुउदगर्धस्थैर्ग्रहैर्वाह्याः सूतिकाः पूर्वार्धेगृहेमध्यगाइति तदाहजीवशर्मा उदयशशिमः
ध्यस्थैर्ग्रहैः सुरूपसूतिकास्तत्र उदगर्धस्थैर्वाह्यादक्षिणगैरंतरंतेयाइति लग्नेतराशपार्श्ववायावंतः खयापिनः धनस्थाव्ययगायेच्चतावतीः सूतिका एभः
वदेदिति गृहस्थेपित्रिसूतिकायोगयोर्विशेषः ज्ञानप्रकाशे तुर्येदश्वासूनिरंतरंतुल्याः स्वेशेस्वस्येतन्यितातद्गृहेस्त्रीति अत्रायुर्दायोक्तविधिनाद्वित्रिगु १८

एत्वावलग्नयुग्ने बहुलग्नयामध्यग्रहाभावएतयोगमवचायाः जन्मलग्नवशादुपसूतिकाज्ञानमुक्तमथान्यमतेन स्वमते बहुकावलाः दृष्टिवशुभयोनिशीलस्त्यान्य
संभवकारणाश्चधनुः कर्कटयोरपि अन्येऽलग्नेभवेत्रीणिसूतिकायाः प्रमाणकं राजादिगृहेबहुस्त्रीसंभवेलग्नवशेनउपसूतिकाज्ञानं स्वनंदाः ९१मेषतुलयो
स्त्रिनंदाः ९३ वृषकन्ययोः सप्तनागाः ८७ त्रिनंदाश्च ९३ प्रोक्तामिथुनसिंहयोः नंदांकाः ९९ कर्कमृगयोर्विज्ञेयाः सूतिकाः स्त्रियः बहुस्त्रीसंभवेवाच्या
नृपादीनांगृहेबुधैरिति अत्रविशेषोजातकोत्तमे युग्मायुग्मविलग्नस्यवशात्प्रसव कारिणी विधवांसधवांज्ञेयाः क्रमात्तत्त्वविचक्षणैः लग्नादष्टमगः
पापः पापादष्टमगः शशी उपसूतीभवेद्रंडारंडाचैवोपसूतिका पंचमेसूर्यपुत्रश्चशशिशुक्रौचकर्मगौ तत्रैकाकन्यकाज्ञेयाशिशोर्जन्मनिनिश्चितं च
तुर्थस्थानगश्चैवरश्चतुर्थस्थानंगोबुधः तत्कालेजातबालसूतिकांप्रकुरुतेसदा एकःपापोयदालग्नेपापश्चैवरसातले ज्ञेयानालांछितोबालोल
ग्नेनांकितोपिवा इंदुपुत्रेधनस्थेचद्वादशेचनिशापतौ सूर्यपुत्रेबलस्थेचजातोबालःषडंगुलः नवमेभूमिपुत्राच्चयोगेजीवेंदुपुत्रयोः केंद्रस्थाने
यदासूर्योजातोबालःषडंगुलः अत्रत्वजवृषमिथुनकुलीराः पंचमनवमैःसहेंद्राद्याः इत्यादिनाबालशिरादिकज्ञानं सबलग्रहोक्तरसभोजना
नंतरंमातुः प्रसवोवाच्यः इतिविशेषः पितृमातृशुभाशुभज्ञानमुक्तंसारावल्यां क्षीणेशशिनिसपापेमातान्म्रियतेरवौपिता तद्वत् वलिभिर्दृष्टेश्चैव्यौ
धिःसौम्येःशुभंभवतिविपुलविमलमूर्तिः स्वोच्चगोवास्ववर्गगुरुसितयुतदंदुर्वोधनेनाप्यदृष्टः अतिशुभफलदातापंचमेवापिमातुःपितुरपिखलुतद्वज्ज्ञा
स्करः सर्वदैव जातकसर्वस्वे चंद्रात्त्रिकोणगेसूर्येमातुलोम्रियतेध्रुवं कुजेत्रिकोणगेशुक्रांत मातृमाताऽशुभेक्षिते क्रमेणपितृमातृसहोदरबंधुपत्नीः
कलत्रमथदासजनोविचिंत्यः कर्मास्थितिश्चशशिसुवाधिपणासुखंचप्रोक्तादिनित्वथापरायगनैर्बलेनत्वगृहोच्चत्रिकोणास्थैः सुखमेषापथोदित
एतैश्रीनीचस्थितैः शत्रुगतैस्तनहिशरीराकारादिकंप्रणाचिन्हज्ञानंतनुभावविचारेनिरूपयिष्यते इतिश्रीमद्दैवज्ञपंडितदामोदरात्मजबलभद्र
विरचितेहोरारत्नेराशिग्रहस्वरूपनिषेकजन्माध्यायःप्रथमः ॥ १ ॥ • इतिसूतिकाध्यायः अथजन्मनिनिषिद्धकालाः सशांतयोलिख्यंतेतत्रनिषि

इत्थभुक्तमूललक्षणमाह नारदः योज्येष्ठामूल अंत्यमूलविचारजातकोभरणे मूलंविरुद्धाचयवंसमूलंकुलंहरत्येववदंतिमृतः चेदन्यथांत।
कुरुतेविशेषात्सौभाग्यमायुश्चकुलाभिवृद्धिं २० ज्येष्ठांतेघटिकैकात्रमूलस्याद्यघटीद्वयं अभुक्तमूलमित्युक्तंतत्रोत्पन्नशिशोर्मुखं २१ अष्टवर्षा
णिनालोकयंतातेनशुभमिच्छता तद्दोषपरिहारार्थंशांतिकंप्रोच्यतेऽधुना २२ रत्नैःशतौषधीमूलैः सप्तमृद्भिःप्रपूजयेत शतच्छिद्रेघटस्नात्वा विग
तेनजलेनहिः २३ बालकांवापितृस्नानेविप्रैःसंयादितेसति जपहोमप्रदानेनकृतेस्यान्मंगलंध्रुवं २४ विरुद्धावयवेमूलविधिरेवस्मृतोबुधैः मुनी
नांवचनंसत्यंमंतव्यंसेममीपसुभिः मूलस्यपादत्रितयंत्रमेणपितुर्जनन्याश्चधनस्यदिष्टं चतुर्थपादः शुभदोनितांतंसार्प्येविलोमंपरिकल्पनी
यम् २६ इतिचरणफलम् कृत्तेतृतीयादशमीवलक्षेभूजो २५ महीजार्किबुधैःसमेतः चेज्जन्मकालेकिलतत्रमूलमुन्मूलनंतत्कुरुतेकुल
स्य २७ दिवासायंनिशिप्रांतस्तानस्यमातुलस्यच पशूनांमित्रवर्गस्यक्रमान्मूलमनिष्टदम् इतिमूलवेलाफलम् मूर्द्धिपंच ५ मुखेपंच ५
स्कंधयोः घटिकाष्टकं ८ गजा ८ श्वि २ भुजयोर्युग्मंहस्तयोर्हृदयेऽष्टकं २८ युग्मंनाभौदिशोगुह्येषट्जान्वोः षड्पादयोः विन्यस्यपुरुषाकारे
मूलस्यफलमादिशेत् २९ शिरः ५ मुख ५ स्कंध ८ भुजा ८ हस्तौ २ हृदि ८ नाभौ २ गुदे १० जानु ६ पाद ६ छत्रलाभःशिरोदेशेवदनेपितृकोघातकः।
स्कंधयोर्ईनहृत्वंचबाहुयुग्मेत्वकर्मकृत ३० हत्याकरःकरद्वंद्वेराज्याप्तिर्हृदयेभवेत् अल्पायुर्नाभिदेशेचगुह्येचसुखमद्भुतं ३१ जंघायांभ्र
मणंप्रीतिः पादयोर्जीवनाल्पता घटीफलंकिलप्रोक्तंमूलस्यमुनिपुंगवैः ३२ विज्ञेयंविबुधैःसर्वसार्पेतच्चविपर्ययात् इतिपुरुषाकृतौमू॰ राम
लाश्लेषाफलं मार्गफाल्गुनवैशाखज्येष्ठेमूलंरसातले श्रावणेकार्तिकेचैत्रपौषेमूलंचभूतले आषाढेचाश्विनेभाद्रेमाघेमूलंदिविस्थितं स्वा १९
र्गेमूलेभवेद्राज्यंपाताले चधनागमं मृत्युलोकेयदामूलंतदाविघ्नंविनिर्दिशेत् अत्रोक्तेषुमूलज्येष्ठाश्लेषाविचारेषुशुभाफलाधिक्यात् मौनेर
नावश्यकमादशंकेनशांतिर्नविधेयाः शंकेनतुसर्वत्रशांतिर्विधेयेतिगुरुचरणाः कालत्रयमाहवसिष्ठः शास्त्रोक्तरीत्याखलुसूतकांतेमासे

तृतीयेप्यथवा संगते गर्गः मातृगंडे सुते जाते मूलर्क्षांते विचक्षणाः कुर्याच्छांतिं न दृष्टिर्वा तस्य पश्यापनुत्तये शिशुं तु सर्वत्रापि यत्र सूत्रे जन्मांतरे सूत्र-
शांतिरिति व्यवहारः तत्र अथ शांतयो लिख्यंते तत्र प्रथमं मूलशांतिरुच्यते शौनक उवाच अथातः संप्रवक्ष्यामि मूलजातहिताय च मातापित्रोर्धनस्या-
पि कुलशांतिहिताय च जातस्य द्वादशाहे तु जन्मर्क्षे वा शुभे दिने समाष्टके वामनिमां कुर्याच्छांतिमादरात् अत्र मूले द्वादशाहजन्मर्क्षयोर्मध्ये
शुभयोगादिके तत्र शांतिः कर्तव्या अभुक्तमूलोत्पन्नस्य समाष्टके शांतिः कर्तव्येति कालव्यवस्था वसिष्ठः सुसमे पुण्यदेशे तु मंडपं कारयेद्बुधः ऐशा-
न्यामथवा प्राच्यां उदीच्यां दिशि कल्पयेत् मंडपं चाष्टभिर्हस्तैश्चतुर्भिर्वा समंततः चतुर्द्वारसमायुक्तं तोरणाद्यैरलंकृतं कुंडं च तद्बहिः कुर्याद्द्वयं तत्रो-
क्तमार्गतः कुंडनिर्माणं यथा कुंडवत्तद्बहिर्भागे कार्यं चतुरस्रकं वितस्तिद्वयखातं यत्तु कुंडं चतुरंगुलं विप्राणां क्षत्रियाणां तु वांगुलत्र्यसंयुतं वै-
श्यानां द्व्यंगुलाधिकं शूद्राणां हस्तमात्रकं प्रथमा मेखला तत्र द्वादशांगुलविस्तृता चतुर्भिरंगुलैस्तस्याश्चोन्नतत्वं समंततः तस्या उपरि वप्रः
स्याच्चतुरंगुलमुन्नतः अष्टाभिरंगुलैः सम्यक् विस्तीर्णश्च समंततः तस्योपरि पुनः कार्यो वप्रः सोपि तृतीयकः चतुरंगुलविस्तीर्णश्चोन्नत-
श्च तथाविधः योनिश्च पश्चिमे भागे प्राङ्मुखी मध्यसंस्थिता षडंगुलैश्च विस्तीर्णा चायता द्वादशांगुलैः पृष्ठोन्नता गतस्पेकसच्छिद्रा मध्यमोन्नता
एवं लक्षणसंयुक्तं कुंडमिष्टार्थसिद्धये अनेकदोषदं कुंडं यत्र न्यूनाधिकं भवेत् पंचामृतं पंचगव्यं पंचत्वक्पल्लवानि च उदुंबरवटाश्वत्थप्लक्षाम्र-
त्वक्समपल्लवाः रोचनं कुंकुमं शंखं गजदंतं च गुग्गुलं शतौषधीमूलशंखनवरत्नानि मृत्तिकाः याः फलिनीरिति मंत्रेण मृत्तिकादीन्समाचरेत् गजा-
श्वरथ्यावल्मीकसंगमस्थानसंभवाः हृदगोराजनगरद्वारतश्चाष्टमृत्तिकाः शतौषधीमूलानि वसिष्ठसंहितायां श्रीवृक्षः बिल्वखदिरः विष्णुक्रांतापुन-
र्नवा देवदारु जटामांसी सहदेवी मुराशिवा फलिनी वकुरा जाती कलामांजिष्ठसंज्ञका वटप्लक्षाम्रनीवारखदिरो मल्लिकार्जुना मदयंती महाजाती निं-
बोशीरहरिद्रका २० सर्पाक्षी तुलसी रौद्रा कुटा दाडिमचंपकाः ३३ मातुलिंगजयारक्ताकर्णिकाशोकांचना ३० सेवतीपनसद्राक्षाविश्वाक्षीश्वेत-

 सर्षपा ४३ राजीवकुंदमुकुलनीलोत्पलकारंजका ४८ पुंनागचंदनद्रोणामंदारोहेमदुग्धिका ५४ रक्तचंदनजंबीरयूथिकागृहमल्लिकाशम्या।
 केसिंदुवारेंद्ररक्तघत्तूरशांडिमा ६४ अपामार्गनुपलाशवृहतीकरवीरकानंदावर्तकुवेराक्षीपाटलाहेमपुष्पिकाशिंशीषामलकाशोकरक्तगा
स्तिकपित्थकः ७८ वंधूकभृंगराजाख्यक्रमावीमाधवीलताचातुर्जातोवर्हिशिखाकुटजोमधुविंवकः तमालमरुपुष्पेंद्रपुष्पाख्याभुक्ता।
मर्दिनी वाकुचीशाल्मलीमौंडीराह्वास्वर्षपटोलका ९७ महाखर्जूरिकानारीकेलाख्यास्तेशतद्रुमाः १०० एषांमूलानिसर्वाणितूर्णीकेनेना
दंतियत शांतिकर्मणिसर्वत्रनिक्षिपेत्कलशोदके एषामभावेतुदशसर्वौषध्यःप्रकीर्तिताः कुलमांसीहरिद्रेद्वेमुराशैलेयचंदनंवचाचंपक
हस्ताश्वसर्वौषध्योदशैवहि विष्णुक्रांतासहदेवीतुलसीचशतावरीमूलानीमानिगृह्णीयाद्दशालाभेविशेषतइति तिलमाषयवव्रीहि
धूमानिप्रियंगवः चणकैः सहिताःसप्तसद्बीजानिचसर्वदामाणिक्यंविद्रुमंमुक्ताफलवैडूर्यनीलकं वज्रंगारुत्मकंपुष्यरागंगोमेदकं॥
नवरत्नमिदंप्रोक्तमभावेपंचरत्नकं वज्रमौक्तिकवैडूर्यपुष्परागेंद्रनीलकं पंचरत्नमिदंप्रोक्तंमंत्रैःकुंभेषुनिक्षिपेत सुवर्णेनप्रतिमानतद
र्धार्धेनवापुनःनिष्कतिप्रतिमांकुर्याद्वित्तशाठ्यविवर्जितः अत्रविशेषःशौनके पलमानेनचार्धेनपादेनाथस्वशक्तितः नक्षत्रदेवतारूपंका
रयित्वाविचक्षणः यद्दामूल्यंसुवर्णस्यपुनःस्थापयित्वाप्रपूजयेत सुवर्णंसर्वदेवत्वंसर्वदेवात्मकोनलःसर्वदेवात्मकोविप्रःसर्वदेवमयो।
हरिरित्विक्स्वाष्टिषोडशाष्टौच शुक्लसूक्ष्माण्यनिंद्रितः ब्राह्मणान्वारयेत्तस्मात्स्वस्तिवाचनपूर्वकं श्रोत्रियाश्चतुराष्टौच द्वादशान्वयषोडश॥
प्रधानाचार्यमेतेषांश्रेष्ठंतत्रनिमार्चनं ईशानादिचतुष्कोणेष्वव्रणान्जलपूरितान्पूर्वोक्तद्रव्यसंयुक्तान्स्थापयेद्रक्तवर्णकान् विप्रा
न्पृथक्पृथग्वापिमधुपर्कादिनार्चयेत् द्वारेषुजापकान्द्वौद्वौचवरयेत्पुनः आप्येर्लवैर्वारुणैर्मंत्रैःशुक्लपुष्पाक्षतादिभिःतंतंकुंभेजला
न्स्पृष्ट्वाकुशकूर्चैर्जपेदिति रुद्रसूक्तंचभद्रापरांगोभद्राइतिक्रमात पुरुषसूक्तंचतन्मंत्रैर्देवान्ध्यात्वाप्रयत्नतः गोमूत्रंगोमयंक्षीरंदधिसर्पिः

कुशोदकं पंचगव्यमिदं कुंभे क्षिपेद्गजमदान्वितं रजतं कांचनं ताम्रं विद्रुमं तीर्थमार्त्स्नां निक्षिपेद्धेममूलं च दशांशप्रमाणनिर्मितः देवदारुमयं शैलं।
यं पञ्चनीलोत्पलं तथा वचालोध्रप्रियंगुं च शतच्छिद्रे घटे क्षिपेत् वंशपात्रोपरिन्यस्तं शतच्छिद्रघटे स्थितं ततश्च निर्ऋतिं देवमर्चयेन्मास्विमामु
स्व मोगुवां स्थितिमंत्रेणाप्सु ... मूलरूपं विधानत्र्यंशया मं कुणपवाहनं खड्गखेटधरं चोग्रं द्विभुजं च बहुकाननं स्थापयेत्तत्र प्र।
हां श्वेतवस्त्रगंधादिभिर्यजेत् चरुं च श्रपयेत्तत्र नैर्ऋतं दुष्कृतापहं तत्र चत्वारः कुंभाश्च चतुर्दिक्षु स्थाप्याः एकः कुंभो रुद्रस्थापनार्थं अन्यः स्था
प्यः एकः शतच्छिद्रः कुंभः तस्मिन्कुंभे देवदारु शैलेयमित्याद्यौषधादिभिस्तथा सुवर्णमूलमष्टदशायवपरिमितं निक्षिप्य तदुपरि वंशपा
त्रं निधाय तदुपरि वस्त्रं निधाय तत्र निर्ऋतेः प्रतिमां रुद्रप्रतिमां जलप्रतिमासहितं स्थापयेत् ततः षोडशोपचारैर्वा पूजयेत् शुक्लवस्त्रे।
नकेन पुण्याहमंत्रैर्निर्मलोदकैः प्रोक्षितायां क्षितौ ततः तत्रोदकुंभं सुश्लक्ष्णं रक्तवर्णविवर्जितं अच्छिन्नमूलं निर्णीतं पूरयेन्निर्मलांभसा ... क
लशोऽधिस्थनं या कलशस्थापनं शुभं इमं मे इति मंत्रेण पूरयेत्तीर्थवारिणा कुंभं वस्त्रगंधाद्यैस्तत्र मंत्रैः प्रपूजयेत् याः फलिनी इति ...
द्रव्यौषधादिकं वस्त्रावगुंठितं कुर्यात्पूरयेत्तीर्थवारिणा कुर्वन्हेमसमायुक्तं क्लनपल्लव संयुतं स्वस्तिकोपरि विन्यस्य क्षीरद्रुमसपल्लवैः ...
हिश्च निक्षिप्य ईशाने च निधापयेत् पंचरत्नानि निक्षिप्य सर्वौषधिसमन्वितं अर्चितं गंधपुष्पाद्यैः श्रीरुद्रं तत्र संजपेत् तत्र प्रतिरथं सूक्तं शातनं
स्तनुवाचकं रक्षामंत्रं तथा पुण्यं रक्षोघ्नं च सूक्तं जपेत् त्र्यंबकं च जपेत्सम्यगष्टोत्तरसहस्रकं एकवारं तथा जाप्यं पावमानीः स्पृशं क्षिपेत् जपस्यां
त कुंभाश्च हृयं तानयुतं मुखं चतुःप्रस्रवणं कुर्यात्पंचवस्त्रं च तद्वद्वेतं व स्त्रावगुंठितं कुर्यात्पूजयेत्तीर्थवारिणा पंचरत्नसमायुक्तं आम्रपल्लवशो
भितं एतस्मिन्नपि पंचरत्नसमृत्तिका शतमूलदेवदारु प्रभृत्यौषधिहेममूलानि क्षिपेत् कुंभोपरिन्यसेद्विद्वान्मूलनक्षत्रदेवतं स्वप्रत्यधिदेवं
च दक्षिणोत्तरदेशतः अधिदेवं जपेदादौ स्पष्टान्नक्षत्रदेवतं एवं प्रत्यधिदैवं च पूर्वाषाढा सुदैवतं अधिदेवस्वरूपभुक्तं वसिष्ठसंहितायां महाका

हो॰र॰ याज्ञधरोगग्रहे होमगजवाहनः प्रत्यधिदेवस्वरूपं तत्रैव जलं हुतभुजं यत्नतस्तं चंदनेनोपलिप्तमिति स्वलिंगोक्तैश्च मंत्रैश्च प्रधानादीन्प्रपूजयेत् पंचामृतेन संस्नाप्य स्नाप
२१ स्वायसमर्चयेत् उपचारैः षोडशभिः यद्वा पंचोपचारकैः रक्तचंदनगंधाद्यैः पुष्पैः कुसुमसितादिभिः मेषशृंगादिधूपैश्च घृतदीपैस्तथैव च सुरापोलिकमांसाद्यैर्नैवे
द्यैर्भोजनादिभिः मत्स्यमांससुरादीनि ब्राह्मणानां विवर्जयेत् सुरास्थाने प्रदातव्यं क्षीरं सैंधवमिश्रितं पायसं लक्षणोपेतं मांसस्थाने प्रकल्पयेत् उक्तगंधाद्यभावे तु यथा
लाभं समर्चयेत् पुष्पांतं तु समभ्यर्च्य होमं कुर्याद्यथाविधिः तमिति गृहीत्वा विधिवन्नैर्ऋत्यैवकृत्वा हुनेत् अत्र वशिष्ठेन विशेषोऽभिहितः मूलंप्रजापतिमंत्रेणाद्यस्य काय
ऋषिः निर्ऋतिर्देवता अनुष्टुप्छंदः मूलाय स्वाहा प्रजापतये स्वाहा इत्युपहोममंत्रैः पलाशसमिदाज्येन चरुणा [illegible] हस्तकं अथवाष्टोत्तरशतं प्रत्येकं जुहुयात्ततः मू
लं प्रजामित्यष्टाभिर्वाक्यैर्मंत्रद्वयेन च सावित्र्या सोमनेऽन्यमंत्रैरश्वत्थसंभवैः समिद्भिश्च तिलव्रीहीन्हुत्वा व्याहृतिमंत्रतः मूलं प्रजामिति त्यष्टौ वाक्यानि नवकौ जपेत् श
तेन रससहस्रं वा शतं वा नियतात्मवान् अयं होमप्रकारस्तु शाखांतरविषयो ध्येयः मोक्षुणः परापरेतियन्नेदेवेति वा पुनः पायसं घृतमिश्रं चरुणे दत्त्वा तरं स्थतं [illegible] व
हस्त्यश्वाच्छतिनः संख्यया हुनेत् अधिदैवतयोश्चैव जुहुयात्स्वमंत्रकैः नक्षत्रदेवताभ्यश्च पायसेन तु होमयेत् काण्डात्काण्डेति पंचदशभिर्जुहुयाच्छतं ततः [illegible]
वेदसंत्रिपंचकं त्रिति क्रमात् सहस्रयुं जतिनामग्निवा सोष्यत्यग्निमेव च नक्षत्रस्य पितिनागृणानाग्निं दूतं तथैव च श्रीसूक्तेन तथा विद्वान् समि
दाज्यं चरुं क्रमात् अष्टोत्तरशतेर्वाथ अष्टाविंशतिभिः क्रमात् अष्टसंख्यया वापि जुहुयाच्छांतिनो व्यध्वं नः संप्रायसं जुहुयात्तु त्रयोदश चतुर्गृ
हीतमाज्यं च यातेरुद्र इति मंत्रतः स्रुवेणाज्जुहुयादाज्यं महाव्याहृतिभिः क्रमात् हुत्वा स्विष्टकृतं पश्चात्प्रायश्चित्ताहुतिर्हुनेत् आचार्यो यजमानो वा
वायोपूर्णाहुतिं हुनेत् होमशेषं समाप्याथ वह्निमारोपयेत्ततः कुंभाभिमंत्रितं कुर्याद्दक्षिणेनाभिमंत्रयेत् मृत्युः प्रशमनार्थाय जपेत्त्र्यंबकमंत्रकं रु राम
द्रकुंभोक्तमार्गेण रुद्रमंत्रं स्पृशन्स्थिपेत् धूपं दीपं च नैवेद्यं कुंभेषु विनिवेदयेत् प्रसादयेत्ततो देवमभिषेकार्थमादरात् भद्रासनोपविष्टस्य य २१
जमानस्य ऋत्विजः सपुत्रस्य समेतस्य कुर्युः सर्वेऽभिषेचनं [illegible] सूक्तेन पावमानीभिरेव च आपो हि ष्ठेति नवभिरा [illegible] सह

स्नापयेद्वैनापि स्वस्त्यनेतिमंत्रकैः शिवसंकल्पं मात्रेणावेक्ष्यमाणोस्य मंत्रकैः यो सौवज्रधरोदेवो महेंद्रो गजवाहनः मूलजातशिशोर्दोषं मातापित्रोर्व्य
पोहतु योसौ शक्तिधरो देवो हुतभुङ्मेषवाहनः यः सप्तजिह्वदेवोग्निर्मूलदोषं व्यपोहतु योसौ दंडधरो देवो धर्मो महिषवाहनः मूलजातशिशोर्दोषं
व्यपोहतु यमो मम योसौ खड्गधरो देवो निर्ऋतिर्राक्षसाधिपः प्रशामयतु मूलोत्थं दोषं गंडांतसंभवं योसौ पाशधरो देवो वरुणश्च जलेश्वरः मकरवाहः पं
चनादः मूलेन्यादोषं व्यपोहतु योसौ देवो जगत्प्राणो मारुतो मृगवाहनः प्रशामयतु मूलोत्थं दोषं बालस्य शांतिदः योसौ निधिपतिर्देवो खड्गभृत्नरवाहनः
मातापित्रोः शिशोश्चैव मूलदोषं व्यपोहतु योसौ पशुपतिर्देवः पिनाकी वृषवाहनः आश्लेषामूलगंडांतदोषमाशु व्यपोहतु विघ्नेशः क्षेत्रयो दुर्गा लोकपा
लानवग्रहाः सर्वदोषप्रशमनं सर्वे कुर्वंतु शांतिदाः त्रैलोक्ये यानि भूतानि चराणि स्थावराणि च ब्रह्मार्कविष्णुयुक्तानि तानि दोषं दहंतु मे तद्द्वयोरभि
षेकं तु सर्वदोषोपशांतये सर्वकामप्रदं दिव्यं मंगलानां च मंगलं वस्त्रांतरितकुंभाभ्यां पश्चात्नुस्नापयेद्बुधः ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः
यजमानो दक्षिणाभिस्तोषयेदृत्विजादिकान् धेनुं पयस्विनीं दद्यादाचार्याय सवत्सकां निर्ऋतिः प्रतिमां कुंभं वस्त्रं हेमं च दापयेत् ग्रहार्थं [illegible] प्रतिमां
तस्मै दद्यात्प्रयत्नतः श्रीरुद्रजापिने देयो कलशोनड्वान्प्रयत्नतः तत्कुंभं वस्त्रप्रतिमां तस्मै दद्यात्प्रयत्नतः उक्तालाभे तन्मौल्यं दद्यादाचार्य ब्रह्म ऋत्विग्भ्यः शेन
न्मूल्यं प्रदातव्यं शक्त्यावाथ प्रदापयेत् अवशिष्टब्राह्मणेभ्यो यावच्छक्त्या च दक्षिणां दीनांधकृपणादिभ्यः किंचित्किंचित्प्रदापयेत् ततश्चाज्यावेक्ष
णं च कारयेन्मंत्रपूर्वकं तत्राज्यपूजामंत्रः वंदे सर्वरसश्रेष्ठं त्वामहं भगवानजः अग्र आज्य सुधारूप सर्वश्रेष्ठं कुरुष्व मां आज्यावेक्षणमंत्रः या लक्ष्मी
र्यच्च मे दौस्थ्यं सर्वगात्रेष्ववस्थितं तत्सर्वं भक्षयाज्य त्वं लक्ष्मीं पुष्टिं विवर्धय उद्वासयेत्ततो वह्निं ग्रहान्देवान्द्विजान् क्रमात् दद्यादन्नं पायसादि ब्राह्मणा
न्भोजयेच्छतं अलाभे सप्तपंचाशद्दशकं तदलाभतः सर्वदा तत्र पठनं आशिषां ग्रहणं तथा गृहीत्वा समापयेद्विद्वान्निर्ऋतिः प्रीयतामिति इति शौनकी
यमूलशांतिः अथाश्लेषाशांतिविधिः मनुसंहितायां अश्लेषायां तु जातानां शांतिं वक्ष्याम्यतः परं जातस्य द्वादशाहे तु शांतिहोमं समाचरेत् अलाभे

भतुजन्मस्थेत्राह्मणान्वाशुभे दिने स्नातो भंगादिभिस्तत्वरयन्नुद्दिजान्मानविभवे पंचकुंभाश्च द्वयं वा तदभावतः देवतास्थापने चैकमेकं रुद्राभिमंत्र
णं मूलशांतिप्रकारेण कुंभं निक्षिप्य पूजयेत् गोमयालेपिते देशे धान्याद्यैः परिशोभिते पंकजं कारयेत्तत्र चतुर्विंशत्यंगुलान्वितं तंदुलैः कारयेद्यद्वारक्त
पीतसितासितैः कर्णिकायां न्यसेत्कुंभं स्थापयेत्तेषु कुंभकं आकलशेष्विन्मनयाकलशस्थापनं शुभं इमंमइति मंत्रेण पूरयेत्तीर्थवारिणा कुंभं च वस्त्र
गंधाद्यैस्तत्तन्मंत्रैः प्रपूजयेत् याः फलिनीरिति मंत्रेण दक्षिणोत्तरयोर्यजेत् ऐंद्र्यादीशानपर्यंतं इत्यष्टशांति पूजयेत् मूलोक्तेन विधानेन कुंभयोरभिमंत्रणं रु
द्राचारुद्रकुंभे तु पूर्ववच्छेषमाचरेत् आश्लेषाशांतिरप्येवमेव कार्या तत्र विभवे पूर्वोक्तवत्पंचकुंभाः स्थाप्याः असंभवे कुंभद्वयं एकत्र रुद्रस्थापनं अभि
मंत्रणादि पूर्ववत् तत्राश्लेषाप्रतिमा सर्पाकारा अधिदेवमथ बृहस्पतिप्रतिमां प्रत्यधिदेवतं पितृप्रतिमां स्थाप्य प्रपूजयेच्च नमोस्तु सर्पेभ्यः [illegible] इमं
नइतीति तः सर्पोरक्ताश्विनेत्रश्चद्विभुजः पीतवस्त्रकः फणकाधिधरस्तीक्ष्णो दिव्याभरणभूषितः एवं ध्यात्वा ततोऽभ्यर्च्य होमकर्म समाचरेत् कर्तुः
शास्त्रोक्तमार्गेण आचार्यस्याथवा चरेत् मुख्यानं कर्मनिर्माय ह विरादाय शास्त्रतः इदं सर्पेभ्यो जुहुयात्साधिप्रत्यधिदेवतं अष्टोत्तरशतं वाष्टाविंश
तिमथवा मूलनक्षत्रवच्छेषं होमकर्म समापयेत् पूर्णाहुत्यंतकर्माणि कृत्वा संपातकं तथा कुंभाज्जलं तु प्रक्षिप्य अभिषेकं समाचरेत् पुत्रदारसमे
तस्य यजमानस्य पूर्ववत् आश्लेषा [illegible] जातस्य मातापित्रोर्धनस्य च भ्रातृजातिकुलस्थानं दोषं सर्वं व्यपोहति पितरः सर्वभूतानां रक्षंतु पितरः सदा
सर्पनक्षत्रजातस्य वितं चञ्जातिबांधवान् सर्पाधीशान मस्तुभ्यं नागानां च गणाधिपः गृहाणार्घ्यं मया दत्तं सर्वारिष्टप्रशांतये इत्यर्घ्यमंत्रः मूलनक्ष
त्रवत्कुर्यात्सर्पवेषेषु नामतः एतच्च मूलाश्लेषाशांतिद्वयं विवाहे उपस्थिते श्वश्रुश्वशुरसमृद्ध्ये सत्वे मूलाश्लेषोत्पन्नयोरावध्वधूवरयोस्तत्तदरिष्टनिवृत्त्यर्थं
विधेयं उपलक्षणत्वाच्च ज्येष्ठाविशाखात्पन्नायाः वध्वावरस्य ज्येष्ठवंधुकनिष्ठवंधुकशांत्यैच यदाह नारदः मूलजा श्वशुरं हंति व्यालजा तत्र दं नानांस्त्री
[illegible] शांतिर्वा पुष्कला चेत्स्यात्तर्हि दोषो न कश्चनेति इत्याश्लेषाशांतिः अथ गंडशांतिः गर्गसंहितायां गंडशांतिं प्रवक्ष्यामि

सोममंत्रेणभक्तिमान् कांस्यपात्रेप्रकुर्वीतपलैः षोडशभिर्नवं अष्टाभिश्चचतुर्भिर्वाद्वाभ्यांवाशोभनंतथा तन्मध्येपायसंशंखेनक्षीरेणपूरितेपू
जनंचंद्रमसेपश्चाद्वितपुष्पसहस्रकैः दैवतः शुक्लवासास्तुशुक्लमाल्यांबरार्चितः सोमोहमितिसंचिंत्यपूजांकुर्यादतंद्रितः जपेदष्टसहस्रकंमंत्रंश्रद्धा
नःसमाहितः आप्यायस्वेतिमंत्रेणपूजांकुर्यात्समाहितः दद्याद्दक्षिणांमिष्टांगंडदोषप्रशांतये शुक्लांवागांस्वर्णंचैवताम्रपात्रसमन्वितं गंडदो
षोपशांत्यर्थंदद्याद्विदेशुचिः अभुक्तेनरजातानांसूतकांतेदिनेथवा शांतिंशुभेह्निवाकुर्यात्तावत्पुत्रंनलोकयेत् विशेषोज्योतिर्निबंधे मूला
श्विपित्र्यस्वरौप्रथमेचचतुर्थपादेषुजातोऽश्वफणिनश्चतुरीयपादेमातुःपितुःस्ववपुषःप्रकरोतिनाशंजीतोयदानिशिदिनेप्यथसंध्ययोश्चेति अत्रापिपूर्व
वत्प्रतिमासकलशहोमाभिषेकादिकंकार्यंतिथिगंडेत्वनड्वाहंनक्षत्रेधेनुरुच्यते कांचनंलग्नगंडेतुगंडदोषोविनश्यति आद्यभागेपितुर्गंडेत्रयाणामभि
षेचनंतत्रशिशोर्मातुरभिषेकंचकारयेत् अन्यच्च विशेषस्तत्रैवोक्तः उत्तरात्रिष्यचित्रासुपूर्वाषाढोद्भवस्यच कुर्याच्छांतिंप्रयत्नेनतत्संवाकास्त्रांवुधः
अत्रविशेषांतरमाह वशिष्ठः चित्राद्यर्धेपुष्यपादेद्वितीयेपूर्वाषाढाधिष्ण्यपादेतृतीये जातःपूर्वाफाल्गुन्युत्तरार्धेविघातीमातापित्रोर्भ्रातुरप्यात्मनश्चग
र्गःद्विमासस्योत्तरादोषःपुष्यश्चैवत्रिमासकः पूर्वाषाढाष्टमेमासिचित्राषाण्मासिकंफलंनवमासंतथाश्लेषामूलेचाष्टौसमास्मृताःज्येष्ठमासःपंचदशेपु
त्रदर्शनवर्जिताःउत्तरेतिलपात्रंस्यात्तिष्येगोदानमिष्यते अजांचित्रासुवैदद्यात्पूर्वाषाढेतुकांचनंयवान्वाव्रीहिमाषांश्चतिलंमुद्गांश्चदापयेत्यथावि
त्तानुसारेणकुर्याद्ब्राह्मणभोजनं पितुरायुष्यवृद्ध्यर्थंशांतिरत्रविधीयते शांतिंविनादानात्तरंसर्वेनक्षत्रेषुवसिष्ठसंहितायां विप्रेभ्योगोत्रयंदद्या
त्तद्दोषशमनायवै अशक्तोगोद्वयंदद्याद्धोमेकांवापिभक्तितः इतिअत्रोत्तराशब्देनपूर्वाषाढसाहचर्यादुत्तराषाढाग्रहणमितिव्याख्यातंसारसागरेइतिगं
डांतशांतिः अथज्येष्ठाशांतिः ज्येष्ठादौमातृजननींमातामहंद्वितीयके तृतीयेमातुलंहंतिचतुर्थेजननींतथा आत्मानंपंचमेहंतिषष्ठेगोत्रक्षयोभवेत् स
प्तमेकुलनाशःस्यादष्टमेज्येष्ठसोदरं नवमेश्वशुरंहंतिसर्वंस्वंदशमेतथा प्रत्येकंघटिकाषट्कस्यफलमुक्तं अत्रापिमूलशांतिवत्कार्यं तत्रविशेषःघटि

हो॰र कैकाचमैत्रांते ज्येष्ठादौ घटिकाद्वयं तयोः संधिरिति ज्ञेयं शिशुगंडांतमीरितं प्रथमे च द्वितीये च ज्येष्ठर्क्षे च तृतीयके पादत्रये वयोजातः स च श्रेष्ठः प्रकी
र्तितः ज्येष्ठांत्यपादजातस्तु पितुः स्वस्य विनाशदः ज्येष्ठर्क्षे कन्यका जाता हंति शीघ्रं धवाग्रजं शांतिं तस्य प्रवक्ष्यामि गंडदोषप्रशांतये तत्र चतुर्दिक्षु कुंभ
२३ चतुष्टयं संस्थाप्य तन्मध्ये शतच्छिद्रं पंचमं कुंभं संस्थाप्य पूर्ववत्पूजां विधाय तत्र वज्रांकुशधरं देवमैरावतगजान्वितं कुर्याच्छचीपतिं रम्यं देवेंद्रं सु
रनायकं शालितंडुलसंपूर्णकुंभस्योपरि पूजयेत् अष्टसहस्र १००८ संयुक्तं कलसं कुर्यात्स्नपनं तथा महां इंद्र इति मंत्रेण तदर्द्धं नवाजयः होमो दशांशतः का
र्यं तर्प्पणं मार्ज्जनं विधिः इंद्रायेंद्रमरुत्वंत इति मंत्रेण वाग्यतः पूजयेद्विधिना सम्यक् लोकपालगणान्वितं रक्तवस्त्रद्वयोपेतं देवराजं शचीपतिं पूजये
दास्तौर्मंत्रैः कुंभान्धीमान्प्रयत्नतः त्वन्नो अग्ने जपेदादौ स त्वन्नोपि द्वितीयकं समुद्रज्येष्ठ इति च इमं मे इति चतुर्थकं इंद्रसूक्तं रुद्रजपं जपं मृत्युंजयं ततः
समिद्भिर्वृक्षस्य शतमष्टोत्तरं शतं सर्पिषा चरुणा चैव मूलमंत्रेण वाग्यतः हुनेदाप्यवतेनैव यत इंद्र भयेति वा तिलान्व्याहृतिभिर्हुत्वा शतम
ष्टोत्तरं पृथक् ततोभिषेकः ततो रुद्रमिति मंत्रेण तच्चक्षुरिति मंत्रेण आज्यावलोकने पुनर्देवतापूजनं कृत्वा नमोस्तु सुरनाथाय नमस्तुभ्यं शचीपते गृह्य
णार्घ्यं मया दत्तं गंडदोषप्रशांतये अष्टोत्तरशतं संख्यान् कुर्याद्ब्राह्मणभोजनं अन्यत्सर्वं पूर्ववत् इति ज्येष्ठाशांतिः दिनक्षये व्यतीपाते व्याघाते विष्टिवैधृ
तौ शूले गंडे च परिघे वज्रे च यमघंटके कालदंडे मृत्युयोगे दग्धयोगे सुदारुणे तस्मिन्नांडदिने प्राप्ते प्रसूतिर्यदि जायते अतिदोषकरी प्रोक्ता तत्र पापयुते
सति क्रियायतत्रैव तत्र शांतिं कुर्याद्यथाविधिः यजनं देवतानां च ग्रहाणां चैव पूजनं दीपं शिवालये भक्त्या गोघृतेन प्रदापयेत् अभिषेकं शंकरस्य अश्वत्थ
स्य प्रदक्षिणा अभीष्टफलसिद्ध्यर्थं कुर्याद्ब्राह्मणभोजनं गाणपत्यं पुरुषसूक्तं सौरं मृत्युंजयं शुभं शांतिजाप्यं पुनश्चैव तत्वाप्यत्युत जयी भवेत् इत्युपसर्गा। राम
र्यदुष्टयोगशांतिः कुमारजन्मकाले व्यतीपातश्च वैधृतिः संक्रांतिश्च रवेस्तत्र जातो दारिद्र्यकारकः अथ संक्रांतिनिषेधः संक्रांते रुभयत्र षोडश घटी मि २३
तो त्याज्य व्यतीपातवैधृतिगणितागतो महापातकसंज्ञो ज्ञेयो नवग्रहमखं कुर्यात्तस्य दोषस्य शांतये अथ गोमुखात् जन्म ततः शांतिं समाचरेत् गृहस्य पूर्वदि

भागेनोमयेनानुलिप्य च अलंकृतः स्वदेशे तु व्रीहिराशिं प्रकल्पयेत् पंचद्रोणमितं धान्यं तदर्द्धं तंडुलेन च तदर्धं तु तिलैः कुर्यादन्योन्यं परिकल्पयेत्
दृष्ट्वा त्रितयराशौ तु अष्टपत्रे लिखेद्बुधः पुण्याहं वाचयित्वा तु आचार्यं कारयेत्सुरा राशौ प्रतिष्ठितं कुंभमव्रणं सुमनोहरं तीर्थोदकेन संभृत्य सप्तद्रोणाधिप।
स्त्वं पंचगव्यपंचरत्नं वस्त्रयुग्मेन वेष्टयेत् तस्योपरि न्यसेत्पात्रं सूक्ष्मवस्त्रेण संयुतं प्रतिमां स्थापयेत्तत्र यथा नाधिप्रत्यधिदेवतं चंद्रादित्यौ कर्ता पार्श्वे
मध्ये वै धृतिमर्चयेत् । एवमेव व्यतीपाते शांतौ संक्रमणस्य च अधिदेवं भवेत्सूर्यं श्चंद्रं प्रत्यधिदेवतं २ तत्तद्याह्नतिपूर्वेण तत्तन्मंत्रेण पूजयेत् त्र्यंबके
नमंत्रेण प्रधानप्रतिमां यजेत उत्सूर्य इति मंत्रेण सूर्यपूजां समाचरेत् आप्यायस्वेति मंत्रेण सोमपूजां समाचरेत् तत्राष्टोत्तरसहस्रमष्टोत्तरशतं च।
वा अष्टाविंशतिसंख्या वा जपं संवत्सरोरजं आनोभद्रेति भद्राश्च ग्ने इति सूक्तं पुरुषसूक्तं त्र्यंबकं एतान्मंत्रान् कुंभान्स्पृष्ट्वा चतुर्दिक्षु जपं कुर्युः त्र्यंबके
नमंत्रेण समिदाज्यचरून्हुनेत् अष्टोत्तरसहस्रं अष्टोत्तरशतं अष्टाविंशतिर्वा मृत्युंजयेन मंत्रेण तिलहोमं समाचरेत् ततः समुद्रज्येष्ठ आपोहिष्ठा
ऋचेन वा अर्ध्यीभ्यामिति सूक्तेन पावमानीभिः त्र्यंबकेन उत्सूर्येणेति आप्यायस्वेति वैदिकमंत्रैः सुरास्त्वामभिषिंचंतु इत्यादिकैः पुराणमंत्रैश्चाभिषे।
ककुर्यात् अन्यद्दक्षिणादानादिकं पूर्ववत् इत्युत्तरगार्ग्ये वैधृतिव्यतीपातसंक्रांतिशांतिः अथ कुहूसिनीवालीदर्शशांतिः तत्रामायाः प्रथमे प्रहरे ज
न्म चेद्भवति तदा सिनीवालीशांतिः द्वितीयतृतीयचतुर्थपंचमषष्ठप्रहरेषु दर्शशांतिः सप्तमाष्टमप्रहरयोर्जन्मनि कुहूशांतिर्विधेया अत्रामावास्याभेद
त्रयं शांतिनिमित्तमेव अन्यत्र कुहूसिनीवालीरूपं भेदद्वयं ज्ञेयमिति अथ प्रकारः सिनीवालीप्रसूतास्याद्यस्य भार्या पशुस्तथा गवाश्वमहिषीचैव।
शक्रस्यापि श्रियं हरेत् यं च संतति द्विजाश्चान्ये स्वप्रसादोपजीविनः वर्जयेत्तानशेषांस्तु पशुपक्षिमृगादिकान् द्विजाः पक्षिणः कुहूप्रसूतिरित्यर्थः सर्व।
दोषकरी मता यस्य प्रसूतिरेतेषां तस्यायुर्धननाशिनी नारी विना विशेषेण परित्यागो विधीयते परित्यागात्तत्र शांतिं कुर्याज्ज्ञात्वा विचक्षणः प्रतिमां का
रयेच्छुभां श्चतुर्भुजसमन्वितां त्रिशूलखड्गवरदाऽभयहस्तां यथाविधि इंद्रश्चतुर्भुजो वज्री कुशपाणिः सिमापिकः रक्तवर्णो गजारूढो यतइंद्रेति मंत्रतः

हो॰ र॰ पितरः कृष्णवर्णाश्च चतुर्हस्ता विमानगाः पक्षरक्षस्तु रक्तकमंडलुमयाणां च धारिणः येसन्त्या इति मंत्रेण पुजां कुर्याद्दनेनरं कलशस्थापनपूजादिपूर्वं व
२५ त् समिदाज्यचरोर्होमं तिलमाषैश्च सर्षपैः अश्वत्थप्लक्षपालाशसमिद्भिः खदिरैः शुभैः अष्टोत्तरशतं मुख्यं प्रत्येकं जुहुयाद्बुधः त्र्यंबकेन मंत्रेण तिला
न्याहुतिभिर्हुनेत् शंकरस्याभिषेकं च कुर्यादाज्यावलोकनं अन्यत्सर्वमभिषेकादि पूर्ववत् इति सिनीवालीकुहूशांतिः अथानोदर्शजातानां माताऽपि
त्रोर्द्विहतानदोषपरिहाराय शांतिं वक्ष्यामि नारद तत्र संकल्पं विधाय तन्मध्ये कलशं स्थाप्य तन्मध्ये निक्षिपेद्द्रव्यं दधिक्षीरघृतादिकं न्यग्रोधोदुंबरो
श्वत्थासुवनानि वकास्तथा एतेषां वृक्षमूलानां त्वगादीन्पल्लवांस्तथा पंचरत्नानि निक्षिप्य वस्त्रयुग्मेन वेष्टयेत् तत्र सर्वे समुद्रा इति आपो हिष्ठादि
सूक्तेन १ कयानश्चित्र २ यत्किंचेदं ऋचा समुद्रज्येष्ठा इत्यृचा अभिमंत्र्य उदककुंभेन तमग्निं पूर्वमभिषेचयेत् दर्शश्च देवताया श्च सोमसूर्यस्वरूपताः प्र
तिमा स्वर्णजां नित्यं राजतीं नामजातया आप्यायस्वेति मंत्रेण सविता पश्चात्तमेव च उपचारैः समाराध्य ततो होमं समाचरेत् समिधश्चरुद्रव्यं क्र
मेण जुहुयाद्गृही हुनेत्सवितृमंत्रेण सोमो धेनुं च मंत्रतः अष्टोत्तरशतं वापि अष्टाविंशतिसंख्यया अभिषेकादि पूर्ववत् हिरण्यं राजतं चैव कृष्णा धे
नुश्च दक्षिणा ब्राह्मणान्भोजयेत्तत्र कारयेत्स्वस्तिवाचनं इति दर्शशांतिः कृष्णपक्षे चतुर्दश्याः प्रसूतेः षड्विधं फलं चतुर्दशीं च षड्भागां कुर्यादाद्ये शुभं फलं
द्वितीये पितरं हंति तृतीये मातरं तथा चतुर्थे मातुलं हंति पंचमे वंशनाशनं षष्ठे तु धनहानिः स्यादात्मनो वंशनाशनं तस्मात्सर्वप्रयत्नेन शांतिं कुर्याद्विधान
तः प्रतिमां कारयेच्छंभोः कर्षमात्रसुवर्णतः तदर्धार्धेन वा कुर्यात्सर्वलक्षणसंयुतां वृषभे च समासीनं वरदाभयपाणिकं शुद्धस्फटिकसंकाशं श्वेतमाल्यां
बरान्वितं त्र्यंबकेन मंत्रेण पूजां कुर्याद्विधानतः तत्र मूलशांतिवत्कलशस्थापनं कृत्वा तत्र शंभुपूजां विधाय तत्र आवाह्य वारुणैर्मंत्रैरनेनैव विधानतः रु एम
मं मे वरुणेत्यनया तत्त्वायामीत्यृचा तथा त्वन्नो अग्ने इत्यनया स त्वन्नो इति मंत्रतः आग्नेयं कुंभमारभ्य पूजां कुर्याद्यथाक्रमात् आनो भद्रा इत्यनेन सूक्तेन भद्राग्ने २५
श्च सूक्तं च पवमानं पुरुषसूक्तं च कद्रुद्रेति क्रमाद्यजेत् ईश्वरस्याभिषेकं च ग्रहपूजां च कारयेत् समिदाज्यचरुं चैव तिलमाषांश्च सर्षपान् अश्वत्थप्लक्ष

लाशसमिद्भिः खादिरैः शुभैः अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा अष्टाविंशतिमेवापि होमं कुर्यात्पृथक्पृथक् त्र्यंबकेन मंत्रेण तिलान् व्याहृतिभ
भिः क्रमात् ग्रहानेवं च होतव्याः स्वस्वदुक्तविधानतः अन्यत्सर्वमाज्यावलोकनादि पूर्ववत् इति क सचतुर्दशीजननशांतिः एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वापि
तृपुत्रयोः प्रसूतिश्च तयोर्मृत्युर्भवेदेकस्य निश्चयात् अत्र विशेषमाह वसिष्ठः पित्रोर्वा जन्मनक्षत्रे जातं तु पितृमातृहा जन्मर्क्षांशे च तत्त्वेन गांतः सद्योमृ
तिप्रदः मातृपितृभेकन्याजन्मनिषेधमाह देवकीर्तिः यद्येकस्मिन्धिष्ण्ये जायंते दुहितरोऽथवा पुत्राः पित्रोरंतरकराः सुर्यद्यपरस्मीतिस्तु लाभ्यात् अपरे
ऽन्यनक्षत्रे गर्गः यस्यैव जन्मनक्षत्रे जायेत भ्राता सुतोऽथवा सजातीयः सजात्या वा सोस्य प्राणान्प्रबाधयेत् नक्षत्रशांतिं प्रवक्ष्यामि सर्वाचार्यमतेन तु अग्नेरी
शानभागे तु नक्षत्रप्रतिमां ततः नक्षत्रोक्तमंत्रेणाचार्चयेत्कलशोपरि रक्तवस्त्रेण संछाद्य वस्त्रयुग्मेन वेष्टयेत् स्वस्वशाखोक्तमार्गेण कुर्यादग्निमुखं
ततः अनेनैव तु मंत्रेण जुहुयादष्टोत्तरं शतं प्रत्येकं समिद्भिः साज्यैः प्रायश्चित्तात्मकं च अभिषेकं ततः कुर्यादाचार्यः पितृमात्रयोः वस्त्रालंकारगोदानैरा
चार्यं पूजयेत्ततः अग्निभ्यो दक्षिणां दद्यात् माषत्रयसुवर्णकं देवताप्रतिमादानं धान्यवस्त्रादिभिः सह यानमश्वासनादीनि दद्यात्तद्दोषशांतये भोजये
त् ब्राह्मणान्सर्वान्विप्रान्शान्तविधानतः इत्येकनक्षत्रशांतिः अथ त्रीन्नरशांतिः सुतत्रये सुता चेत्स्यात्सुतात्रये वा सुतो यदि मातापित्रोः कुलस्यापि तद्धा
निः स्यात्तदा जाते एकादशाहे द्वादशाहे शुभे दिने आचार्यमृत्विजो वृत्वा ग्रहयज्ञपुरःसरं ब्रह्मविष्णुमहेशेंद्रप्रतिमाः स्वर्णनाः कृताः पूजयेद्धा
न्यराशिस्थकलशोपरि शक्तितः पंचमे कलशे रुद्रं जपेत्तु रुद्रसंख्यया रुद्रसूक्तानि चत्वारि शांतिसूक्तानि सर्वशः द्विजश्चैको जपेद्धोमकाले तु विसमा
हितः आचार्यो जुहुयात्तत्र समिदाज्यतिलान् चरुं अष्टोत्तरसहस्रं वा शतं वा विंशतिस्तु वा देवताभ्यो ग्रहर्त्विग्भ्यो आदित्येभ्यो ग्रहपुरःसरं कांस्याज्यवीक्षणं
कृत्वा शेषं पूर्ववदाचरेत् इति त्रीन्नरशांतिः अथ प्रसवविकारशांतिः वसिष्ठः हीनकाले ऽधिककाले प्रसवे सति योषितां असंख्यादिवसेष्वप्रसवे वा
विनाशनं अमानुषाणि चांडानि जायंते ऽन्यांडजानि च हीनांगान्यधिकांगानि अनंगानि भवंति च विशिरो द्विशिरस्त्रिशिरसो विमुखाः पक्षिसन्निभाः विनाशं

हो॰२ तस्यदेशस्य कुलस्य च विनिर्दिशेत ॥ मासत्रयांतरे न्यूनं यश्च चक्रागमं वदेत गर्गः ॥ अप्राप्तवयसं गर्भो द्विचतुष्यात स्त्रियोपि वा अतुल्या विनताश्वापि प्र
२५ जायंते न यो भवेत विमुखाः पक्षिसदृशास्तथार्धपुरुषाश्च वा वडवा हस्तिनी गौर्वा यदि युग्मं प्रसूयते विजनाविकृता वापि षड्भिर्मासैः निपक्षय प्र
सूतिफलं षण्मासात्परतो भवतीत्यर्थः त्यक्तव्याः परदेशेषु भार्या सा स्वहितार्थिना त्यक्त्वा दिवानिशं होमं पूर्ववत्कारयेज्जपं प्राजापत्येन मंत्रेण
समिदाज्यचरुक्रमात द्विजान्संतर्पयेदन्नैर्गृहशांतिं च कारयेत हुत्वा च तर्पयेद्विद्वान वहुस्वर्णांसु भोजनैः एवं यः कुरुते सम्यक तस्माद्दोषात्प्रमुच्यते अतु
त्वानास्तिकाद्वा लोकाद्वक्ष्यते सर्वसंकरात ॥ इति प्रसवविकारशांतिः ॥ अथ सूर्यचंद्रग्रहणसमयजननशांतिः ॥ ग्रहणे चंद्रसूर्यस्य प्रसूतिर्यदि जायते व्याधिपी
डा तथा स्त्रीणां मातुरं तु दृशो नातः शांतिं तेषां प्रवक्ष्यामि नराणां हितकाम्यया यस्मिन्नृक्षे विशेषेण ग्रहणं संप्रजायते तदृक्षाधिपतेरूपं सुवर्णेन प्रक
ल्पयेत यथाशक्त्यानुसारेण वित्तशाठ्यं न कारयेत सूर्यग्रहे सूर्यरूपं सुवर्णेन स्वशक्तितः चंद्रं चंद्रग्रहे धीमान रजतेन विशेषतः राहुरूपं प्रकुर्वीत नागेनैव
विचक्षणः ॥ नागेन सीसकेन ॥ शुचौ देशे प्रयत्नेन गोमयेन प्रलेपयेत तस्योपरि न्यसेद्धान्यान नववस्त्रं सुशोभनं रूपाणां चैव रूपाणां स्थानं तत्र तु कारयेत
रक्ता सत्वरक्तगंधरक्तपुष्पांबराणि च सूर्यग्रहे प्रदातव्यं सूर्यप्रीतिकरं च यत श्वेतवस्त्रं श्वेतमाल्यं श्वेतगंधाक्षतादिभिः चंद्रग्रहे प्रदातव्यं चंद्रप्रीतिकरं च य
त राहवे चैव दातव्यं कृष्णपुष्पांबराणि च दद्यान्नक्षत्रनाथाय श्वेतगंधानुलेपनं सूर्यं संपूजयेद्धीमान आकृष्णेनेति मंत्रतः चंद्रग्रहे कपालाशोः समिद्भिर्जु
हुयान्नरः दूर्वाभिर्जुहुयाद्धीमान राहोः संप्रीणनाय च समिद्भिर्ब्रह्मवृक्षात्त्र्यैभेशाय जुहुयाद्बुधः भेशाय नक्षत्राधिपतये आज्येन मंत्रेणैव तिलैश्च जु
हुयात्ततः पंचगव्यैः पंचरत्नैः पंचत्वक्पंचपल्लवैः जलैरोषधिकल्कैश्च सहितैः कलशादकैः औषधिकल्कैः सर्वौषधिकल्कैः अभिषेकं प्रकुर्वीत यज
मानस्य यत्नतः मंत्रैर्वारुणदैवत्यैरापोहिष्ठादिभिस्त्रिभिः इमं मे गंगे पितरस्तत्त्वायामीति मंत्रकैः अभिषेके निवृत्ते तु यजमानः समाहितः आचार्यं पूज
येत्पश्चात्कुंशांतो विजितेंद्रियः तस्मै दद्यात्स्वपत्नीं भक्त्या प्रतिकृतित्रयं दक्षिणाभिश्च संयुक्तं यथाशक्त्यानुसारतः ब्राह्मणान्भोजयित्वा तु प्रणिपत्य

...धिजन्मनः समाहितः ॥ अनेनविधिनाशांतिंकृत्वासम्यग्द्विजोषतः अकालमृत्युशोकंचव्याधिपीडानचाप्नुयात् सौख्यं
सामनसंनित्यंसौभाग्यंलभतेनरः इत्थंग्रहणाजानानांसर्वारिष्टविनाशने कथितंभार्गवेनदृष्टानकापमहात्मने इतिशौनकोक्तग्रहणजननशांतिः
इतिजन्मनिशांतपोदृष्टकालः ॥ अथजन्मनामज्ञानार्थंहोराचक्रमुक्तंज्योतिषार्के ॥ चूचेचोलाश्विनीज्ञेयालिलुलेलोभरण्यथ आईउएकृत्तिकास्यादोवावि
वुरोहिणी वेवोकाकिमृगेवर्णाःकुघङछार्द्रकामता केकोहहिसप्तमभेहुहेहोडाथपुष्यंडिडूडेडोमताश्लेषामघामामिमुमेमता मोटाटिटुभयेत्पू टेटो
यप्युत्तराभमता हस्तंपूषणाठः प्रोक्तश्चित्रापेपोररिस्मृता रूरेरोतास्मृतास्वातीति तुतेतोविशाखिका नेनिनुनेअनुराधाज्येष्ठानोयायियुस्मृता येयोभ
भिभवन्मूलंपूर्वाषाढाभुधाफढा भेभोजज्युत्तराषाढाजुजेजोषाभिजित्स्मृता खखिखुखेश्रुतेर्वर्णा भवद्गिगुगेवपुः शततारागोससिसुपूभासेसोदि
स्मृता दूथझञोत्तराह्नेयादेदोचचितुरेवती अचाश्विनीप्रथमचरणजातस्यचूडामणिरितिनामज्ञेयं अचरोघहूस्वस्वरयोर्भेदोनास्तीति उक्तंच स्वरोद
येशेषादशस्वरास्तेषुस्यादेकेकोर्द्विकेद्विके होराचक्रसमूलंशतपदचक्रोद्धारएवज्ञेयं अचव कारशकारयोः वकारसकाराभ्यांसहाभेदाद्रोहिणीशत
भयोर्द्विचरणोज्ञेयो उक्तंस्वरोदये वेवोसशोरवषौवेवजयोडञोपरस्परमिति ननुउत्तराषाढचतुर्थचरणजन्मनिउत्तराषाढचतुर्थचरणाक्षरादिकंनाम
अभिजिन्नामनक्षत्रवर्णादिकंवाकर्तव्यं अत्रयद्यपिउत्तराषाढचतुर्थचरणोभिजिच्चरणत्रयेजकाराक्षरएव तथापिमात्राभेदान्नामस्वरूपभेदःस्याद्वि
रूढं अत्रकेचिदुत्तराषाढचतुर्थचरणस्याभिजिन्मध्यगणनयाजकारकथनंव्यर्थतास्यादतोभिजिद्भागस्यपंचविभागान्कृत्वा आद्येविभागेजकाराक्षरेण
नाम अन्यविभागचतुष्टयेऽभिजिद्वर्णोनामकर्तव्यं नैतद्युक्तं यतउत्तराषाढनक्षत्रस्यसमाविभागानभवंति अपरेतुचरणशब्दंपंचदशघटिकोपल
क्षिकंमत्वापराषोडशघटिकात्मकश्चरणस्तदांचतुर्थचरणाद्यघटिकायांजकाराक्षरेणनाम अन्य घटिकासुअभिजिदक्षरैर्नामकर्तव्यमितिवदंति
एतदपिनरम्यं यतःपंचदशघटिकात्मकंचरण ॥

ज्यो॰ र॰ मितिनियमाभावः नन्वनूत्वेपिजकारणस्य स्नानाशान्व अन्येतु उत्तराषाढनक्षत्रस्यसंपूर्णभोगघटीनांमध्येचतुर्थांशंत्यक्त्वा उर्वरितस्य घव्यादेश्चतुर्थ।
२६ चरणाःकार्याः अथोत्तराषाढचतुर्थचरणघटीनांश्रवणसंपूर्णभोगनिश्चयंशयुतानांचतुर्थचरणाअभिजिन्नक्षत्रसंबंधिनः कार्याः स्वतिश्चयंशहीनस्य
श्रवणनक्षत्रस्यसंपूर्णभोगस्यचतुर्थचरणाःकार्याः पूर्वविभागेउत्तराषाढनक्षत्रासूरैर्नाममध्येऽभिजिद्दर्शांशांत्येविभागेश्रवणनक्षत्रासूरैर्नाम
कर्त्तव्यमितिवदंति युक्तंतत् यतस्त्रयाणांसमाः विभागाभवंतिसिद्धांतेपि उत्तराषाढाभिजिन्नक्षत्रयोर्विभागेअविरोधएवोक्तः इत्यलमतिप्रसंगे
नअथजन्मपत्रीलेखनक्रमोलिख्यतेजानकाभरणे सन्मंगलाशीर्वचना न्वितालिपया निवापेसमुदाहियंते तान्येवंपत्रीकरणप्रवीणाः अयंस्क
णिप्रथमंलिखंतु मुंडामंडलसंप्रसारकलनैर्मौलिस्थलादोलनैर्नेत्रोन्मीलनमीलनैरविरलक्रीकर्णतालक्रमैः स्नानालिख्वनितैर्विलासरचितै
रुध्याननोद्दर्जितैः जानानंदभरःकरींद्रवदनोवःश्रेयसेकल्पतां १ पुनर्मंगलमूर्तिस्मरणंप्रत्यूहनिकारणाकरमितिपद्यांतरं नानादानविधानयत्न
निवहैरुग्रैस्तपोभिश्चिराज्जातेकल्पतरौप्रकल्पितफलावाप्तिःकथंविद्यते नृणांयच्चरणांबुजस्मरणतः संपूर्णकामः पुमान्सोयंचाभिमतंददातु
सततंहेरंबकल्पद्रुमः २ स्नानसावासनिवासहंसीवर्णावतंसीकृतपद्मकोशा तोषादशेषाभिमतंविशेषादेषापिभाषाभवतांददातु कल्याण
निदिवामणिः सुललितांकांतिकलानांनिधिर्लक्ष्मींक्ष्मातनयोबुधश्चबुधतांजीवश्चिरंजीवितां साम्राज्यंभृगुजोर्कजोविजयतांराहुर्बहुत्कर्षतां
केतुर्यच्छतु नत्सर्वांछितफलंपत्रींयदीयोनमां ४ उपार्जितंयत्सदसद्धिमिश्रंजन्मांतरेकर्मनरैरिदानीं हेमागमस्तस्यविपाकमुच्चैर्दशाक्रमेणाप्रक
टीकरोति ५ साक्षाद्वेदांगनिरीक्षणाय सुनिर्मलादर्शनलंकिलेदं शास्त्रंविपद्दारिनिधिप्रनर्त्तुं नरस्तथार्थार्जनयानमित्रं ६ आधानकालेक। राम
मलोद्भवेनवर्णावलीभालतलांतराले याकल्पितापश्यतिदैवविज्ञोहोरागमज्ञानविलोचनेन ७ होरागमव्योमचरानुसारस्तेषांविचारः सुनरा। २६
मुखरःसिद्धांतएवाकलनंनदासाऽभ्यासोयदिस्यात्प्रणितद्यस्य ८ अपारहोरागमपारगामीपाद्यांचवीजेनिजरांप्रगल्भः नज्ञोत्रविद्याकुशलः।

सएव भवेत्फलादेशविधौ समर्थः ९ श्रीजन्मपत्री शुभदीपकेन व्यक्तं भवेद्भाविफलं समग्रं क्षपाप्रदीपेन यथालयस्थं घटादिजातं प्रकटत्वमेति १०
याजन्मपत्री विमलानयस्य तस्यैव जीवनं संततमंधकं स्यात् अनल्पमल्पं च ततोत्यकं वा नकस्य ते भाग्यमतीव हेतोः जन्मकालतिथिवारतारकाश्च ये यो
गकरणाह्वरणाभिधाः मंगलाय किल संतु पत्रिका यस्य शास्त्रविहिता विरच्यते १२ ये वक्ष्यमाणा इह राजयोगाः रश्मिप्रभूतास्त्वपि नाभसाश्च ये कार
काः पूर्णफलं हि तूर्णं यच्छंतु पत्री क्रियते यदीया १३. यस्यामलेयं किल जन्मपत्री कुतूहलेन क्रियते यथोक्ता तस्यालये सन्त्वकमला सलीलं सुनिर्मला
तिष्ठतु दीर्घकालं १४ अथाशीर्वादश्लोकाः देवलिखनानंतरं पुरुषविचारः पूर्वोक्तः लेखनीयः ततः पितामहसोमरोमशसौरपुलस्तिवसिष्ठबृह
स्पतिगर्गादितंत्रमतानुसारेण श्रीश्वेतवाराहकल्पप्रवृत्ते गताब्दास्तथा सकलभुवनजननिदानकमलभवप्रवर्त्तितभचक्रभ्रमणयोगसमनसमय
तः प्रवृत्ताः सृष्टितो गताब्दाश्च लेखनीयाः ततो गतकलिवर्षसंवत्सरशकप्रभवादिषष्ट्यब्दायनऋतुमासपक्षतिथिवारनक्षत्रयोगकरणयोनि
गणवर्णवर्गडिंभचक्रादिभदशादिनमानरात्रिमानार्कभुक्तांशेष्टकाललग्नषड्वर्गादिभिर्यथायोग्यप्रशस्तिसहितं पित्रादिनामपूर्वकं जन्मसमयो ले
ख्यः जन्मसमयो नाम जन्मकालावयवः तत्र कालनाम किं तदुच्यते उक्तं च जातकसारे कालः सृजति भूतानि कालः संहरते प्रजाः कालः सुप्तेषु जागर्त्ति
कालो हि दुरतिक्रमः विष्णुपुराणेपि कालः सृजति भूतानि सर्वाण्येव महात्मनां काले संपक्वसत्त्वेनैव सहाव्यक्ते लयं प्रव्रजेत् कांते ब्रह्मणोनंतेन ब्रह्मणास्सं
हृष्यते अनादिपुरुषेव वसिष्ठसंहितायां कालएवेश्वरः साक्षादीश्वरः कालएव सः विद्यते त्वेश्वरो ज्ञानी चेत्कालज्ञः स एव हि तस्मात्कालं न जानंति ये यो
गिनोपि महीतले तथापि दृहितानां नूनं हिताय कमलात्मनः भचक्रे भ्रमणात्स्थूलकालः कल्पितवान्प्रभुः प्राणादिर्मासाब्दयुगांतं चैव नवग्रहैरिति सूर्य
सिद्धांतेपि भूतानामंतकृत्कालः कालोन्यः कमलात्मकः स द्विधा स्थूलसूक्ष्मत्वान्मूर्त्तश्चामूर्त्तउच्यते प्राणादिः कथितं मूर्तः त्र्युट्याद्यो मूर्त्तउच्यते दशगुर्व
क्षरोच्चारैरेकः प्राणः प्रकीर्त्तितः षड्भिः प्राणैर्विनाडी स्यात्तत्षष्ट्या नाडिका स्मृता नाडीषष्ट्या तु नक्षत्रमहोरात्रं प्रकीर्त्तितं तत्त्रिंशता भवेन्मासो भगणोद्भवः।

शैवतइति ततोजन्मकुंडलीसूर्यादिनवग्रहसहितालेख्या उक्तंचजातकसारे कालोयंभगवान्विष्णुरनंतः परमेश्वरः तद्वेलापूज्यते सिद्धिः पूज्यकोन्यनमोमतः
सचलग्नाश्रितः कालस्तस्माद्यग्रंचयद्भवेत् वर्षेवाजन्मकालेवातस्माद्वाच्यंशुभाशुभं अन्यत्रापिशक्तिहरेः कुंडलिनीतिनामग्रहर्क्षचक्रमवि
भक्तदेहालग्नादिभावान्यविकल्प्यवागानसं सूचयंतीजगतांफलानि विनालग्नंमनुष्याणांग्रहाश्चफलदानहि शुभाशुभेतुदेहस्यनतुजीवंविनायथा कु
ंडलीस्वरूपमुक्तंजातकाभरणे भिन्नंद्वादशधाविधायविलसच्चक्रंचतत्रन्यसेत् लग्नाद्द्वादशराशयोनिविशदावामागमार्गक्रमात् अंकास्तत्रनभश्चरास्फु
टतराशौचयत्रस्थिताः तेभ्यःसाधुफलंत्वसाधुसुधियावाच्यंहिहोरागमात् ततःपूर्वोक्तसिद्धांतमार्गेणागणितः कल्प्याद्यहर्गणः तथासृष्टेराद्यहर्गणा
त्समुत्पन्नाः मध्यमाःग्रहाश्चलेख्याः ततःस्वजन्मदेशीयपूर्वापरदेशांतरयोजनपलभाचरखंडलग्नमानपलानिलेख्यानिततोरव्यादिग्रहाणांमंदके
द्राणिमंदफलसहितानिभौमादीनांशीघ्रकेंद्राणिशीघ्रफलानिचलेख्यानि ततःसूर्यादयोग्रहाःस्वजन्मदेशीयोदयांतरभुजांतरचरांतरदेशांतरबीज
संस्कारसंस्कृताःस्पष्टाःसगतत्यस्तात्कालिकाःलेख्याः उक्तंचशिरोमणौ यात्राविवाहोत्सवजातकादौखेटैःस्फुटैरेवफलंस्फुटत्वं जातकसारेपि विवा
हेजातकेयात्राप्रश्नवास्तुव्रतादिषु ज्योतिःशास्त्रात्फलंसर्वंप्रस्फुटंद्युचराश्रयमिति तत्रब्रह्मार्यसौरादिपक्षभेदेसति सर्वेषांपक्षाणामाप्तवाक्यतयाप्रमा
णत्वेसतिकस्मात्पक्षात्ग्रहसाधनंकर्तुमुचितमित्युक्तं जातकसारे जातकादिषुसर्वत्रग्रहैर्ज्ञानंप्रजायते तस्माद्गणितदृक्तुल्यंस्वतंत्रात्साधयेद्ग्र
हान् वसिष्ठेपि यस्मिन्पक्षेयत्रकालेदृश्यतेगणितैक्यकं तेनपक्षेणतेकार्याः स्फुटास्तत्समयोद्भवाः दामोदरपद्धतौच यांतिसंसाधिताः खेटाः येनदृ
ग्गणितैक्यकंतेनपक्षेणतेकार्याःस्फुटास्तत्समयोद्भवाः इतितत्रग्रहानयनमार्षशास्त्रैव कर्तुंयुज्यते ननुमानुषात्स्पष्टयथार्थत्वादितिचेत्तत्रग्र
हानयनेमुनिकृतशास्त्रादेककर्तुमुचितं परंतुतत्रापिकालवशेनांतरंपतति उक्तंचसूर्यसिद्धांते शास्त्रमाद्यंतदेवेदंयत्पूर्वंप्राहभास्करः युगानांपरिवर्ते
नकालभेदोत्रकेवलः वसिष्ठसिद्धांतेपि इत्थंमांडव्यसंक्षेपादुक्तंशास्त्रंमयोत्तमं विस्तरस्तीरविचंद्राद्यैर्भविष्यतियुगेयुगे विस्रसनंविस्रस्तिशिथिलत्वमि।

तियावत् तद्बीजसंस्कारं ब्रह्मगुप्तमेकं दमिश्राद्भिर्नलिकावेधेन स्वसंतानाकालेन क्षयित्वा मुनिशास्त्रजनितेषु संग्रहेषु संस्कृतं तद्गुमेवं तथा च ब्रह्मसि
द्धांते संसाध्य स्पष्टतरं बीजं नलिकादिभ्यस्तत्संस्कृतग्रहेभ्यः कर्तव्यौ निर्णयादेशौ सिद्धांतसुंदरेऽपि मुनिप्रणीतेमनुजैः कचिन्नेदृश्यंतेततस्तत्संगतेव संस्था
ध्यं न कार्यं सर्वमन्यथेति ननु संवत्सरादिफलं लेख्यं नन्वत्र प्रभवादिसंवत्सरफलानि वक्तव्यानि तत्र प्रभवादिसंवत्सराः स्विवृत्तिः वेदांगज्योतिषे मा
घशुक्लप्रतिपत्प्रवृत्तपौषकृष्णसमाप्तिनः इत्यनेन चांद्रमानेनोक्ताः शालिवाहनशकोर्कः १२ संगुणाः षष्टिहृत्प्रभवपूर्ववत्सरा इत्यनेन केऽपि सौरमानेनो
क्ताः इयं द्विषष्टिः परिवत्सराणां बृहस्पतेर्मध्यराशिभोगादित्यनेन श्रीपतिना बार्हस्पत्यमानेनोक्ताः तत्र कः पक्षः साधीयानिति तदुच्यते तत्र प्रभवादि
प्रवृत्तिर्बार्हस्पत्यमानेनैव रमणीया यतः सूर्यसिद्धांतेमानानंत्युदासपूर्विका बार्हस्पत्यमानपुरःसराः षष्ट्यब्दगणनोक्ता बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यै
स्तु नित्यशः इति भास्करोऽपि बृहस्पतेर्मध्यमराशिभोगं संवत्सरं सांहितिकाः वदंति अनेन मध्यमगुरुराशिपूरणसमय एव षष्ट्यब्दप्रवृत्तिरिति सूचितं फ
लनिर्देशस्तु गुरुमानोत्पन्नसंवत्सराणामेवेत्याह वसिष्ठः षष्ट्यब्दजन्मप्रभवादिकानां फलं च सर्वं गुरुमानतः स्यात् वेदांगज्योतिषवचनं तु प्रभवप्र
वृत्तिकविषयकं ज्ञेयं यदाह गर्गः माघशुक्लसमारंभे चंद्रार्कौ वासवर्क्षगौ जीवयुक्तौ यदा स्यातां षष्ट्यब्दादिर्यदा भवेत् तृतीयपक्षस्तु मूलाभावादुपेक्ष्य
इत्यलं प्रसंगेन अथात्र प्रभवादिसंवत्सरफलं यवनजातके प्रसूतिः सर्ववस्तूनां पुत्रसंपत्तिरेव च दीर्घायुर्भोगसंपन्नः प्रभवे जायते नरः १ उत्पन्नः भु
क्तभोगी स्यात्कृष्णाक्षः कमललोचनः पंडितो राज्यपूज्यश्च विभवाब्दे नरो भवेत् २ सुभगः शांतिमान्भोगी पुत्रदारसमन्वितः विद्वान्सर्वगुणोपेतः शुक्लसंव
त्सरे भवेत् ३ सदानंदयिता सत्यवादी च पश्चिमो नरः स्वर्णकांतिः सुखी मानी प्रमोदे जायते शिशुः ४ प्रजानां पालको धर्मी कृपासत्यसमन्वितः देवब्राह्म
णभक्तश्च प्रजापतिसमुद्भवः ५ कामी सुखी च मानी च भोगवान्प्रियवल्लभः दीर्घायुर्बहुपुत्रश्च अंगिरो वत्सरे भवेत् ६ श्रीमान्सुखमतिः शांतः सोपरागः
सुभप्रियः दीर्घायुर्बहुपुत्रश्च श्रीमुखेऽब्दे भवेन्नरः ७ भावसंवत्सरे जातो नरो भवति सौख्यभाक् यशस्वी दाननिरतः सर्वलक्षणसंयुतः ८ कीर्तिसर्वगु

कोपेनोदीर्घायुर्दानतत्परः शांतः शुभमतिः शौचीयुवाब्दे पुरुषोभवेत् १० दीर्घायुःशुभगोदक्षोवेदाध्ययनतत्परः सुरूपोजायते मर्त्योधातृसंवत्स
रेयदि १० सर्वज्ञःसर्वकार्येषुगुरुभक्तोतिसुंदरः ईश्वरेजायतेमर्त्यःसदाक्रोधधरोभवेत् ११ वापीकूपतडागादिकृत्तुधर्मसमन्वितः दाताधनसमृद्ध
श्चबहुधान्येप्रजायते १२ सेनानीर्नृपमंत्रीचवरलब्ध्यपिनाकधृक् शास्त्रज्ञःसंग्रहीचैवप्रमाथीवत्सरेभवेत् १३ उग्रप्रतापशीलश्चपरराज्यविमर्दकः
पापकर्मरतःशूरोविक्रमाब्देभवेन्नरः १५ मंदोलसोमहामूर्खोभारवाहीचकेवलं परकार्यरतोजातोवृषाब्देबालकोभवेत् १६ चित्रभानुःसमुद्भूतोन
रोविद्यानिधिर्भवेत् नीतिमान्धृतिमान्श्रीमान्स्वामिभक्तःप्रियंवदः १६ पिंगदृक्पिंगकेशश्चगौरःश्वेतोविभुर्नृपः सुभानुवत्सरेजातोकांतिमानतिदुर्ज
नः १७ धूर्तोपापरतःशूरोदरिद्रोनिष्ठुरःखलः चंचलश्चपलोधृष्टस्तारणाब्देनरोभवेत् १८ मृदुभाषीराजमान्योराजसःशुभलक्षणः पांशुर्धनसमृद्ध
श्चपार्थिवेवत्सरेनरः १९ धूतमद्यरतःस्त्रीणांव्यसनेधनवर्जितः व्ययसंवत्सरेजातश्चोरपापमतिर्भवेत् २० सत्कर्मनिरतःशास्त्रपापरोगविचक्षणः॥
ह्रस्वःस्थूलतनुःश्यामःसर्वजित्युद्भवोनरः २१ बहुभृत्योधनीकामीभोगीमिष्टान्नभुक्प्रभुः सर्वधारिणिनाजातःसर्वधारापरोभवेत् २२ कुटुंबकल
हकर्तापरद्रुह्यरतःसदा सर्वलोकविरोधीचविरोधीवर्षसंभवः २३ ह्रस्ववर्णतनुःश्यामःकलालोलस्तुनिर्गुणःविकृतरूपवान्रूक्षश्चनरोविकृतिवर्षजः
२४. धूलिधूसरसर्वांगोदीर्घायुःपरसम्पत्कृत् कामेश्वरश्चनिर्लज्जःखरसंवत्सरेनरः २५ सदामंदेनसंतुष्टःप्रपाकूपतडागकृत् अन्नदानीसुशील
श्चनरोनंदनवर्षजः २६ शूरःसमरदुर्धर्षःख्यातकीर्तिर्यशोन्वितःपृथ्वीपतिर्जयीभोगीविजयाब्देनरोभवेत् २७ विद्वान्मानीलोकमानीसर्वशास्त्र
विशारदः पूजांप्राप्नोतिसर्वत्रजयवर्षेप्रजायते २८ उत्पन्नभोगभोक्ताचकामीचप्रियवादिनः सुखाभरणशोभाढ्यःमन्मथेवत्सरेभवेत् २९ धरःक्रू
रमतिर्दुष्टोनिर्लज्जोवृषलीपतिः वक्रास्यबाहुचरणोदुर्मुखाब्देभवेन्नरः ३० सुवर्णधनधान्यादिपशुवस्त्रसमृद्धिमान् कांत्यापत्यसुखाढ्यश्चहेमा
लंबसमुद्भवः ३१ मंदोनुद्योलसोदुःखीश्लेषणश्चापिवंचकः स्वकार्याभिरतःपापीविलंबवत्सरेशिशुः ३२ अविवेकीमहागर्वीविशीलःकुशलःस्व।

लः विकारिवत्सरे जातः प्राणी भवति वंचकः ३३ वणिक्शूरः सुहृद्दुष्टो दीर्घः कृशतनुस्तथा निद्राघूर्णितनेत्रश्च शार्वर्यव्दसमुद्भवः ३४ चंचलश्चपलः का
मी परसेवारतः सदा हलत्राताद्रू स्वतनुर्जातो वर्षे प्लवाख्यके ३५ सुभगः शुभकामी च विद्याधर्मपरायणः दीर्घायुर्धनपुत्रार्थी शुभकृद्वर्षसंभवः ३६ सु
वेत्रविजयी कामी चारुरूपो गुणान्वितः कृपालुः शोभकृद्वर्षे जातो भवति मानवः ३७ पिंगाक्षो राजको शश्च मंदगामी स्त्रीलोलुपः परकार्यविहंता च क्रोधी सं
वत्सरे नरः ३८ विश्वावसुसमुद्भूतः प्रज्ञावांश्च सुखी भवेत् शांतः सर्वगुणोपेतो दाता मिष्टान्नभुक् सुधीः ३९ परदाररतश्चैव शठः स्वपरबाधकः पराभव
समुद्भूतः धनधान्यविवर्जितः ४० लवंगवत्सरे जातः नरो भवति किल्बिषी खलः पापरतो दुष्टः स्वाचाररहितको सुधीः ४१ मध्यरूपधरः कामी सुन्निपा
सार्दितो नरः कीलके जनितो वर्षे स्थूलहृत्कूटमन्मथः ४२ पंडितो धनभोगी च बन्धुदेवातिथिपूजकः तापसः कृशदेहो नरः सौम्ये प्रजायते ४३ नीचवृत्तिः
सुधीः कामरहितः परदेशगः देवावलोकेकः क्रोधी साधारणसमुद्भवः ४४ विरोधी सर्वलोकानां पितृभक्तिविवर्जितः विरोधिकृज्जाननरो जाति
सेवाकरो भवेत् ४५ विद्वान्सर्वकलाभिज्ञो व्यापारकुशलः सुधीः राजमानी दानशीलः परिधावी समुद्भवः ४५ प्रमादिवत्सरे जातो नरो बंधुविरोधकृत्॥
कुटुंबघाती लुब्धश्च पापकर्मरतः सुधीः ४६ बहुभार्यो नितं चतुरः सर्वानंदकरः क्षमी आनंदवत्सरे जातः पुत्रमित्रसमन्वितः ४७ सर्वमसीकृतघ्नश्च
धर्माधर्मविवर्जितः हिंसकः बहुसंतापी राक्षसेव्दे भवेन्नरः ४८ वैश्यवृत्तिर्धनी चैव कुटुंबबहुलः सुधीः जलसंग्रकरो जातो नलसंवत्सरे नरः ५० कृ
शः कर्कशरोमा चामहोद्यमकरो भवेत् फलकालपरित्यागी पिंगलाब्दे भवेन्नरः ५१ लोकोपकारकः कालिभक्ष्याभक्ष्यं न संत्यजेत् कालयुक्तसमुद्भूतो न
रो भवति रोगकृत् ५२ ऋद्धिसिद्धियुतो नित्यं भोगी गीतविशारदः मंत्री कीर्तिपरः सदाता सिद्धार्थीवर्षसंभवः ५३ भयंकरवधूः पापी पिशुनः पापकृद्भवेत् रौ
द्रसंवत्सरे जातो नरः स्वल्पायुषो भवेत् ५४ मूर्खः क्रूरयुतः कामी स्वकीयवचनप्रियः अदाता धनवांश्चैव दुर्मतिर्वत्सरे नरः ५५ नित्योत्साही क्षितिपतिर्ग
जाश्वबहुसैनिकः वादित्रघनसौख्याढ्यो दुंदुभिर्वर्षसमुद्भवः ५६ कामलोभी महादोषः शस्त्रपीडातिपीडितः दुष्कर्मा कुत्सी जातो रुधिरोद्गारिवत्सरे

५७ नेत्ररोगीसदामंदहृष्टिर्दंभकरः सदा दुर्जनः कामवक्तुलोरक्तोक्षीवर्षजोनरः ५८ तापसोनिर्गुणः क्रूरो धातुवादीभयंकरः क्रोधनाब्देनरोजातोवंचकःस्मा।
पवृद्धिमान् ५९ उत्पन्नरोगरूपस्थपरसेवारतः सदा क्षयसंवत्सरेजातोनरोधर्मविवर्जितः ६० इतिसंवत्सरफलं अथप्रकारांतरेणसंवत्सरफलं धर्मिष्ठो
गायनः श्रीमान्सर्वदासुखसंयुतः दानेदानपरश्चैव प्रभवादिषुपंचसु १ सर्वज्ञः सुप्रतापीचदीर्घायुर्दर्शनप्रियः नरेंद्रसदृशोलोकेश्रंगिरादिषुपंचसु २
युद्धजेताधनेदाताभोगीत्यागीगुणान्वितः दक्षः संपन्नविभवोईश्वरादिषुपंचसु ३ सदाक्रोधीसदावक्रः कामशास्त्रवसंगतः निर्लज्जः साभिमानीचचित्रभान्वा
दिपंचसु ४ शिल्पी संगीतशास्त्रज्ञोनिपुणः सर्वकर्मसु सुभगश्चचिरंजीवी सर्वजिन्वादिपंचसु ५ कांताप्रियश्चसुभगउत्साहीमानसंयुतः कीर्तिमान्गुणमांश्चैव
नंदनादिषुपंचसु ६ आवैविदेशवासीचपितृभक्तोजितेंद्रियः सत्यवाक्शौचनिपुणोहेमलंबादिपंचसु ७ निपुणोधर्मनिरतोदेवसाधुप्रपूजकः अर्थवा।
दीर्घसूत्रीचसुभकृत्वादिपंचसु ८ सर्वसहश्चधीरश्चशांतात्माविजितेंद्रियः दीर्घायुः पुत्रवांश्चैवप्लवंगादिषुपंचसु ९ रूपवानभिमानीचकामिनीजनवल्ल
भः दीर्घरोगीमहातेजाः परिधाव्यादिपंचसु १० आरोग्यविजयंपुष्टिधनधान्यसमन्वितः देवतापरभक्तश्चपिंगलादिषुपंचसु ११ जनमित्रप्रतापीचधर्म
वांश्चजितेंद्रियः दीर्घायुः कुशलोदक्षोदुंदुभ्यादिषुपंचसु १२ इतिसंवत्सरफलं अथषष्टिसंवत्सराणांद्वादशयुगानिभवंतियतः युगंभवेद्वत्सरपंचकेन
अथफलं मद्यमांसप्रियोनित्यंपरदाररतः सदा कविः शिल्पिरतः प्राज्ञोजायतेप्रथमेयुगे १ वाणिज्यव्यवहारीचधर्मिष्ठः सत्यसंगमः द्रव्यलाभेतुपापा
त्मायुगेजातोद्वितीयके २ भोक्तादाताक्वतीप्राज्ञोब्राह्मणोदेवपूजकः तेजस्वीधनयुक्तश्चतृतीयेफलमश्नुते ३ वाटिकाक्षेत्रलाभः स्यादोषधीप्रियमानवः
धातुवादेधननाशोजायतेचचतुर्युगे ४ पुत्रोत्पत्तिः सदाप्रोक्तोधनवांश्चजितेंद्रियः मातृपितृप्रियश्चैवजायतेपंचमेयुगे ५ सर्वदाशत्रुनीचस्थोसर्वदाम
हिषीप्रियः पादघातोभयातंश्चयुगेषष्टेचजायते ६ वहुमित्रप्रियश्चैवव्यापारेकुटिलागतिः शीघ्रगामीतथाकामीजायतेसप्तमेयुगे ७ पापकर्तावसंतुष्टो
व्याधिदुःखान्वितस्तथा कर्त्ताचपरहिंसायांजायतेत्वष्टमेयुगे ८ वापीकूपतडागादिदेवदीक्षांतिथिप्रियः भूपतिर्वाभवेत्तुल्योजायतेनवमेयुगे ९ गजादिरा

जेमंत्रीचस्थानंप्राप्तिर्महीसुखं सुवेषोरूपदानार्चजायतेदशमेयुगे ११ बुद्धिमान्वसुशीलश्च प्रतिष्ठादेवतालयःसंग्रामचभवेच्छूरो [illegible]
तेजस्वीबलसत्यात्मानरमध्येमहाजनः कृषिवाणिज्यकर्ताचजायतेद्वादशेयुगे १२ इतिर्युगफलं अथायनफलंवक्तव्यम् तच्चायनंसौरमेवउक्तंच सिद्धां
ते वर्षायनर्तुयुगपूर्वकमत्रसौरादिति अत्रवर्षशब्देनसौरवर्षप्रवृत्तिर्ज्ञेया अयनलक्षणमुक्तंसोमसिद्धांते यावदर्कोनकर्कादिस्पर्शेनावदुत्तरायणंसाया
म्यायनंभवेत्तावद्यावन्मकरादिगः अत्रकेचित्तुसायनार्कवशादेवायनंप्रवृत्तिर्दर्शनादयनफलंसायनार्कसंक्रमादेवज्ञेयमिति वदंतितन्नअयनोनिरयं
नगणात्तयेवलोकेसकलव्यवहारोदृश्यते तत्रवसिष्ठसंहितायांषट्पौष्णभान् द्वादशरौद्रधिष्ण्यात्सुराधिपाद्र निनवक्रमेणपूर्वार्धमध्यापरभागगं
दुर्भुक्तेस्विल व्योमचरास्तथैवेति ग्रहाणांपूर्वार्धमध्यापरभागयोगित्वमुक्तं तच्चिरयणगणनयैवप्रत्यक्षतोगणितागतनक्षत्रेदृश्यते सायनत्वेहिग्रहाः
कदाचिदेकनक्षत्रांतरेनक्षत्रद्वयांतरेणवोपलभ्यंते एवंसतियात्रादिशुभकार्यमुहूर्तेषुमरणादिदुष्टनक्षत्राणांगुरुपुष्यादिसिद्धयोगानांचव्यवहा
रोनिरयनेनैवोपपद्यते सायनगणनात्तुनियतंविषया उक्तंच ब्रह्मसिद्धांते अयनांशाप्रदातव्यालग्नेक्रांतौचरागमे चित्रभेसत्रिभेयानेतथादृक्कर्मपा
तयोरिति अतएवशिष्टाः सायनमकरसंक्रमवशेनंप्रवृत्तोत्तरायणेविवाहादिशुभकर्माणिनकुर्वंति तत्रायनफलंयवनजातके प्रियायुतःसौख्यगुणा
न्वितश्चदीर्घायुराचारमतिःप्रवीणः देवद्विजाचार्यपदानुरक्तःसौम्यायनेजातनरोयशस्वी क्रूरःशठोरोगसुतप्रदेहःपापात्मकश्चोर्यरतःकृशश्चपौंश्च
ल्यद्वत्क्रूरमतिःशिशुश्चस्याद्दक्षिणास्यायनजातनिंद्यः इत्ययनफलं अथऋतुफलं तेषांगणनाक्रमउक्तोरत्नमालायां मृगादिराशिद्वयभानुभोगा
त्षडृतवःस्युःशिशिरोवसंतः ग्रीष्मश्चवर्षाचशरच्चतद्वद्धेमंतनामाकथितश्चषष्ठः इतिशिशिरेजायतेमर्त्योबलसौख्यविरागयुक्ःमिष्टान्नाशीशुभाचारी।
वातरोगीप्रजायुतः १ सुखीभोगीगुणीकांतःसत्यव्यसनकृद्भवेत् वसंतर्तौनरोजातःदानकीर्तिकरोभवेत् २ वापीकूपतडागादिदेवतालयकृद्भवेत् शा।
स्त्रविज्ञानदानाच्चग्रीष्मर्तौजायतेनरः ३ देशग्रामपुराध्यक्षःकृषिकर्ताभवेत्सदा शास्त्रसंग्रहणेदक्षोवर्षाजातोनरोभवेत् ४ व्यापारकुशलोमंत्रीज्वरो।

 गर्व्ववर्जितः पंडितोगुणवान्धीरोशरज्जोनरोभवेत् ५ सौधागारनिवासीच धर्मिष्ठः सत्यवाक्शुचिः भुंजतेमिष्टमाहारंनरोहेमंतसंभवः ६ अत्रपूर्वोक्तसिद्धां
 तवाक्याद्दतवः सौराएवज्ञेयाः तेषामितिऋतुफलं अथमासफलंयवनः ब्रह्मचर्यरतोनित्यंवेदाध्ययनतत्परः गुरुदेवद्विजातीनांभक्तश्चैत्रसमुद्भवः
१ सर्वलक्षणसंयुक्तोदीर्घदर्शीकलानिधिः सात्विकश्चिरजीवीचवैशाखेजायतेनरः २ निपुणः सर्वकार्येषुमतिमांश्चपरीक्षकः क्रयविक्रयकृन्नित्यं
भवेज्ज्येष्ठेचमानवः ३ निर्द्धनोवहुभुक्कुष्टीहलकर्मरतः सदा व्याधितोमूर्खवुद्धिश्चभवेदाषाढजोनरः ४ श्रावणेजायतेमर्त्योविदस्कर्मसुकौशलः पु
त्रदारधनैर्युक्तः सर्वलोकप्रपूजितः ५ भोगीदानाढ्यशोदीर्घोगौरांगश्चवहुस्त्रियः पुत्रवान्धनवान्भोगीनरोभाद्रपदेभवेत् ६ आश्विनेचनरोजातोविद्वान्भू
पप्रियोभवेत् वहुभृत्यस्त्रियायुक्तोवहयत्नोल्पजीविकः ७ वाचालोवक्रवुद्धिश्चकुंचितायुकरोलसः कार्त्तिकेजायतेनित्यंब्रह्मचर्यरतोभवेत् ८ तीर्थ
यात्रारतोनित्यंमंत्रीक्षापरायणः मार्गमासेभवेन्मर्त्यः सहाशास्त्रार्थसंचकः ९ पौषमासेसमुत्पन्नोनरोदुःखप्रदोभवेत् सर्वरोगयुतोनित्यंपापमार्गरतः
खलः १० योगीश्वरस्तपोनिष्ठोवेदवेदांगपारगः शांतश्चदयान्वितोदक्षोनरोमाघप्रजायते ११ सुकुमारः सदाभोगीकामिनीवल्लभः सुखी फाल्गुनेजायतेवालो।
गजाश्वनरभूषणः १२ अत्रमासाश्चांद्राएवज्ञेयाः उक्तंच सिद्धांते मासास्तथाचतिथयस्तुहिनांशुमानादितिनत्क्षणमुक्तं रोमकेश सिद्धांतेचांद्रोदर्शावधि
र्मासः सचसूर्येंदुसंगमः तयोर्विश्लेषसमयोऽधिमोमासउदाहृतः तेषामेवमासानांचैत्राद्याख्याश्चसंस्मृताः ननुचांद्रमासेधिमासक्षयमासयोः संभवा
त्सौरमासेनतदसंभवात्संक्रांतिवशात्संतत्सौरमासस्यैवफलंज्ञेयमितिचेन्न यतः सकलमुनीश्वरैर्मासगणानांचांद्रमानेनैवोक्तानतु सौरमानेनतन्मासफ
लंचांद्रमासानामेवज्ञेयं अतएववृद्धयवनेनमासफलंचैत्रादिमासानामेवोक्तं ननुमेषादिसंक्रमाणांक्षयमासेऽधिमासेचजातनमासफलंलेख्यं यु॰ राम
तत्स्पष्टमुक्तंहोरासारे क्षयमासेऽधिमासेदजन्मासानामफलंस्मृतं तत्रापिक्षयमासेमासद्वयसद्भावात्तिथिपूर्वार्द्धजातानांपूर्वमासफलंलेख्यं उत्तरार्द्ध ३०
जातानांउत्तरमासफलंलेख्यं उक्तंचस्मृतो तिथ्यर्द्धे प्रथमेपूर्वोपरस्मिन्नपरस्तथा मासाविति वुधैश्चिंत्यौक्षयमासस्यमध्यगाविति मासफलं अथपक्षफ

लं यवनः शुक्लपक्षेनरोजातोदीर्घायुः पुत्रवान्भवेत् बहूनांपालकोदातासुहृन्मानीप्रियाजितः १ आलस्योमलिनोदुःखीनिंदकोग्राम्यभाषणः कृष्णपक्षे
भवेन्मर्त्यः सर्वधर्मबहिष्कृतः २ पक्षलक्षणमुक्तं सिद्धांतसारे सूर्येंदुसंगमस्यैवविश्लेषस्यसम याहुधैः शुक्लपक्षोथएकांतेनदग्धकृष्णपक्षकः इतिपक्षफ
लं अथतिथिफलंयवनः प्रतिपद्दिवसेजातः त्रिदिनंवत्रिमासकं जीवितःसमहान्तजाकुर्यात्क्षांतिंचिरायुषः २ द्वितीयादिवसेजातोनरः सत्यवचोभवे
त् ज्ञातानंदकरःश्लाघीस्वकर्मनिरतःसदा २ तृतीयायांनरोजातोस्त्रीलोभःकृपणःखलः व्रतोपवासनिरतःमूर्खोवादीकलान्वितः ३ चतुर्थ्यांतुनरोजा
तोलुब्धःपिशुनवान्भवेत् चंडःसाहसिकःशूरःबलवितःशठान्वितः ४ पंचम्यांतुनरोजातोमानीदीर्घायुषोभवेत् महामतिःस्थिरःशूरःसत्यवादीजिते
द्रियः ५ षष्ठ्यांनैवनरोजातोव्रणांकितनतनुःस्थिरः स्त्रीलोलुपोतिसुभगोविद्यार्थीनिपरोभवेत् ६ सप्तम्यांजायतेमर्त्योधनवान्गुणवान्भवेत् गुरुदेवा
र्चनपरःसदाचारोदृढव्रत ७ अष्टम्यांतुनरोजातोस्वदारनिरतोभवेत् बहुभाषोतिचपलश्चलचित्तोतिनिष्ठुरः ८ कामलुब्धोमहाशूरोगीतनृत्यरतस्त
था शत्रुघ्नश्चमहाक्रोधीनवम्यांजायतेनरः ९ दशम्यांतुनरोजातःस्त्रीपुत्रोस्त्रीव्रणांकितः सुचिरंसनशुभगश्चलचित्तमहामतिः १० एकादश्यांचजा
नितोलोकव्यापारकोविदः कलाशास्त्रेषुकुशलःसत्यवादीदृढव्रतः ११ द्वादश्यांचनरोजातोसदाचारोतिदुःसहः सुभगोरतिलोलश्चवस्त्रभोजनतत्प
रः १२ त्रयोदश्यांनरोजातोज्ञानवान्धर्मवान्भवेत् व्रतोपवासनिरतःस्वशत्रुर्मतिमान्गुणी १३ चतुर्दश्यांनरोजातःसश्रुद्धःसर्वकर्मसुबुद्धिमान्व्याधिनि
र्मुक्तःसदाबंधुरतोभवेत् १४ पौर्णमास्यांनरोजातःपूर्णांगःसुस्थिरोभवेत्सदाहृष्टमनाकामीसुभगोतिगुणान्वितः १५ अमायांतुनरोजातःइंद्रियार्तिगं
तःसुखीसुभगोबलहीनश्चचित्तेबहुसमाकुलः १६ अत्रजन्मकालेतिथिनक्षत्रयोगकरणानांसिद्धांतोक्तरीत्यागणितागतवर्तमानानांफलंलेख्यं इति
तिथिफलं अथवारफलंयवनः स्थिरःप्रचंडःशूरश्चरक्तश्यामतनुःशुचिः पित्ताधिकोतिचतुरोजनयेत्सूर्यवासरे १ सोमवारेनरोजातःसात्विकःस
द्बुद्धिमान् ह्रस्वकायोऽतिगौरश्चपृथुवक्षाःसुबुद्धिमान् २ क्षतवृत्तिसमायुक्तोजनयेद्भौमवासरे रक्तायतलोचनश्चवाग्यतोमधुरक्षमी ३ निपु

णोतिहृत्तपादःशिरश्चैवतथाकविः रूपवानतिचापल्योजनितोबुधवासरे ४ सुधीःसद्बहुलोकज्ञःकलाशास्त्रविदःशुचिः प्रागल्भोकुशलोधीरः
संभवेद्गुरुवासरे ५ प्रछन्नकार्यःसुमतिःजातःशुक्रस्यवासरेसुधीः सद्बहुलोकज्ञः कलाशास्त्रविदःशुचिः ६ रूक्षदुर्बलदेहश्चमलिनोतिचलःखलःरो
द्रःक्रोधपरोनित्यंजनितःशनिवासरे ७ नक्षत्रवारफलंसूर्योदयाद्वारप्रवृत्तेर्वालेखनीयमितिचेदुच्यते वारफलंसूर्योदयादेवलेखनीयंनतुवारप्र
वृत्तेः यदाहवसिष्ठः वारप्रवृत्तिविज्ञानंस्मरणंवारार्थमेवहि अखिलेष्वेवकार्येषुदिनादिरुदयाद्भवेत् पुलस्तिसिद्धांतेपि अथसावनमानेनवासराःसम्प्रकी
र्तिताः तेचार्कोदययोरेवविवरेतुसमास्मृताः इतिवारफलं अथनक्षत्रफलं तत्रस्थूलनक्षत्रेभ्यःसूक्ष्मनक्षत्राणांप्राबल्याज्जन्मनिसूक्ष्मनक्षत्रफलंलेख्यं
नतुस्थूलनक्षत्राणामितिचेन्नयतोवशिष्टेनसूक्ष्मनक्षत्राणांमूलभूतायाबृहत्समजघन्यसंज्ञायाःप्रयोजनंविवाहजन्मादिषुनिषेधपूर्वकंवस्तुसमघो
दिज्ञानार्थमेवोक्तं तद्यथा एतानिसघन्यसमादिक्रमशोयत्रर्क्षखंडेविनियोजितानि ज्ञात्वैवमेवंमणिजीवधातुमूलोर्णाकर्पूररसादिकानां अर्घेवदे
ज्ज्यौतिषिकःप्रजानांसमर्घवस्तूत्तमसंग्रहार्थंनोद्वाहजन्मादिषुयत्रचोक्तं तत्राभिवृध्यैविनियोजनीयमिति नारदः सुरूपःसुभगोदक्षोमतिमान्भूष
णप्रियः अंगनावल्लभःशूरोयोजातश्चाश्विभेनरः १ कामोपचाराकुशलःसत्यवादीदृढव्रतः अरोगःसुभगोजातःभरण्यांलघुभुक्सुखी २ तेजस्वीम
तिमान्दातावहुभुक्प्रमदाप्रियः गंभीरःकुशलोमानीवह्निनक्षत्रजःशिशुः ३ सुरूपःस्थिरधीर्मानीभोगवान्सुरतप्रियःप्रियवाक्चतुरोदक्षस्तेजस्वी
ब्रह्मधिष्ण्यजः ४ उत्साहीचपलोभीरुःधनीसामप्रियःशुचिः आगमज्ञःप्रभुर्विद्वान्चंद्रनक्षत्रजःपटुः अभिचारपरःशूरःक्रयविक्रयनैपुणः गर्वाहिं
स्रश्चंडरतिःकृतघ्नःशिवधिष्ण्यजः ६ दुर्मेधावान्दर्शनीयःपरस्त्रीकार्यनैपुणः सहिष्णुरल्पसंतुष्टःशीघ्रगोदितिधिष्ण्यजः ७ सुभगःप्रथितः
शूरःकृपालुर्धार्मिकोधनी कलाभिज्ञःसत्यरतःकामीपुष्यर्क्षजोलघुः ८ धूर्तःक्रूरःक्रूरचेष्टःपरदाररतःशठः अवक्रोव्यसनीदांतःसर्पनक्षत्रजो।
नरः ९ स्थूलःस्थूलहनुःकुक्षीकोपीवक्तासहप्रभुःसुरगुर्वचनरतस्तेज स्वीपितृधिष्ण्यजः १० द्युतिमानटनोदानानृत्यशास्त्रविशारदःकार्याकार्य

विचारक्षो भाग्यनक्षत्रजः प्रभुः ११ जितशत्रुः सुखी भोगी प्रमदामदनः कविः कलाभिज्ञः सत्यरतः सुविद्वानर्यमर्क्षजः १२ मेधावान्सत्त्वोत्साही
परकार्यरतो भटः परदेशगतः शूरः स्त्रीलोलः सूर्यधिष्ण्यजः १३ चित्रमाल्याम्बरधरः कामशास्त्रविशारदः द्युतिमान्धनवान्भोगी पंडितस्त्वाष्ट्र-
धिष्ण्यजः १४ धार्मिकः प्रियवाक्शूरः क्रयविक्रयनैपुणः कामी बहुसुतो दान्तो विद्यावान्मारुतर्क्षजः १५ अभ्यसूयापरः श्लक्ष्णो भाषापटुररिंद-
मः जितेन्द्रियोर्थवाल्लुब्धो विशाखायांसमुद्भवः १६ नृपकार्यरतः शूरो विदेशस्थोंगनाप्रियः सुरूपो नन्नपापश्च पिंगलो मैत्रधिष्ण्यजः १७ बहुव्ययक-
रः क्लेशसहः कामी दुरामरः क्रूरचेष्टो मृषाभाषी धनवानिंद्रधिष्ण्यजः १८ हिंस्रो मानी धनी भोगी परकार्यप्रकाशकः मिथ्योपचारः स्त्रीलोभी श्लक्ष्णो
नैर्ऋतिधिष्ण्यजः १९ सकलत्रः कामचारः कुशलो दृढसौहृदः क्लेशभाग्वीर्यवान्मानी जलनक्षत्रसंभवः २० कृतज्ञो धार्मिकः शूरो बहुपुत्रो विनी-
तवान् सुकलत्रः सुरूपश्च वैश्वनक्षत्रसंभवः २१ उदारदारः श्रुतिवान् श्रीमान्वक्ता धनान्वितः काव्यकृत्सुरताभिज्ञो धार्मिकः श्रवणर्क्षजः २२ धा-
र्मिको व्यसनी लुब्धो नृत्यगीतांगनाप्रियः सामैकसाध्यस्तेजस्वी वीर्यवान्वसुधिष्ण्यजः २३ दुर्ग्राह्यो व्यसनी क्रूरः क्षयवृद्धियुतः शठः परदाररतः शू-
रः शततारर्क्षसंभवः २४ उद्विग्नः स्त्रीजितः शाक्यः परनिंदापरायणः दांभिको दुःसहः शूरश्चाजपाद्धिष्ण्यसंभवः २५ प्रजावान्धार्मिको वक्ता जित-
शत्रुः सुखी विभुः दृढव्रतः सदा कामी अहिर्बुध्न्यसुसंभवः २६ रूपवान्धनवान्भोगी पंडितश्च जलार्थकः कामी दुर्गर्वितः शूरः पौष्णजः परदेशगः
२७ अत्र विशेषमाह कश्यपः जन्मभे जन्मसमये पापग्रहसमन्विते गुणाश्च निर्गुणाः सर्वे शुभयुक्ते गुणा गुणाः २८ जन्मर्क्षे शुभपापयोगरहिते
ऽगुणा गुणाः स्युः दोषाश्चादोषाः स्युरित्यर्थः अथ जन्मनि कुलश्चाकुलकुलाकुलनक्षत्राणां फलं तत्रैव कुलयोगे प्रसूताये कुलोत्कृष्टा भवंति
ते अकुले नात्यभोक्तारो मध्यमाश्च कुलाकुले वसिष्ठसंहितायामपि कुलभेषु च ये जाता स्ते मनुजाः भवंति मुख्याः उपकुलभे परविभवान्भोक्ता-
रस्त्वन्यभेषु सामान्याः कुलादिकं प्रसिद्धमेव अथ जन्मनि नक्षत्रवशेन प्रकृतिज्ञानमुक्तं शौनकेन अवस्थिरा च प्रकृतिः क्षमी चाऽलस्यसंयुतः चरे चल

स्वभावः स्यान्मृदनः सर्वभक्षकः उग्रेनथोग्रप्रकृतिर्वधबंधरुचिः सदा मिश्रे तु मिश्रप्रकृतिः मंताश्च शत्रुमित्रयोः लघुभे लघुभोगार्थे सर्वदा प्रकृतिर्भ
वेत् मृदुभे च दयायुक्तो गंधमाल्यप्रियो भवेत् तीक्ष्णभे कलहो नित्यं दुर्वक्ता तु मलीमसः इति नक्षत्रफलं नक्षत्रचरणफलं यवनजातके अश्विन्याः
प्रथमे पादे जातो भवति तस्करः द्वितीये वाल्पकर्मा च तृतीये शुभगो भवेत् पादे चतुर्थके भोगी दीर्घायुर्जायते नरः त्यागी याम्यद्यपादे स्यात् द्वितीये
धनवान्सुखी २ तृतीये क्रूरकर्मा च चतुर्थे प्रौढविद्भाक् वह्न्यर्क्षे प्रसवं बालं तेजिष्ठं प्रथमांशके द्वितीये शास्त्रविज्ञानं तृतीये शोकभाग्भवेत् दीर्घायुर्व
हुपुत्रश्च चतुर्थे च रोगी भवेत् ४ सौभाग्यत्वं तथा पीडा भीरुत्वं सत्यवादिता रोहिणीसंभवस्यैव फलं पादचतुष्टये ५ नृपतिस्तस्करो भोगी धनधान्य
समन्वितः क्रमेण मृगशीर्षस्य फलं पादचतुष्टये ६ रौद्रर्क्षप्रभवो बालो भवेत् पादचतुष्टये व्ययी दरिद्री स्वल्पायुस्तस्करश्च यथाक्रमं ७ पुनर्वसु
भवो बालः सुखी विद्वान्नृपान्वितः मृषाभाषी भवेन्नित्यं क्रमात्पादचतुष्टये ८ दीर्घायुस्तस्करो भोगी बुद्धिमान् जायते नरः क्रमात्पादचतुर्थो नापु
ष्यभस्य प्रकीर्तितं ९ अप्रजापरकार्यश्च रोगी च सुभगो भवेत् सर्पर्क्षेंघ्रिचतुर्जातो गंडांते चाल्पजीविनः १० मघापादचतुर्जातश्चापुत्रो पुत्रवान्भवेत्
तीव्ररोगी पंडितश्च जायते नात्र संशयः ११ समर्थो धार्मिको राजा रोगी क्रूरोल्पजीविनः पूर्वाफाल्गुनीजातस्य फलं पादचतुष्टये १२ उत्तराफाल्गुनीपाद
चतुर्णां तद्भवस्य च पंडितः पृथिवीपालो विजयी धार्मिको भवेत् १३ हस्ते जातो यदा कालो भूरोवादी च रोगवान् धनधान्ययुतः श्रीमान् फलं स्यात्प्रथ
मांघ्रितः १४ चित्रायाः प्रथमांत्यांघ्रिफलं जातस्य कथ्यते चोरश्चित्रकरः सः स्यात्परवादी च पंडितः १५ स्वात्याद्यपादतः पुत्रसंभवस्य फलं क्रमात् तस्क एम
रोल्पायुषो धर्मी नृपतिः स्यान्न संशयः १६ विशाखाजातपुत्रस्य फलं पादचतुष्टये नीतिज्ञः शास्त्रवेत्ता च वादी दीर्घायुषो भवेत् १७ तीव्रो धर्मकरो दीर्घजी ३:
वी पुंश्चलसंयुतः अनुराधाद्यपादादिजातस्य च फलं क्रमात् १८ भोगी त्यागी सुमित्रश्च नपतिर्जायते नरः मूलाद्यपादजातस्य नरस्य च फलं क्रमात् १९ क्रू
रो रोगी सुविद्वांसः पुत्रवाञ्जायते नरः ज्येष्ठापादचतुष्कस्य जायते च फलं क्रमात् २० पूर्वाषाढाद्यपादादिजातस्य च क्रमादिति श्रेष्ठो राजा प्रियंवादी ध

मीभवतिनिश्चितं २१ उत्तराषाढजातस्यफलंपादचतुष्टये नृपोमित्रविरोधीचमानीधर्मरतोभवेत् २२ शुभमार्गोशुभगुणोविद्वांश्चधार्मिकोभवेत् श्र
वणस्यचतुष्पादजातस्यचफलंक्रमात् २३ दीर्घायुःपंडितोभोक्तामहानारीचरोभवेत् धनिष्ठाप्रथमात्पादात्प्रत्येकस्ययथाक्रमं २४ शतभिषाप्रथमांघ्रौच
वाग्मीश्रीमान्द्वितीयके सुखीतृतीयकेपादेचतुर्थेपुत्रवान्भवेत् २५ शूरश्चोरोमहाबुद्धिःयोरोभोगीभवेन्नरःपूर्वाभाद्रपदापादचतुष्केःक्रमशःफलं॥
२६ अहिर्बुध्न्यक्रमात्पादचतुष्केसंभवात्फलं राजाचतस्करश्चैवपुत्रवान्ससुखीभवेत् २७ ज्ञानीचतस्करोयुद्धेजयीचक्लेशभाग्भवेत् क्रमात्पादच
तुष्कंस्यरेवत्यांजायतेफलं २८ इतिनक्षत्रचरणफलं अथपितृमात्रोर्जन्मादितारासुजातस्यफलमाह गर्गः यस्यैवजन्मनक्षत्रेजायेत भ्रातासु
तोपिवा सजातीयःसजात्यावासोऽस्यमारणाद्विनाशयेत् संपत्करेपिजातस्यश्रेयस्कतिष्ठतेसदा नित्यकलिसमंपश्येद्वाजायेतविपत्करे. क्षेमेभिज्ञा
तःपुरुषःसौम्यश्चैवकांतिकोभवेत् प्रत्यरिर्जोरिपुसमःनैधनेतस्करोभवेत् साधकेसर्वकार्याणांसाधकःस्यादतिप्रियः मैत्रेपरममैत्रेचपरं मित्रमतिप्रि
यः ताराणगणनाप्रसिध्यैवअथयोगफलं यवनः कांतोवधूरतःस्नायुग्रहदाररतःसदा दक्षश्चसर्वकार्येषुविष्कंभेजायतेनरः १ मार्गेरतःप्रियवचा
धनधान्यगुणान्वितः प्रगल्भमानसंतुष्टःसश्रीकःप्रीतिजोनरः २ नीतिज्ञःस्थिरचित्तश्चबद्धदः कान्यतत्परः आयुष्मानजनितोवालोसर्वभोगसम
न्वितः ३ बहुवाक्यःशुभधनोनिर्गुणोशुभवाक्सुधीः गंधप्रियोपिशुभगोसौभाग्येजनितोनरः ४ मतिमांश्चगुणाढ्यश्चशोकयुक्तःसुतोभवेत् शोभने
वनरोजातोधीतचित्तःसुनिर्मलः ५ परवादरतःशूरःसमयुक्तश्चधार्मिकः परदाररतःकामीचातिगंडेचजायते ६ दक्षश्चसर्वकार्येषुधनधान्यगुणा
न्वितःव्यापारकुशलोनित्यंसुकर्मणिनरोभवेत् ७ गंधप्रियोधनाढ्यश्चपरवादीमदालसः परदाररतोनित्यंधृतियोगेचजायते ८ सत्ययुक्तश्चस
त्कर्मगुणवान्भाग्यवानपि शूलयोगेनरोजातःशूलवान्जायतेध्रुवं ९ वाचालोपिमहासत्योगंभीरोगर्वितोभवेत् सुशब्दःशुभवानादेनरोजातःसमाहि
तः १० महामतिर्महाशूरःसत्यवादीजितेंद्रियः वृद्धियोगेनरोजातःदक्षवाकोमलःसदा ११ धूर्तकार्यःसदाकर्णाशत्रुपीडाविवर्जितः ध्रुवयोगेनरोजातो

दृढवाक्योमहामतिः १२ मूर्खश्चमलिनश्चौरः कर्मण्यभिरतःसदा निष्ठुरोथमहागर्वीव्याघातेजायतेनरः १३ कुटिलःसौख्यसंपन्नोऽनृतवाक्योमहा
वलः कृषिकर्ताभवेन्नित्यंहर्षणेजायतेनरः १४ अदाताचधनाढ्यश्चकृपणोग्राम्यभाषणः क्रूरश्चतीक्ष्णपापश्चवज्रयोगप्रजन्मतः १५ भोक्ताचधा
नवांश्चैवजायतेस्वल्पवाक्सुखी सुशीलश्चसुरूपश्चसिद्धियोगेप्रजन्मतः १६ अस्थिरःसर्वकार्येषु मंत्रीयावनतत्परः कलहीवादमूर्खश्चजनितो
व्यतिपातके १७ वहुपूज्योधनाढ्यश्चस्वकर्मनिरतोभवेत् जनानंदकरःश्लाघीवरीयसिनरः स्मृतः दानवृत्तिर्दुराचारः सलुब्धःसाहसस्थलःमदमान
दयायुक्तःपरिघेतुप्रजायते १९ तीर्थयात्रारतोनित्यंपुत्रवान्धनवान्भवेत् ब्रह्मचर्यरतोनित्यंशिवयोगेप्रजन्मतः २० विविधश्छन्नमंत्रीचसर्वव्याप
रकोविदःसुविनीतोनीतिवांश्चैवसिद्धियोगेप्रजायते २१ विविधव्यवसाय श्चस्वामिभक्तोमहामतिःगदप्रियोमहादारःसुसाध्यःसाध्यजन्मनः २२
सत्यवाक्सुभगोधर्मीक्रोधहीनःसुनिर्मलः प्रशांतःप्रियकारीचशुभयोगेप्रजन्मतः २३ सत्यवाक्सुमतिःकांतःख्यातिमानशुभपारगः कला
शास्त्रेषुकुशलःशुक्लयोगेप्रजन्मतः २४ प्रियवाक्योमहासत्वःब्रह्मण्योब्राह्मणप्रियः प्रगल्भोनिर्मलोधीरोब्रह्मयोगेप्रजन्मनः ऐंद्रयोगेनरोजा
नःविजयीधार्मिकोभवेत्प्रभूतःसर्वकार्येषुधनीख्यातःप्रियंवदः २६ लुब्धःपिशुनवित्तश्चवक्रभाषणतत्परः प्रथमेचलवित्तश्चयोगेवैधृतिजन्मनः
२७ इतियोगफलं अथकरणफलं यवनः अतःपरंप्रवक्ष्यामिकरणानांफलंयतः शृणुकश्यपपत्नेनयथोवाचप्रजापतिः १ मदनीव्रउदारोढ्यःसु
खवान्धर्मवर्जितः ववाख्येकरणेजातोभवेत्सेनापतीश्वरः १ सुधीरःसुभगस्त्यागीवालोलीलारतिःसुखी वालवेजननेचेत्स्याद्बालकर्मरतःसदा २
प्रच्छन्नोलोलवित्तश्चकौलेकानंदवर्द्धनःपापकर्मरतोऽसौख्यःकौलवेज्ञानवान्भवेत् ३ साधकःसत्यसंपन्नःस्थिरश्चंडःप्रतापवान् नामसोमलिनः
शूरोजातःस्यात्तैतिलेनरः ४ मंत्रविन्नीतिमान्दक्षोदुर्वलोवहुभाषणःचपलोविग्रहरतोगरख्येजायतेनरः ५ सेनापरापविशेषज्ञोवणिक्कर्माभिजी
वकः वणिजाख्येनरोजातोवंशिग्वृतिःसदाभवेत् ६ क्रूरःसाहसिकश्चंडःपापकर्मरतश्चलः प्रभूतःसर्वकार्येषुविष्टाख्येचप्रजन्मनः ७ सर्वयोगा

केतुः शंभवः मदान्धांत महाप्रतिः शकुनाख्येन रो जातः शकुनज्ञो विशेषतः ८ कृषिवाणिज्यकारी च सद्योगी च गतक्लमः निरालसः साधुयुतो जातेश्चैव च
तुष्पदे ९ नानाधातुविशेषज्ञो स्वकर्मगुणवान्भवेत् नागाख्ये करणे जातो नानामानां पालको भवेत् १० किंस्तुघ्ने बलवान्तथ्यः स्वकार्यपरकार्यकृत. स्व
स्यायुर्भोगसंत्यक्तः छन्नवासाः प्रजायते ११ इति करणफलं अथ वर्णफलं जातको नमे स्वधर्मकर्मनिरतः शास्त्राध्ययनतत्परः विनीतः सर्वकार्येषु
ब्रह्मवर्णभवो नरः १ क्लिन्नः साहसतन्त्रवृत्तः शुचिः शौर्यकथाप्रियः दाता विवेकशीलश्च क्षत्रवर्णभवो नरः २ व्यापारकार्ये निरतः परकर्मोद्यतः सदा निष्ठु
रश्चतुरश्चैव वैश्यवर्णसमुद्भवः ३ निष्ठुरपटुवान्कार्ये विद्याविनयवर्जितः शुश्रूषणारतो ऽशीलः शूद्रवर्णसमुद्भवः ४ इति वर्णफलम् अथ वर्गफलं ॥
जातको नमे धनवान्चपलो धीरो दूरगामी गुणान्वितः विवेकी स्वामिभक्तश्च नार्क्ष्यवर्गभवो नरः १ हृष्टेव परकार्यघ्नः क्रोधी दैन्यसमन्वितः विश्वासघाती
नीचश्च वर्गे मार्जारके नरः २ पराक्रमेण सहितो गुणितो धर्षितः क्वचित् अंसहिस्रुदुर्गचरः सिंहवर्गभवो नरः ३ वाचदूको ऽतिचपलो जागरूको भयो ह्नि
तः विश्वासी सर्वलोकेषु श्ववर्गोत्थो भवेन्नरः ४ विक्रांतः सप्रयत्नश्च निगूढहृदयश्चलः सभ्यः प्रसादचतुरो मेषवर्गभवो नरः ५ अधीरश्चपलो भीरुश्च
त्रपापो निराश्रयः दुर्जनो दीर्घरोषी च सर्पवर्गभवो नरः ६ परद्रोही छिद्रदर्शी मृदुर्बहुभयान्वितः एकांतवासी चौर्यज्ञ आखुवर्गभवो नरः ७ गीतप्रिय
साधुरतिश्चंचलो निकटोरकः सुशीलो निमृदुस्नेही मृगवर्गभवो नरः ८ इति वर्गफलम् अथ योनिफलम् यवनः चपलश्चलचित्तश्च शीघ्रगामी रणा
प्रियः अश्वयोनौ तु संजातो बलवान्स्वामिवल्लभः मंदगामी बलाढ्यश्च वक्ताशी राजवल्लभः संत्यवान् ग्लानिवांश्चैव गजयोनौ भवेन्नरः २ दुर्धर्षदुर्लभः
स्थानं भेदसत्यविशंकिनः अजयोनिषु जातो सो बहुबुद्धिप्रदो भवेत् ३ दर्शने भीतिदो नित्यं घटाटोपेन वर्तते परवेश्यापहारी च सर्पयोनौ भवेन्नरः ४ सर्व
भक्षी वृथावादी धूर्तः स्वामिहितेरतः अरण्ये दुःसहा वीरः श्वानयोनौ भवेन्नरः ५ पिंगाक्षी सर्वभक्षी च चपलो ऽद्भुतकारकः मार्जारयोनिसंजातो वृथाकोपी
भयान्वितः ६ धूर्तः स्वकार्यनिरत परकार्यविनाशकः शत्रूणां मूलविच्छिन्नो नरो मूषकयोनिजः ७ गोधनैर्बहुभिर्युक्तो क्षीराहारो ऽतिसुंदरः परोपकार

कर्ताच्चपम्रुयोनौभवेन्नरः ८ मंदगामीस्थूलतनुर्वज्ञाशीवलवान्धनी बहुसाराज्यभोजीचमहिषीयोनिसंभवः ९ क्रूरांतः सर्वभक्षीचविद्यावान्कुशलो
नरः व्याघ्रयोनौभवेन्नित्यंदर्शनाद्भयदोमहान् १० गीतवाद्यप्रियोनित्यंसुंदरश्चारुदर्शनः मृगयोनिरतोधूर्तोमृगयोनौनरोभवेत् ११ पिंगाक्षश्चपलोरण्य
गामीफलभुजोभवेत् नविश्वासंव्रजेत्कस्मिन्कपियोनिसमुद्भवः १२ चारुदर्शनकार्यार्थः परकार्यार्थसादरः विलवासीचिरायुःस्यान्नरोनकुलयोनिषु
१३ महाबलीचपिंगाक्षः कृशमध्योभयानकः सिंहयोनिप्रजातस्तुसर्वभक्षकरुद्भवेत् १४ इतियोनिफलम् अथगणफलम् यवनः गुरुदेवद्विजानां
नांभक्तः शास्त्रविमर्शकः देवतासदृशीमूर्तिर्जातोदेवगणेनरः १ तामसःपापकृत्क्रोधीगर्विष्टः कलहप्रियः निष्ठुरश्छन्नपापश्चगणेस्याद्राक्षसेनरः २ अन्न
दाताधनाढ्यश्चप्रजावान्देवपूजकः मानुष्यर्क्षेनरोजातोवरस्त्रीसुखभोगकः ३ इतिगणफलम् अथदिवारात्रिजन्म तेजस्वीपितृसदृशश्चारुदृष्टिर्द्वे
षप्रियःबंधुपूज्योधनाढ्यश्चदिवाजातोनसंशयः १ मंददृग्वाहुकामार्तः स्पर्शरोगीचतामसः क्रूरात्मश्छन्नपापश्चनिशिजातोभवेन्नरः २ इतिदिवारात्रिफ
लम् नन्वेवमुदाहृतानांसंवत्सरादिफलानांसमयनियमाभावात् निराधारत्वेनफलसंदेशः कथंसंजातघटीतिव्यर्थमेवकिमर्थमुक्तमितीत्याशंका
यांपंचांगादिपाठफलपाकसमयमाह ढुंढिराजः जातकाभरणेउक्तानिसंवत्सरपूर्वकाणांफलानितन्मालिरितिप्रकल्प्यसांवत्सरंसावनवर्षपरस्य
रं स्यकेयनर्तुप्रभवंरवरांशाः मासोद्भवेमासपतेस्तथेंदोर्गणोडुपक्षप्रभवंचयत्स्यात् तिथिप्रसूतंकरणोद्भवंचचंद्रांतरेकेस्यदशाविभागे वारोद्भवंवा
रविभोर्विचिंत्यंयोगोत्थमिंदुर्कवलान्वितस्य लग्नोद्भवंलग्नपतेर्दशायांदृग्भावयुग्मोशिजमेवमूह्यं एवमेवदिवारात्रिफलंसूर्यचंद्रदशायांक्रमेण
ज्ञात्व्यं इतिसंवत्सरादिफलानि न तो ग्रेलग्नषड्वर्गफलंवक्तव्यं तत्रस्पष्टलग्नानयनं अयनांशःप्रदातव्यालग्नेक्रांतौचरागमेइतिब्रह्मसिद्धांते ता
त्कालिकस्यस्पष्टार्केऽयनांशयोजनमुक्तं सायनार्कादीनांतंलग्नमपिसायनंजातं पुनस्तत्रायनांशानामृणत्वंब्रह्मर्षिप्रणीतग्रंथेनोक्तमतःसायनलग्न
स्यैवषड्वर्गफलंलेख्यं ननुनिरयनलग्नस्येतिचेन्न यतः श्रीमत्सूर्यवासूर्यजातकेस्पष्टलग्नानयनेऽयनांशानामृणत्वंनिरयनलग्नफलंचकस्मान्निस

कंठरविलोकं तात्कालिकंसायनंलवैर्युक्तंतुकारयेत् तद्भोग्यभागैरुदयानुगुणयेत् खाग्निभिर्भजेल्लब्धोभेभोग्यकालः स्यात्तंशाद्यः स्वेष्टकालतः नरस्थि
१. राशयश्चशेषंखाग्निहृतंभजेत् अशुद्धराशिमानेनभाग्यद्यंसंयुतंपुनः अशुद्धपूर्वभवनैरित्थंस्पष्टोभवेद्ध्रुवः अथनांशोनितंसूतरात्रौष्टसमयेनतः सा
षड्भार्कादपिचतत्कारयेदुक्तवर्त्मना अस्मादेवदेवदेन्मूतफलंजन्मनिनिश्चितंमिति अथलग्नषड्वर्गफलहोराप्रदीपेलग्नादेहविचारोहोरातश्चार्थ
संपदोदेयाः द्रेष्काणात्कर्मफलंभात्विचारस्तुसप्तांशात्संततिफलं नवांशात् द्वादशभात्कलत्रचिंताचमृत्योत्रांशकथितंत्रिंशांशकात्स्नातकदोषु
अथलग्नफलं लग्नेक्रियेक्रोधपरोनितुब्धोविदेशगोत्यात्मजसौख्यशीलः मेषाक्षिरोर्द्धसवलितांभिधायापटुः परस्त्रेषुविशिष्टकतो विरुद्धशीलः सद
जश्चमित्रैःस्यात्तोल्पमेधाश्चपलः कुबंधुः भीरुःस्थिरस्फीतधनोविषादीकनिष्ठकर्मादुनयोजितारिः २ वियुज्यतेप्राक्संड्जेनमात्रापित्रांधनभ्रंशस
मन्वितश्च प्राप्नोतिभार्यांसुकुमारशीलांव्यंगंसमीरादिभिरर्दितांगी २ इतिमेषः लग्नेवृषःस्यात्सुभगोपशुश्रीस्यादिष्टकर्मावरभूषणोसुबुद्धो न्नपाने
दपितास्प्रियश्चकन्याप्रियोवापिततोधिकारी १ आपीनवक्षःस्वजनेनमर्दोधर्मेनिवृत्तः कफवातलक्ष्मवतिकत्कषीघृतजलाशयार्थीस्थिरःपटुःस्वा
श्रितभृत्यशाली २ भार्याप्रचंडाविषमांकुयोनिंप्राप्नोतिरोद्रानपिबंधुवर्गान् ३ इतिवृषः लग्नेतनीयेप्रियवाक्यदाताशास्त्रार्थसंगीतकलासुदक्षःभोगर
तःकामवशोवरस्त्रीद्विमातृकः पूज्यवरस्वदक्षः १ हीनाधिकांगोविहितारिपक्षोदुर्मर्षणःसुहृत्कुटुंबवित्तः अनिष्टपुत्रश्चसमोल्पबंधुःधर्मालसोनार्थ
सहोत्सवश्च २ वह्वंगणारोगसहोरिहंतास्वसंस्थितोपानरतोजहाति रत्नानिहेमाढ्यजभूमिभागीप्रसिद्धवक्ताचनरोविनीतः ३ इतिमिथुनः कुलीरलग्ने
विषमस्वभावोनवैकवासोद्विजदेवभक्तः दातासुधीर्दानदयासमेतःकफानिलात्माचपलश्चशीघ्रः ४ भीरुःपरार्थव्ययकर्मभागीपूज्यःकुलायोगरस्तु
कृच्छकामी दुष्टात्मपुत्रोबहुवाक्सुबंधुःकन्याप्रजोवाबहुलार्जितात्मा सगोमहिष्योधनधान्यवस्त्रविभूषणाःसाहसकोऽतिधीरःविदेशगोदुष्टकबंधुकः
स्यात्यापात्सहित्यानहितांभिनत्ति इतिकुलीरः लग्नेहरौसिंहमुखोमहौजाहृढासवक्षेनृपलभ्यमानः धीरोगभीरःस्थितिसत्वयुक्तःप्रियामिषःस्वल्प।

वचोप्रमोदी १ भ्रातुः सवंधूनपि हंति दुष्टान्वा तात्मको दुःखसहो तिकोपी श्वनाद्विचारी वधकृत्सुधाम्नु लुब्धो रिहा स्वार्थ कुटुंबकार्यः कृष्यादि विनोन्वितं वं
धुमित्रो व्ययी विधर्मो तु कदन्नभोगी २ इहांनटीं प्रव्रजिता मनार्यो व्यापारशीलो लभते तु भार्यां इति सिंहः कन्या विलग्ने मृदुवाग्दयावान् कामी सुरूपः।
सुभगो विनीतः संगीतकाव्यव्यवहारशीलः दानोपचारप्रणयादरज्ञः १६ कन्यावल्लभी नि विलाससत्वयशोभिला षीपरवि जभोक्ता वामोटनो द्विप्रकृतिः
सवातो मंदप्रजो धर्मरतश्च मानी १७ स्वजातिपूज्यः प्रबलः कुटुंबः क्रियापरं स्यान्न हितो सुतेषु पापैरतापैः स हजैर्विरुद्धैर्नीवारि द्विद्वेषविहृद्रोष
१८ इतिकन्या तुला विलग्ने शुभकृत्स्वरतश्च लोलसो दीर्घकृशः कृतघ्नः क्षीणजितार्थो विषमांगशीलो वक्ता सुधीर्धर्मरतो तिदुःखी १९ देशानुचारी कृ
वानकर्त्ता पुराणवर्ती कलिकृत्प्रिपावान् शुचिर्गुरुर्यानकृज्जनपूज्यः पितान्यजाता सहजप्रियश्च भार्यांकु वृत्तीमहितां श्ववंधून् पुनान् लभेनोपहतं कुटुंव
पापोल्पवीर्यो मृदु शत्रुवर्गः काव्येषु लब्धव्यवसायबुद्धिः इति तुला लग्ने ष्टमे विस्तृतपीनदेहो निम्नोदरः पिंगगभीरनेत्रः पिनान्विनो मध्यविलग्नघ्राणो।
विश्वासहृन्मातुरनिष्टकर्त्ता स्थिरः प्रचंडो विषमस्वभावो ईर्षन्सुहृद्द्रोहकरो महांभूः परान्नभोक्ता वधभेदकारी शूरो न्यनासि निरनः सुरक्तः नृपानुगः पाप
धनः कुटुंबी सुद्रोगहा कर्मरतः प्रजावान् शिवाश्रयः स्यात्प्रणतार्थदाता प्रभूतनारी निरतो नटश्च २४ इति वृश्चिकः धनुर्विलग्ने पृथुतुंगमूर्धा क्षामा
न्महाक्षः कुनखी जितारिः पीनोरुवक्षोरुभुजोदरश्च स्थूलद्विजो हिंस्रुतिनासिकश्च २५ परोपकारी वहुशास्त्रवेत्ता क्रोधी सुधीः सत्यधृतिः कुलेष्टः स्वयंस्व
हेतुर्जिनधर्मवित्तो वंधुप्रियः शिल्परतश्च शूरः २६ मामेकसाध्यो वहुदारपुत्रः कफानिलान्मासु रवनेत्ररोगी चलहृद्दुःसुहृत्कुटुंवकार्यः शुन्याहतो वा।
क्षितिपाद्धनार्थः २७ इति धनुः नक्रे विलग्ने कृशो मृगास्यो भीरुः प्रदीर्घो घनसौम्यसत्वः उद्धृतसम्मादिकरो सिनाक्षो विस्तीर्णवक्षाश्चपलः सुधार्त्तः
२८ आचारहीनो त्रिवनानुचारी संगीतशास्त्रार्थरतो तिदाताल्पनांगरागो निलरुक्कुभार्यालंसो व्ययी स्वोक्षकोटिस्थितार्थः २९ धर्मप्रवासी नृपशिल्पपण्य
शौर्यार्जितस्वा जनकांगनानां सद्भावभाक्सुहृद्वलः कुटुंबास्त्रीणां वशो दुःखजनः शठारिः ३० इति मकरः लग्ने घटे विस्फुटितानग्रघोणो नीचः कुलीनः।

कालिकास्वतंत्रः क्षुधापिपासुः कपटसारतात्मा स्मरणो ह्रितार्थः पिशुनः कुकीर्तिः ३१ प्रभूतकर्मिष्ठजनो जनानां वहालसानष्टसुहृत्कुटुंबः स्त्रीद्यूतेपानरुव्य
रतः प्रवासी व्ययी शठो भ्रातृभिरर्दितश्च ३२ निगर्हितां कर्मणि दुष्टशीलः संस्त्री कर्मवान्विग्रहकारिणीं च प्राप्नोति मित्रानहितान् शठांश्च विद्वेषिणः श्लेष्म
गदाभिभूतः ३३ तथा चवराहः नकुंभलग्नं शुभमाह सत्यो नभागभेदाद्यवना वदंति कस्यांशभेदोचयनो ह्मिराशेः रतिप्रसंगा इति विष्णुगुप्तः द्वि
कुंभः त्वन्नेऽपेक्कुट्ट नकर्मरक्तः स्वर्गदोषभागी विज्ञानाननश्च पानाभिप्रेप्सु धूर्तः नसत्वमेधा शौचश्रुताचाररतो विनीतः ३५ गीतांगनाकार्यसुशिल्पवृत्तः
कल्याप्रजः प्रत्ययकीर्तियुक्तः दुर्मर्षणः स्फीनचलत्कुटुंबो धन्यः स्थिरांशः शांतजनोतितेजाः ३६ कफानिलात्मा व्ययजनो हि धान्यः फलक्रियाभिः सहितः।
तान्येष्यः सुद्रोग्रशत्रुर्मृदुवल्गुहस्तो व्यालास्यमस्तु गुग्विषकर्षितांगः इतिमीनः इतिलग्नफलं अथहोराफलं होरापसंपूर्णवलेच होरागुणांस्त्व।
कीयंलभंतप्रभूतः स्वस्वामियोगास्तगणोतः फलंस्यात् भावोद्भवं श्रेष्ठमतोन्यथान्य ३८ होरायां सवितुः कुवृत्तिनिरतो धूर्तो विरूपः खलः पापात्मा मलि
नः सुखार्थरहितः क्रूरो गुणैर्वर्जितः प्रेष्यः शीघ्रगतिर्गभीरहृदयः कामी परस्त्रीजितो देवब्राह्मणनिंदको ऽतिमुखरः सस्याद्दृश्यो नरः १ शांतः सर्वगु
णान्वितः स्थिरपतिर्नित्यं सुहृत्पूजको नानारत्नवरांगनात्मजधनैर्युक्तः सुवेषः शुचिः त्यागी मानरतः स्वकर्मनिरतः पात्रे धरित्रीपतेः होरायां रजनीक
रस्य च भवेत् भृत्यप्रियो मानवः २ रवेः स्वदेशस्थितिदा होरा चंद्रस्य चैव हि विदेशे तत्र लाभः स्यात् शुभदृष्टे न चान्यथा ३ होराधिपः केंद्रगतः शुभयं
हेर्दृष्टो युतं संपदमाप्नुयान्नरः मुक्तादिकं स्वर्णयुतं च पापैर्नो हादिकं वा खरमाहिषं च ४ इतिहोराफलम् अथद्रेष्काणफलं द्रेष्काणे दिवसेश्वरस्य म
लिनः शूरोंगनावद्धभः क्रूरः साहसिकः कुकर्मकुशलो मूर्खः कुपक्षग्रहः वक्ताशीघ्रगुरुतल्पगोऽल्पतनयो द्यूतक्रियासंरतः पापात्मा कृपणः खलोति।
मुखरः सस्याद्दृश्यो नरः द्रेष्काणे रजनीकरस्य सुतनुः संपूर्णचंद्राननः शिल्पज्ञो बहुभाषणो विधुरपूर्णेश्वेन्नरापि स्वयी शास्त्रेमंदरतिः सुशीलहृ
दयो बंध्वर्चितश्चंचलो धर्माधर्मरतो विदेशकुशलो सस्याद्दृश्यो नरः २ द्रेष्काणे धरणीसुतस्य मलिनः क्रूरो विहीनो धनैः पापात्मा पिशुनः सुतार्थरहि

तः स्यान्निष्ठुरो निर्दयः दुःशीलो वहुभाषणो क्षतननुश्चात्मंभरिक्रोधयुक् रोगार्त्तोपरसेवकः गुणागरोः संन्याजितो मानवः २ द्रेष्काणे शशिजस्य वुद्धि
कुशलः क्ष्मापालपूज्यः सदा दीर्घायुर्वलवानपत्यवहुलः शांतो यशस्वी शुचिः धर्मज्ञानरतप्रमादरहितो नित्यं जनावल्लभः शास्त्रज्ञः कुलभूषणो वहुध
नत्यागी चतुष्ठेनरः ४ द्रेष्काणेधिषणास्य यः शिशुरभूत् दीर्घायुरव्याधितो वृद्धीशः प्रियदर्शनो गुणनिधिर्मुक्ताशयो धार्मिकः मोक्षज्ञानपरः कृपा
लयतनुः शांतः सुशीलः शुचिः सुस्त्रीस्नेहरतो ऽन्यदारनिरतः स्यात्सुंदरः श्रीमयः ५ द्रेष्काणे भृगुनंदनस्य सुतनुः पात्रं धरित्रीपतेः सर्वज्ञोपि जना
नुरागकुशलो दाता सतां पालकः मुक्तारत्नवरांगनात्मजधनैः स्फीतः कृपालुः शुचिः शांतः सत्यरतोपि मुक्तहृदयो धर्मानुरक्तो नरः ६ द्रेष्काणे रवि
नंदनस्य मलिनः क्रूरो मृदुस्तस्करो दुःशीलः कृपणः सुतार्थरहितः प्रेष्यैर्गुणैर्वर्जितः पापात्मा गुरुतल्पगो ति पिशुनः स्याक्रोधनो निर्दयः शोकार्तो
मुखरः स्वरूपरहितः कामातुरो मानवः ७ लग्नेद्रिकाणाधिपतिस्तु सौम्यः शुभग्रहैर्युक्तनिरीक्षितश्च सत्कर्मकर्ता वहुकीर्तियुक्तः पापग्रहैः स्याद
शुभं च यत्र ८ द्रेष्काणे मित्रतुंगस्थैः शुभं स्वैः शुभं भवेत् समस्तकर्मणो दुःखं विपरीतेन संशयः ९ इति द्रेष्काणफलम् अथ सप्तांशात्फलम् विस्तरः
सप्तांशे भानुभवने रवि भौमार्यविदस्युताः पश्चाज्जातो पितुः पुत्रः भृगुचंद्रजकन्यका दीर्घाकुंचितमूर्धजो समतनुः नीरोगभीराशयः स्वजनसी सु
खोपचारकुशलः पापानुरक्तः सदा लब्धः साहसिको तिचंचलधनो रक्तोन्यधर्मः सुखी क्रूरः स्याद्रिमर्दनो ल्पतनयो भानोर्नवांशे नरः १ भा
वतिकनकक्तांतिर्नातिदीर्घो न खर्वः प्रविरलतनुरोमा वासवेषः सुदृष्टिः वहुधनपरिपूर्णो धर्मशीलो गुणाढ्यः विफ्रधर्मसुखसुवेषः शीतरश्मेर्नवांशे
२ केशाग्रे कपिलः सुसूक्ष्मनयनः पृष्टेन किंचिन्नतो गौरांगः कुनखी व्रणांकितशिराः कामी वलोमन्नरीभूर्तः स्त्रीधनसंग्रहे तिकुशलः प्रायोन्यधर्मः सु
खी क्रूरः शत्रुविमर्दनो ऽतिकृपणः स्याद्भूमिजांशे नरः ३ श्यामश्चंचललोचनः समतनुः विस्तीर्णवक्षस्थलो दीर्घाकुंचितमूर्धजोपि दशनश्रेणीभि
रत्यंकितः शीर्णश्चत्रायविक्रयेकुशलो धीरो धनाढ्यः सुखी दिव्यस्त्रग्वरमाल्यभूषणरतः स्याच्चंद्रजांशे नरः ४ श्यामांगः कमलोदरः सुवदनो नी

ब

[illegible]भेक्षणः प्रांशुः शोभनमूर्धजोऽतिविमलः प्राणो सुरेखांकितः वृद्धौ शाठ्यनिधिः प्रियो बहुगुणः शूरोंगनावल्लभो क्लिन्नाढ्यो मधुरस्वरः सुरगुरोरंशे भवेन्मानवः
५ रक्तोष्ठांतो नयसितनयनो मंजुकेशः सुमूर्तिः कंबुग्रीवो भवति विकलः श्यामवर्णः सुनाभिः शूरः श्रीमान्सुशीलः कविरतिसघनो दानशीलो गुणाढ्यः वृक्षाले
कोरतुष्टः सकुसुमनिरतो मानवो भार्गवांशे ६ प्रविरलतनुशोभावभ्रुकेशः कृशांगो भवति ललितनेत्रः श्यामवर्णः स्वतंत्रः बहुगुणपरिपूर्णः पापशीलो
विधर्मो परिमितधनभोगी मानवो भानुजांशे ७ नवांशलग्नात्सुतपश्च सौम्यः शुभाशुभैर्युक्तविलोकितो वा शुभैः सुताः स्युः प्रचुरा नरस्य क्रूरग्रहैः पुत्रसुखं
चनस्यात् ८ इति लग्नग्रहाणां नवांशफलं केवलनवांशफलं पिशुनश्चपलो धृष्टः पापकर्मरतः सदा परेषां व्यसनासक्तश्चोरश्च प्रथमांशके १ धा
र्मिकः सत्यवादी च नानाशास्त्रविशारदः दृढव्रतो महोत्साही द्वितीयांशे भवेन्नरः २ उत्पन्नविभवो भोक्ता संग्रामे विगतस्पृहः गांधर्वप्रमदाशक्तस्तृतीयां
शकसंभवः ३ चतुरंशकजातस्तु रणाहीक्षणादपि सर्वस्वसंग्रहे नित्यं यत्किंचिद्दिवि भूतले ४ सर्वलक्षणसंपन्नो धनी भवति सर्वतः दीर्घायुर्बहुपुत्रश्च यो
जातः पंचमांशके ५ स्त्रीनिर्जितो नपत्यश्च बहुमायो नपुंसकः दृढवैरो महोत्साहो जातः षष्ठनवांशके ६ विक्रांतो मतिमान्शूरः संग्रामे वापराजितः दृढबुद्धि
र्महोत्साहो यो जातः सप्तमांशके ७ स्वधर्मकुशलो दक्षः सिंजितात्मा जितेंद्रियः भृत्यानां पोषणे दक्षो यो जातश्चाष्टमांशके ८ अष्टमांशकजातस्य ये गुणाः सं
प्रकीर्तिताः नवमेंशे प्रजातस्य त एव कथिता बुधैः ९ इति लग्ननवांशफलं मलिनश्चपलः क्रूरः स्वल्पायुरधनोलसः कामी नरोल्पधर्मः स्यात्द्वादशांशे
विवस्वतः १ बंधूनामाश्रयः प्राज्ञो धनाढ्यः प्रियदर्शनः शिल्पज्ञो बहुधर्मः स्यात् द्वादशांशे विधोर्नरः २ पिशुनो मलिनो मूर्खः पापात्मा सुरतप्रियः अल्प
धर्मो महीजस्य द्वादशांशे भवेन्नरः सूर्यांशकः सोमसुतस्य लग्ने नरं प्रसूते सुभगं सुशीलं विद्यासुरक्तं गुरुदेवभक्तं परैरधृष्यं रसलालसं च ४ शुचिः
शास्त्रार्थविद्वक्ता सुखादी दीर्घपुरीश्वरः सुहृदामाश्रयीभूतो द्वादशांशे बृहस्पतेः ५ शूरो बहुधनो भोगी नृत्यगीतप्रियः सदा शुचिर्दाताक्षमी वक्ता द्वादशां
शे भृगोरभूत् ६ पिशुनश्चपलो धूर्तः कामी परार्थलुब्धकः मलिनो हीनधर्मा स्यात् द्वादशांशे शनेर्नरः ७ द्वादशांशे बलयुते कलत्राणि बहूनि च सौम्ये जा

हो॰ र॰ याम्शुभापापैः कुरूपानिर्बलेन्यथा ८ इतिद्वादशांशफलं मूर्खःकुमूर्तःकुशालोमलिनोविरूपःक्रूरःस्वल्पोर्थरहितःपरदारगामी पापश्चदुष्टहृदयोरिपुनोल्पबु
२७ द्धिःत्रिंशांशकेक्षितिसुतस्यभवेत्प्रसूतः १ विद्यासुखार्थरहिताःपिशुनाःकुरूपाःस्त्रीभिर्जिताःसकलहाःपरिपूर्णलुब्धाः प्रेष्याःकुकर्मनिरताःमलि
नाःकृतघ्नाःत्रिंशांशकेर्कतनयस्यभवाभवंति २ आचारवर्णनयविक्रमकर्मयुक्तासेजस्विनःकृतविदःस्वपराधनाढ्याः दीर्घायुषोबहुसुताःशिथिला
र्थवंतःत्रिंशांशकेसुरगुरोःपुरुषाभवेयुः ३ धर्मार्थकाममसुतकीर्तिजयप्रयुक्ताःप्रज्ञाविवेककुशलागुणिनोमदाढ्याः दिव्यांगनाभरणपुष्पसुगंध
सक्ताःत्रिंशांशकेशशिसुतस्यभवंतिपुंसः ४ बहुतरगुणपूर्णःसुंदरश्चारुदृष्टिर्युवतिजनविलासीसर्वशास्त्रेष्वभिज्ञः द्विजवरगुरुभक्तोदानशीलः
कृपालुर्दनुजगणगुरोःस्यान्मानवस्त्रिंशकांशे ५ त्रिंशांशादष्टमस्यानाधिपेसौम्यशुभेक्षिते शुभेत्रिंशांशकेमर्त्यःशोभनोनोविपर्यये ६ इतित्रिंशांशफ
लम् अथडिंभचक्रजातकाभरणोडिंभाख्यचक्रेरविभाच्चभानां त्रयंन्यसेन्मूर्ध्निमुखेत्रयंच द्वेस्कंधयोर्द्वेभुजयोर्द्वयंचपाणिद्वयेवक्षसियंचभानि १ नाभौचा
लिंगेचतथैवमेकंजान्वोर्भयद्वंपरिकल्पनीयं पादद्वयेभद्वितयंक्रमेणमुनिप्रवर्यैःफलमुक्तमत्र २ अत्रकेचनजान्वोर्नक्षत्रद्वयंचरणद्वयोर्नक्षत्र
षट्कंन्यासंकुर्वंति नत्रमूलंमृग्यं यतःस्पष्टमुक्तंस्वरोदये डिंभचक्रेन्य——सेद्भानिभानुभादित्रिमस्तके मुखेत्रीणिद्वयंस्कंधेएकैकंवाहुहस्तयोः पंच
हृन्नाभिगुह्येषुएकैकंषड्जानुनोः चरणाभ्यांतथैकैकंजन्मभंयत्रतत्फलं इतिसद्रत्नचामीकरचारुवस्त्रविचित्रवालव्यजनातपत्रैःविराजमानोम
नुजोनितांतंमौलिस्थलेभंनलिनीप्रभोश्चेत् १ मिष्टशनानांशयनासनानांभोक्ताचवक्तासततंप्रसन्नः स्मितावनोनात्ववदनायदातिरवेर्भवेद्वक्त्रजनेनेहिय
स्य २ वृषांशकेवंशविभूषणांचमहोत्सवार्थप्रथितःप्रतापी नरोनिशूरोःनितरामुदारोदिवाकरोड्डस्थितमंशकंचेत् ४ त्यक्तस्वदेशःपुरुषोविशेषाद्बाह्वो राम
ह्नः शौर्ययुतोनितांतं विदेशवासाप्तसुमहत्वमेतिरोमार्तंडभंवाहुगतंप्रसूतौ ५ वदान्यतासद्गुणवर्जितःस्यपराद्विरन्नादिपरीक्षकश्वसत्यानृताभ्यांमहि २
हीनोर्पीदिवामणेर्भंयदिपाणिसंस्थं ६ भूपालतुल्यःस्वकुलेसुशीलोवालोविशालोगमकीतिशाली शास्त्रप्रवीणःपरिस्थितिकालेवक्षस्थलेचेन्नलिनीश

न ७ क्षमासमेतोरणाकर्मभीरुः कलाकलापाकलनैकशीलः धर्मप्रवृत्तिः सुतरामुदारोनाभिः सरोजेंबुजबंधुतारा ८ कंदर्पदर्पाजितसाधुका
मोसुन्दीमनृत्यभिरुचिः कलाज्ञः चेज्जन्मकालेनलिनीशभंस्यात् गृहस्थलेसोतुलकीर्तियुक्तः ९ नानादेशानेकधासंप्रचारः कामोन्मादृप्तश्चंचलःश्याम
गात्रः धूर्तोमर्त्यः सत्यहीनश्चनूनंजातुस्थानेभानुभंजन्मनिस्यात् १० कृषिक्रियायांनिरतोल्पधर्मः शर्मी … जितःसेवनकर्मकर्ता नाराधदिस्यादरविं
दवंशेः मादारविंदेनसदीर्घजीवी ११ इतिडिंभचक्रं इतिश्रीमद्दैवज्ञवर्यपंडितदामोदरात्मजबलभद्रविरचितेहोरारत्नेजन्मदुष्टकालसंवत्सरादिफ
लाध्यायोद्वितीयः २ अथस्पष्टग्रहाणांलग्नादिभावस्थितिज्ञानंविनाभावफलादेशःकर्तुमशक्यस्तस्मात्पूर्वापरतनोत्रतनसहितालग्नादयोद्वादशभावास्सं
घयेशाक्तुं इलीसस्वारोहिअवरोहिफलभावविंशोपकसहितालेख्याः उक्तंसूर्यजातके यात्राविवाहचौलान्नप्राशनेजन्मनिव्रतेनृपाभिषेकेकर्तव्याः
भावाद्वादशधारथेइति अत्रभावगतग्रहाःकेवलंभावफलार्थमेवविज्ञेयाः नान्यविचारेषुपतोवक्ष्यमाणंदृष्टिगणितंस्थानगतग्रहैरेवक्रियतेतद्भा
वगतग्रहैरितिविवेकिचिंत्य उक्तंचसुधानिधौ जन्माब्दपृच्छादिशुभाशुभेषुभावाविधेयाःसुधियायतोत्रतनदर्शनेवदिशंतिनित्यंशुभाशुभंभावफलंतुभो
गाः श्रीपतिनातुजन्मादौवक्ष्यमाणग्रहयोगादिफलंभावैरेवभवतीत्युक्तं जन्मप्रयाणव्रतबंधचौलनृपाभिषेकादिकरग्रहेषु एवंहिभावाःपरिकल्प्य
नीयास्तैरेवयोगोत्थफलानियस्मात् अत्रापितैरेवभावोत्थफलानियस्मादितिकेचनपठंति अत्रायंनिष्कर्षः लग्नाद्ग्रहाणांयत्रसामान्यतःस्थाननिय
मेनैवभावफलराजयोगतात्कालिकमैत्रीचक्रादिषुफलमुक्तंतत्रभावैरेवनिर्णयःकर्तव्यः यत्रतुराश्यादिपदपुरस्कारेणतत्रतत्रत्वं ष्टमराशिमनुजइत्यादि
नाष्टकवर्गादौ अत्रवाराशिपदप्रयोगेनमेषवृषादिभिरेवराशिभिरेवंनिर्णयोविधेयः इतिराद्धयतः भावांशसमग्रहस्यपूर्णफलमिति तेनैवोक्तं भावांश
तुल्यःखलुवर्तमानभावोद्भवंपूर्णफलंविधत्ते भावोनकेचाप्यधिकेचखेटैराशिकेनात्रफलंप्रकल्प्यं भावप्रवृत्तौहिफलप्रवृत्तिःपूर्णंफलंभावसमांशकेषु
ह्रासःक्रमाद्भावविरामकालेफलस्यनाशःकथितोमुनींद्रैः संधिप्रयोजनमुक्तमन्यत्र आरंभसंधेस्तुचरोयदासौनःफलंददात्यादिमभावमात्तं विरामसंधे

रपिकुलादानामागामिभावोन्यफलप्रदः स्यात् इतिभावकुंडलीप्रयोजनमुक्तं वामनेन लग्नादिभावाविन्यस्ताः स्वचक्रे द्वादशारके उदयैर्ग्रहयोगाद्यैर्व्यंजय
तीष्टमंगिनामिति भावफलप्रशंसामाह भरद्वाजः सीमंते जन्मचौलोपनीययात्राप्रवेशने अभिषेके विवाहे च शस्तं भावफलं विदुरिति भारद्वाजवाक्येपि भा
वैर्भावफलमेवोक्तं ननु योगफलं यत्तु केनविदुक्तं ससंधिभावसाधनमार्षशास्त्रानभिहितत्वात् निर्मूलमिति तन्न उक्तं यतः ससंधिभावसाधनमुक्तं पराश
रहोरायां लग्नं सुखास्तु खं कामात्कामं स्वात्खं चलमतः त्र्यंशमेकद्विगुणितं युक्त्या लग्नादिषु क्रमात् पूर्वापरयुतेरर्धं संधिः स्याद्भावयोर्द्वयोः एवं द्वादशभावाः स्यु
र्भवंतिहि ससंधयइति स्वोच्चे शुभं फलं पूर्णं त्रिकोणे पादवर्जितं स्वर्क्षे दलं मित्रगेहे पादमात्रं प्रकीर्तितं पादार्धं समभे प्रोक्तं व्यर्थं नीचास्तशत्रुगे तद्व
दुष्टफलं ब्रूयाद्व्यत्ययेन विचक्षणाः अथ ग्रहभावफलान्याह वृद्धयवनः मूर्तौ स्थितः संजनयेद्दिनेशो नरं सरोगं विकलं महेर्ष्यं प्रभूतकोपं बहुशत्रुपक्षं
प्रभावहीनं परमर्षकं च १ द्वितीयसंस्थः कुरुते र्थहीनं सूर्यः प्रसिद्धा रहितं कृतघ्नं श्रद्धाविहीनं विगतस्वभावं कुमित्रयुक्तं परवंचकं च सूर्यस्तृतीयः कु
रुते मनुष्यं नीरोगदेहं नयनेन हीनं परोपकारप्रणतं प्रसिद्धं विवेकविद्याभ्यधिकं सदैव ३ चतुर्थगः संजनयेत्कृतघ्नं हिंस्रं सदाशीलविवर्जितांगं स्त्रीनिर्जि
तं पुष्टपरं कुदेहं विवर्जितं सुन्यधनेन नित्यं ४ सुतस्थितः स्वल्पसुतं प्रसूते दिनादिनाथः प्रणयेन हीनं कुकर्मपरक्तं व्यसनाभिभूतं पि
तादिकं भूरिविशसयुक्तं ५ रिपुस्थितो वासरपः प्रसूतो हतारिपक्षं पुरुषं सुरूपं विनीतवेषं सुजनैः समेतं प्रियातिथिं बांधवसं
मतं च ६ कलत्रगस्तीक्ष्णकरः प्रसूतौ कुरूपदेहं कुकलत्रभाजं कफानिलाभ्यां परिपीडितांगं कामातुरं देहगतप्रमोहं च ७ करोति सूर्यः
खलु चाष्टमस्थो विदेशगं कं पुरुषं प्रहीनं प्रपीडितं सुख्यभवे स्वरोगे जनानुरागेण विवर्जितं च धर्माश्रितस्तीक्ष्णकरः प्रसिद्धं क
रोति मर्त्यं हृपतेरभीष्टं परोत्थवित्तेन समं समेतं निरस्तधर्मं च विवर्जितं च ९ कर्माश्रितो वासरपः प्रसूते सत्कर्मभाजं विनयैः समे
तं प्रभूतमित्रं सुभगं सुकांतं नृपाधिकं देवगुरुप्रभक्तं १० लाभाश्रितः संजनयेद्दिनेशः प्रभूतलाभं सुभगं निरीक्षं सुभोजनाढ्यं

शुभ	अशुभम्
स्वोच्चे १।०	०।०।०।०
मूले ०।४५	०।०।७।३०
स्वभे ०।३०।०	०।०।१५
मित्रे ०।१५	०।०।३०
समे ०।७।३०	०।०।४५
नीचे ०।०।०	१।०।०
शत्रौ [illegible]	

नेत्रोहनाढ्यं प्रियंवदं कामविचक्षणं च ११ व्ययाश्रितः संजनने दिनेशो व्ययैः समेतं कुजनप्रसंगात् प्रपीडितं वैरिभिरेव नित्यं कुकर्मरक्तं कुजनं तथैव १२
इति रविफलं मूर्तिस्थितो रात्रिपतिः प्रसूते संपूर्णवित्तः सुभगं तु कांतं सौराग्यसंतानं बहुपापयुक्तं विहीनसौभाग्यगतं सौहृदं च १ द्वितीयसंस्थः कुरुते शशां
कः कोशान्वितं सर्वसमृद्धियुक्तं प्रियंवदं ब्राह्मणदेवभक्तं महाप्रभावं बहुसौहृदं च २ ताराधिपः संजनयेत्तृतीये सुरूपदेहं सुभगं मनोज्ञं स्त्रीवल्लभं स
धर्मालं सुसंप्रजास्वभीष्टं बहुपुत्रपौत्रं ३ सुखस्थितः संजनयेच्छशांकः प्रभूतगोरव्यपुरुषं प्रधानं स्त्रीणामभीष्टं गुरुदेवभक्तं नराप्रधानं गतवैरि।
रोगं ४ चंद्रः सुतस्थः सततं प्रसूते विद्याधिकं ब्राह्मणदेवभक्तं सुहृत्स्वभावं विजितारिपक्षं प्रियंवदं पार्थिववल्लभं च ५ षष्ठः शशांकः कुरुतेऽल्पजीवं रोगा
धिकं शत्रुनिपीडितांगं कुरूपदेहं कुधिया समेतं सौख्यैर्विहीनं परवंचकं च ६ कलत्रगः संजनयेच्छशांको धर्मध्वजं भूरिदयासमेतं प्रसन्नमूर्तिं विभवा
न्वितं च प्रख्यातकीर्तिं सुधिया समेतं ७ चंद्रोऽष्टमस्थः कुरुतेऽल्पवीर्यं स्वल्पायुषं सत्यदयाविहीनं स्नेहैर्विहीनं परदाररक्तं वृथाटनं बांधववर्जितं च ८ धर्मा
श्रितः संजनयेच्छशांकः प्रभूतमित्रं प्रचुरान्नपानं प्रसिद्धियुक्तं प्रणतारिपक्षं प्रशंसितं साधुजनेन नित्यं ९ आकाशसंस्थः कुरुते शशांको भूपप्रियं बोध
वमानतुष्टं प्रियातिथिं प्रीतिकरं गुरूणां सदैवभक्तं वरदेवतानां १० लाभाश्रितः संजनये द्विदग्धप्रभूतलाभं स्वलु शीतरश्मिः सुरूपदेहं सुजनानुरक्तं उ
दारचित्तं हतशत्रुपक्षं ११ व्ययाश्रितः शीतकरः प्रसूते स्वकोस्थरोगैः परिपीडितांगं वैरिप्रधानं बहुशत्रुपक्षं स्वल्पायुषं सत्यविहीनवेषं १२ इति चंद्रफ
लं होराश्रितः भूतनयः प्रसूते पित्रानिलाभ्यां सहितं कुरूपं विहीनशक्तिं मतिवर्जितं च व्ययैरनिष्टैः सहितं कृतघ्नं १ धनस्थितो भूतनयः प्रसूते धनैर्विही
नं जनतावरुद्धं कठोरवाचा निरतं कुबुद्धिं प्रभावहीनं गतसौहृदं च २ करोति भौमः सहजाश्रितस्थ्वनी रोगदेहं विजयप्रधानं नरेंद्रमानान्वितमिष्टधर्म
प्रभूतकोशं सततं सुदांतं ३ सुखस्थितः संजनयेच्च वक्रः सुखैर्विहीनं गतदर्पमेव सुबुद्धिहीनं गतबंधुवर्गं व्ययाश्रितं कामपरं नृशंसं ४ सुतस्थितः सं
जनयेच्च वक्रः सुतैर्विहीनं पुरुषं सदैव पापैः समेतं परतर्ककं च विद्याविहीनं गतसौहृदं च ५ रिपुस्थितः संजनयेत्कुमारिं कुलप्रधानं प्रियदर्शनं च संख्या

हो॰र॰ घितंसाधुजनेननित्यंविनीतवेषंसततंसुशीलं ६ कलत्रसंस्थः क्षितिजः प्रसूतेविदेशभाजंकुकलत्रयुक्तंविवादशीलंवहुशत्रुपक्षंनीचानुरक्तंप्रियसा
३९ हसंच ७ मृतिस्थितः संजनयेन्महीजः शस्त्रार्त्तदेहंप्रभयाविहीनं कुपार्थिवासक्तसुमित्रचेष्टंकृपाविहीनंगतसौहृदंवै ८ धर्माश्रितः संजनयेत्कुधर्मभौमः
कुरूपंगतवंधुवर्गं भाग्यैर्विहीनंविगताभिमानं प्रनष्टदेहंमतिवर्जितंच ९ लाभाश्रितः पार्थिवलाभतुष्टंनरंप्रसूतेक्षितिजः सदैवहृतारिपक्षंनिजवंधु।
मान्यंप्रशंस्यशीलंप्रथिताभिमानं १० व्ययाश्रितः संजनयेच्चभौमोव्ययाधिकंभूरिरिपुप्रयुक्तं प्रभूतपापंव्यसनैः समेतं मयार्थहीनंधर्मविवर्जितंच ११ इति
चंद्रगृहगतः १ यवनीविनाशितसारंयवतिनिमित्तंचदुःखितशरीरं कर्कटगःशशिदृष्टोजनयतिसुखवर्जितंसौम्यः २ स्वल्पप्रकृतिमनिमुखरंप्रिया ५२

स्वितं कूटकारकं चौरं वक्रेक्षितः शशिगृहे कुरुते सौम्यः प्रियालापं ३ मेधाविनमति धन्यभाग्ययुक्तं वल्लभं वरस्त्रीणां गुरुणा दृष्टः शशिभे वित्तसुखभाजनं बुधः
कुरुते ४ कंदर्पसदृशरूपं प्रियंवदं गीतवादित्रविधिज्ञं सुभगं शशिभे ललितं कुरुते भृगुजेक्षितः सौम्यः ५ हृष्टं भेरुचिपापं तिं धर्मभाजं गुणैर्वियुक्तं तः सह
ज्ञाचारद्वेष्यं कुरुते सौरेक्षितः शशिभे ६ इति कर्कगे बुधे दृष्टिः सर्व्वं दिनकरदृष्टो धनगुणवृद्धं नरं बुधः कुरुते हिंस्रं स्फुटं सिंहे स्वभावप्रलविगतलज्जं १
ललनाप्रियं मतिचतुरं काव्यकलागेयनृत्यरतमिभे धर्त्तिनं स्वशीलवेषं करोति चंद्रेक्षितः सौम्यः २ ज्ञानी च स्वविभवने दुःखवर्जितं विज्ञातागमसरूपं
ऋवतुस्शीलसंक्रांतनपुंसकं भौमसंदृष्टः ३ सुकुमारमतिप्राज्ञं रविभे वादज्ञमीश्वरं ख्यातं परिवारवाहनयुतं करोति गुरुवीक्षितः सौम्यः अतिशयरूपं ला-
लितं प्रियंवदं वाहनाढ्यमतिधीरं जनयति सितेन दृष्टो मंत्रिणामतिपार्थिवं सिंहे ५ आयतगात्रं रूक्षं श्मश्रु विरूपं स्वेदतोयगंधं च अतिदुःखितं रविगृहे
सौम्यः सुखवर्जितं रविजदृष्टः ६ इति सिंहगे बुधे दृष्टिः स्थूरं प्रमेहपीडितमृष्मयोपहतमानसं प्रांतं जनयति रविणा दृष्टो जीवगृहे चंद्रजः पुरुषं १ लेखकोम
तिस्कं कुमारं प्रस्थायिनं राजमंदिरे गुरुगृहस्थः सुखभागिनमतिपापं कुरुते चंद्रेक्षितः सौम्यः २ श्रोणीभूतकं श्रेष्ठं चौराणां विपिनं निवासिनं चापि कुरुते
लिपिकरमधनं सौम्यो गुरुमंदिरे रुधिरदृष्टः ३ स्मृतिमंतं कुलसंपन्नं कुरुते प्रतिभास्क विज्ञानं नृपमंत्रिकोशपालं गुरुभे सौम्यो निरीक्षितो गुरुणा ४ कन्या
कुमारकानां लेख्याचार्यं धनान्वितं कुरुते गुरुभेत्तः सितदृष्टः सुकुमारं शौर्यसंयुतं मनुजं ५ दुर्गारण्याभिरतं वकाशं दुष्टशीलमतिमलिनं कुरुते रविसुतेन दृष्टो
बुधो नरं जीवराशिगो भृष्टं ६ इति जीवगृहगे बुधे दृष्टिः वल्लभमतिसारयुतं वहुभक्षं निष्ठुरं प्रियालापं जनयति रविणा दृष्टो सौरगृहे बोधनः ख्यातं १ अवनिजी
विनमसमृद्धं मूलस्कराकं दवाणिज्यं वापि भीरुं सठरं मरूपं शनिभे चंद्रेक्षितः कुरुते २ वाचाचपलं सौम्यं क्रीडारसमत्वरं सुखाधारं कुरुते भूमिजदृष्टो रवि
तनयगृहे बुधः पुरुषं ३ वहुधनधान्यसमृद्धं ग्रामपुरश्रोणिपूजितं स्वस्विनं कुरुते गुरुणा दृष्टः शशितनयः सार्थवाहकं शनिभे ४ नीचपतिं च विरूपं बु
द्धिविहीनं कामवश्यं च अतिस्तजननं कुरुते भार्गदृष्टार्किभे शशिजः ५ पापकरं स्करदरिद्रं कर्मकरं चातिदुःखितं दीनं कुरुते शशिना दृष्टः सौरगृ

हो. र. हेक्रोधनः पुरुषं ६ इतिशनिगृहगेवुधेदृष्टिः धर्मिष्टमनृतभीरुंविख्यातसुतंमहाभोगं भौमगृहेरविदृष्टोसुरराजमंत्रितगुरुः कुरुते १ इतिहासंमहा
५३ काव्यकुशलंवहुरत्नस्त्रीषुभाजनंकुरुते कुजगेहेशशिदृष्टस्त्रिदशगुरुः पार्थिवंप्राप्तं २ नृतपुरुषश्रूरमग्र्यंनयविनयसमन्वितंचधनिनं अविधेयभृ
त्यदारंजनयतिवक्रेक्षितोजीवः ३ गृहशयनवसनगंधैर्माल्यैरालभनादिभिर्विभवैः समुदितमतिभीरुंकुरुतेशुक्रेक्षितोजीवः ४ मलिनंलुब्धंतीक्ष्णंसाहसिकंसमंजंचधीरंच अस्थिरमित्रापत्यंत्रिदशगुरुः सौरसंदृष्टः ६ इतिभौमगृहगेगुरोर्दृष्टिः द्विपदचतुष्पदभागिनमत्याद्यमाश्रितंग्रामिहपुरुषं प्राप्तंनरेंद्रसचिवंकरोतिसूर्येक्षितोजीवः अतिधनिनमतिमधुरंजननीदयितंप्रिपंचयुवतीनां अंसुपभोगंकुरुतेत्रिदशगुरुर्वीक्षितः शशिना २ दयितंकलत्रीणांप्राप्तंश्रूरंचधनसमृद्धंच सुखिनंनरेंद्रपुरुषंजनयतिरुधिरांगसंदृष्टः ३ प्राप्तंचतुरस्रभमंमधुरंविभवान्वितंगुणैः समृद्धंच मृदुंचविमलिनंकांतंजनयतिवुधवीक्षितोजीवः ४ अतिललितःकमतिधनिनंवरभूषणधारिणंस्रमृदुशील वरभोगशयनवसनंजनयेद्गुरुर्वीक्षितोजीवः ५ प्राप्तंवहुधनधान्यमहत्तरंग्रामनगरपुरुषाणां मलिनमरूपमभार्यंकुरुतेसौरवीक्षितोजीवः ६ इतिशुक्रगृहगेगुरोर्दृष्टिः आर्यंग्रामश्रेष्ठंदुर्विनसुदारपुत्रधनयुक्तं तीक्ष्णाकरदृष्टमूर्तिस्त्रिदशगुरुर्वुधगृहेकुरुते १ चंद्रेक्षितस्तुकुरुतेवसुमंतंमातृवत्सलंधन्यं सुखभुवतिपुत्रवंतंसुरपतिगुरुस्तुषमंगुरुः २ समरशतलब्धविजयंवीक्षितंगात्रधनान्वितंकुरुते धरणीसुतदृष्टगेहस्त्रिदशगुरुः संमतंचलोके ३ कुरुतेज्योतिषिकुशलंवहुसुतंपुत्रवित्तवंतंच अतिशयविरुद्धवाक्यंवुधभेसौम्यक्षितोमान्यं ४ देवप्रासादानांकृत्सेवकंसुदारंभोक्तारं हृदयहरं[illegible]णंकुरुतेशुक्रेक्षितो जीवः ५ श्रेणीगणराष्ट्राणांपुरोगमंग्रामपत्तनानांच जनयतिशशिनादृष्टः सुवंशजीवोनरवुधभे ६ इतिवुधगेहगुरोर्दृष्टिः रविदृष्टः शशिभवने विख्यातमथाग्रसस्यसमूहानां सुखधनदारविहीनंपरदाराढ्यगुरुः कुरुते १ [illegible]तंस्फातियंतंनृपतिवहुकोशवाहनस्याद्दिं उत्तेभ्रयुवतीपुत्रंज
नयतिशशिभेगुरुर्हिमगुदृष्टः कौमारदाराढ्यहेमालंकारभागिनंप्राप्तं अं सुवर्णगर्भेजीवोरु[illegible]गवीक्षितः कुरुते २ वांधवमातृनिमि

मृधानेतकलत्रान्वितविगतैपाप जनयतिवुधेनदृष्टः प्रत्ययिनंमत्रिणंजीवः ४ वहुदारंवहुविभवंनौ[illegible]लंकारभागिनंमुखिनं भूपतनयदृष्ट
नैः सुभगंपुरुषंगुरुं कुरुते ५ सौरेणदृष्टमूर्त्तिःमहत्तरंग्राममैन्यनगसर्णो वाचालंवहुविभवंवृद्धंभोगदारयुतं ६ इतिकर्कगुरोर्दृष्टिः लोकद्वयि
तस्यात[illegible]पतिर्धनसमृद्धं जनयतिदिनकरदृष्टस्त्रिदशगुरुः शीलसंयुक्तं १ अतिसुभगमतिमलिनंस्त्रीभाग्येरुपचि[illegible] रजनीकरदृ
ष्टिमूर्त्ति त्रिनेंद्रियंजनयतिसुरेज्यः २ साम्यंसमतांगुरुणंविशिष्टकर्माणमग्र्यमतिनिपुणं स्तंभ्यंशूरंगुरुरिहंभौमेक्षितः कुरुते ३ मृत्स्वास्तंज्ञानरतंवि
ज्ञानगुणान्वितंरुचिरं वाक्यंकुरुतेमंत्रिणमग्र्यंवुधेक्षितोविश्रुतंजीवः ४ दयितंस्त्रीणांसुभगंभूपतिसत्कारसत्कृतंपुरुषं सितदृष्टः सुरपूज्यःजनयति
सिंहेनमहासत्वं ५ वहुकथंनंमधुरवचनंसुखरहितंवित्तभागिनंतीक्ष्णं अमरस्त्रीतुल्यसुखभोक्तारंगुरुःसौरसंदृष्टः ६ [illegible]सिंहस्थेगुरुदृष्टिः नृप
तिविश्रुतंजनयतिविवुधगुरुःसंस्थितःस्वगृहे रविदृष्टः परिपूरितधनंवंधुवंस्युक्तं १ अतिसुभगंयुवतीनांमानधनैश्वर्यगर्वितं कुरुते नानाविधसौख्य
युतंजन[illegible]सितोजीवः २ संग्रामविक्षतगात्रंक्रूरंवांधवमतीप्रकरं जनयतिकुजेनदृष्टोदेवगुरुर्नदृष्टपरिकारं ३ मंत्रिणमथनृपतिवासुरुधनसौ
भाग्यसत्वसंपन्नं कुरुतेवुधेनदृष्टः सकलानंदयुतमप्रतिमतिरूपं ४ भोज्यान्नपानविभवपरिग्रहशयनासनोत्तमस्त्रीकं आभरणवसनभृतं[illegible]मया
तिशुक्रेक्षितोजीवः ५ मलिनमतीवसभयंग्रामपुरश्रेण्यधिकृतंदीनं रविजेनसदादृष्टोजनयतिसुखवर्जितंजीवः ६ इतिस्वगृहेगुरोर्दृष्टिः भृत्ये
पृथिवीपालंसौरगृहेभानुनाचसंदृष्टः प्रकृतिसमृद्धिंजनयतिजीवोविभवान्वितंसविक्रांतं १ पितृमातृभक्तमार्यंकुलोद्वहंप्राप्तमाद्यमंदर्क्षे चंद्र
क्षितस्तुजीवःसुशीलमतिधार्मिकंकुरुते २ सुरनरेंद्रयोधगर्वितंप्राप्तं स्मितंसुवेषंचविख्यातमार्यमान्यंकरोतिवक्रेक्षितोजीवः ३ कामरतिगुणमु
ख्यश्रेष्ठतमंसार्थवाहनाढ्यंवाचातुर्यमित्रंवंधनंवुधसंदृष्टोगुरुःप्राप्तं ४ सुखिनंप्राप्तंव्यपगतदोषंचिरायुषंसभयं जनयतिसितेनदृष्टोलक्ष्मीपरिवे
ष्टितंपुरुषं ५ अनुपमनुविद्यमहत्तरंदेश्यपार्थिवंपुराणं द्विपदंचतुष्पदंभागिनंमाद्यसौरेक्षितोजीवः ६ इतिशनिगृहेगुरोर्दृष्टिः इतिगुरुः स्त्री

हो.र. द्वतोदुःखार्त्तंयुवतिनिमित्ताद्विनष्टधनसौख्यं कुजभवनेरविदृष्टोजनयतिशुक्रोनृपश्लाघ्यं १ उद्धतमतिचचपलकामातुरमायेयुवतिभर्तारं जनयतिभृ
५५ गुरपत्येरजनीकरवीक्षितःपुरुषं २ धनसौख्यमानरहितंदीनंपरतर्कमलिनचेष्टं जनयतिरुधिरक्षेत्रेरुधिरेणनिरीक्षितःशुक्रः ३ मूर्खंदृढमनार्यमस्व
धुपरिवारकंविनयहीनं वैरंक्षुद्रंक्रूरंबुधदृष्टोभार्गवःकुरुते ४ सुनयमुदारचरित्रंसुशरीरंव्यायतंबहुसुतंच त्रिदशगुरुदृष्टमूर्तिर्जनयतिरुधिरा
लयेशुक्रः ५ अतिमलिनमलसमधनंस्वभिमतजनसेवकंकुरुते भृगुतनयोरुधिरगृहेदिनकरपुत्रेक्षितश्चौरं ६ इतिकुजगृहगेशुक्रेदृष्टिः दि
नकरदृष्टःशुक्रोवरभार्याभाजनंधनसमृद्धं जनयत्युत्तमपुरुषंस्वहितोनिर्जितंचापि १ परमकुलीनापत्रंसुखधनदारैः सुतेरूपेतंच आर्द्रंचयुव
तिजितंजनयति [illegible] चंद्रेक्षितःशुक्रः २ दुःशीलाभर्तारंप्रमदाहेतोश्चनष्टगृहसारं जनयतिशुक्रःस्वगृहेमदनवशंवक्रसंदृष्टः ३ प्रज्ञाचारंभर्तिनंवा
ह्लनपरिभोग... नेसुभेमं गणपतिमर्थेश्वरंवाबुधदृष्टोभार्गवःकुरुते ४ शशिसुतभवनेशुक्रस्त्रिदशगुरुनिरीक्षितोनरंकुरुते अतिसुखिनमति
धनिनं... निरूपमात्तमाचार्यं ५ दिनकरसुतेनदृष्टोबुधवनगतोऽतिदुःखितंशुक्रः जनयतिखलुपरिभूतंचपलंद्विष्टंचमूर्खंच ६ इतिबुधगृहगे
शुक्रेदृष्टिः कर्मपरांलब्धांगीनृपतिसुतांरोषणांधनोपेतां भार्यांददातिशुक्रः चंद्रगृहेभानुसंदृष्टः मातृसपत्निजनकं कन्यापूर्वभर्जांवस्तुतां
सुभगंसुखिनंललितंकुरुतेचंद्रेक्षितःशुक्रः २ सुकलाविदमर्थार्तंस्त्रीहेतोदुःखितंचसुखितंच भौमेक्षितःप्रजनयेद्दुर्द्धिकंचात्मवर्गस्य ३ पंडि
तभार्यंपतिं... बंधुनिमित्तंदुःखितंनित्यं असुखितमध्यनंप्राज्ञंकरोतिबुधवीक्षितःशुक्रः ४ पुत्रैर्धनैश्चदारैश्चबांधवैश्च ... कुरुते नरंसिंहयुक्तं
नरपतिदर्पितंचमकुसंदृष्टः ५ स्त्रीनिर्जितंदरिद्रंपतितमरूपंचतथार्थचपलंचजनयतिसुखैर्विहीनंदिनकरसुतवीक्षितःशुक्रः ६ इतिकर्कगेशु
क्रेदृष्टिः सेर्ष्यंकन्यारयितकामार्तंयुवतिकारणाद्दनिनंच भागिनमयूकरभाजांजनयतिरविवीक्षितःशुक्रः १ मातृसा... जेमकंयुवतिकृतेदुः एमः
खितंविभवबंतं वसुमंतमनेकपतिंकरोतिचंद्रेक्षितःशुक्रः २ नृपपुरुषविख्यातंयुवतिकृतेदुःखितं... मृदं शुभं... परदाररतंजनयतिवक्रो। ५५

सितः शुक्रः ४ ग्रहनिरतं तुच्छस्त्रीलोलं पारदारकं शूरं शठमातृकं धनिकं करोति वुधवीक्षितः शुक्रः ४ [illegible] जनभृत्ययुतं वहुसत्यप्रियं [illegible] कुरु
ते नरेंद्रमंत्रिणमिंद्रगुरुवीक्षितः शुक्रः ५ नृपतिं नृपतिप्रतिष्ठं सूर्यगृहे कोशवाहनसमृद्धं रंडापतिं सुरूपं [illegible] युतं सौरसंदृष्टः ६ इति सिंहे शुक्रदृष्टिः
अतिरोद्रमतिस्थूरं प्राज्ञं धनयुक्तमतिदयितं रविणादृष्टो जनयति विदेशगमनं स शुक्रः १ ख्यातं नरेंद्रपुरुषं भोगैरशनैः [illegible] पुलैः कुरुते स्य
गुणाभारगुरुं भे चंद्रेक्षितः शुक्रः २ अधिकद्वेष्यं स्त्रीणां विचित्रसुखदुःखमर्थवंतं च कुरुते यो धनभाग्यभूमिसुते मे क्षितः शुक्रः ३ आभरणभूषणानां
भागिनमपि चान्नपानानां वुधदृष्टो भृगुतनयः कुरुते वहुवाहनार्थयुतं ४ गजतुरगगोधनाढ्यं वहुपुत्रकलत्रमतिसुखिनं गुरुणा दृष्टो गुरुभे जनयति
शुक्रो महाविभवं ५ निःस्वं च धनप्रायं सुखिनं भोगान्वितं धनसमृद्धं गुरुभवने शनिदृष्टः कुरुते शुक्रो नरं सुभगं न ६ इति गुरुराशिगे भृगोर्दृष्टिः स्त्रीमि
त्रदूषभुजं स्त्रीणां महाधनं सर्वसौख्यसंपन्नं सौरगृहे रविदृष्टः कुरुते शुक्रो नरं क्रूरं १ तेजस्विनमृतिरूपं सुवंधुपुत्रान्वितं तथा सुभगं कुरुते शशिना दृष्टो र
विजगृहे भार्गवः कांतं २ छायाविनाशकारिणमनर्थवहुलं च रोगिणं शुक्रः कुरुते अमामित्रं पश्चात्सुखिनं च क्षितिजसंदृष्टः ३ प्राप्तधनधर्म [illegible] विधा
न [illegible] मतिशौच [illegible] विद्वांसं जनयति वुधेन दृष्टो भृगुतनयः सौख्यसंपन्नं ४ प्रियवस्त्रगंधमाल्यं सुकुमारं गीतवादित्रविधिज्ञं जनयति गुरुणा दृष्टो भृ
गुपुत्रः सकलत्रयुतं ५ सौरगृहे शनिदृष्टः शुक्रो वरवाहनार्थयुतं मलिनं श्यामशरीरं रुचिरगात्रं महा [illegible] ६ इति शनिगृहगे भृगोर्दृष्टिः इति शुक्रः
[illegible] निरतं मथाढ्यं गोमहिषाजाविसंयुतं धन्यं सूर्येण दृश्यमानो जनयति कर्मोद्यतं सौरः १ चपलं नीचप्रकृतिं नीचरूपांगनासु संसक्तं जननीकर दृश्य
मानः सुखधनरहितं नरं कुरुते २ प्राणिवधकरं क्षुद्रं कुरुते चौराधिपं सुविख्यातं प्रिययुवतिनां संतप्तं सौरो वक्रेक्षितः कोजे ३ अनृतयुतं क्रोधपरं
हुवाचं नस्करप्रायं च कुरुते वुधेन दृष्टः सुखविभवनिःकृतपुरुषं ४ सुखधनसौभाग्ययुतं नृपमंत्रिणमग्रगण्यं च सुविचारं गुरुदृष्टो रवितनयः कु
जगेहे मानवं कुरुते ५ अतिचंचलं च विषमं वरांगनापण्ययुवतिसंसक्तं शुक्रेण वर्जितभोगं जनयति रविजो दृष्टः ६ इति भौमगृहे शनेर्दृष्टिः सु

टवाक्यंविगतधनंविद्वांसंपरगृहेषुभोक्तारं रविणामंदोदृष्टः कुरुतेपरपेलवंपुरुषं १ युवतीजननीदारंनृपवंद्यपुरस्कृतंयुवतिकांतं शशिनादृष्टःसौरः
कुरुतेवस्त्राद्यकुसुमपरिवारं २ संग्रामकथाभिज्ञंसंग्रामप्रत्यर्पिनंसुवहुवाक्यंच जनयतिकुजसंदृष्टोजनपरिवेष्टितंसौरः ३ नित्यप्रहसनशीलंक्ली
वरतंयुवतिसेवकंनीचं वुधदृष्टोरवितनयःशुक्रगृहेमानवंकुरुते ४ परिवारैः परिखिन्नंपरकार्यरतंप्रियंचलोकस्य कुरुतेगुरुणादृष्टोदातारंसौ
रमेसौरः ५ मध्येस्त्रीकृतसौख्यंरत्नानांभाजनंमहासत्वं शुक्रगृहेसितदृष्टोजनयतिसौरोनृपतिदयितं ६ इतिशुक्रगृहगेशनौदृष्टिः सुखरहितमथांतं
तंधार्मिकंजितक्रोधं क्लेशाभिज्ञंधीरंकुरुतेरविवीक्षितः सौरिः नृपतुल्यंस्निग्धतनुंनारीभ्यःप्राप्तविभवसत्कारं स्त्रीणांवाहुल्यपरमंसौरश्चंद्रेक्षितःकुरुते
२ विख्यातेमल्लहितंमयभारवहंतथाविकृष्टमतिं रुधिरांगवीक्षिततनुर्जनयतिसौरोधनंपुरुषं ३ धनिनंयुद्धकुशलंशिल्पाचार्यंचशीतलदृष्टः शि
ल्पकर्मतिनिपुणंवाजनयतिबुधवीक्षितःसौरः ४ प्रत्ययिनंराजकुलेसर्वगुणसमन्वितंसतामिष्टं गुणगृह्यधनंकुरुतेगुरुणादृष्टःशनैश्चरस्त्वापि।
स्त्रीमंतशास्त्रकुशलंयोगाचार्यंचयोषितांचापि शुक्रेक्षितोऽर्कपुत्रःस्त्रीणांमिष्टंनरंकुरुते ६ इतिवुधगृहेशनौदृष्टिःपित्रादिरहितंवाल्यदिनपतिदृ।
ष्टःशनैश्चरःशशिभे धनसुखदारविहीनंकर्षणपुष्टंनरंपापं १ जन्मनिमातुरनिष्टंधनवंतंसहजपीडितंवापि हिमकिरणेनतुदृष्टोदिनकरपुत्रोनरं
कुरुते २ नृपतिसमन्वितविभवंविकलांगंकनकरत्नपरिवारं क्षितिसुतदृष्टोसौरःकुरुतेनिजवंधुपत्नीशं ३ निष्ठुरमतिप्रचारंग्रामिताचारंधार्मिकं
चापि जनयत्युत्पुलकमचेष्टं वुधदृष्टोभास्करिःपुरुषं ४ वाल्येक्षेत्रगृहाणांपुत्राणांभागिनंकुरुते धनरत्नदारवंतंत्रिदशगुरुनिरीक्षितःसौरः ५॥
ख्यायनकुलजातानांरूपविलासैःसुखैश्वसहितानां कुरुतेजनानराणांभार्गवदृष्टःसौरः ६ इतिकर्कगेशनौदृष्टिः धनसुखहीनंमनार्यंप्रियानृतं
पापसंयुतंरविभेभृत्यकंदुःखितमेकंजयतिसूर्येक्षितःसौरः १ नानारत्नधनानांयुवतीनांभाजनंविपुलकीर्तिं श[illegible]कुरुतेसौरोनृपदक्षमं
पुरुषं २ प्रतिदिशमटनमधनंचौरंगिरिदुर्गवसनेक्षुद्रं भार्यापुत्रविहीनंजनयति शनीरुधिरांगदृष्टः [illegible]कंमधनमल्पंस्त्रीकं [illegible]

संदीनं जनयति बुधेन दृष्टो दिनकरभवनाश्रितः सौरः ४ ग्रामपुरश्रेणीमं पुंसगमाढ्यं च वित्तवंतं च गुरु[illegible]जनयसितसौरः सुश[illegible]
निर्दंष्प्रमकांतं जठरं स्करवभागिनं धनसमृद्धं शुक्रेक्षितस्तु कुरुते भानुगृहे रविसुतः सौतं ६ इति सिंहगेशनैश्चरदृष्टिः परपुत्राणां पतिं कुरुते सूर्येक्षितो धन।
समृद्धं ते भ्यो धनं च लभते मानेरव्याततथा सौरः १ मातृरहिते सुशीलेनामद्वयसंयुतं रवेस्तनयः जनयति शशिना दृष्टो भार्यासुत[illegible]संपन्नं २ [illegible]
धिगृहीतं लोकद्विष्टप्रवासनिरतंच क्षुद्रं निंदितशीलं जनयति भौमेक्षितः सौरः ३ जनयति गुरुभवनस्थो नृपतिं नृपसमं तस्मकं वा[illegible]निसो।
म्यसुभगं सौम्येक्षितः सौरः ४ नृपतिं नृपतुल्यं वा मंत्रिणमथनायकं च सेनायाः जनयति गुरुणा दृष्टः सर्वापद्वर्जितं सौरः ५ कुरुते द्विमातृकं विपन्नोद्वि
तं विविधशीलं जनयति सितेन दृष्टो रवितनयः कर्मसंपन्नं ६ इति गुरुगृहगेशनैश्चरदृष्टिः रोगिणमरूपभार्यं परान्नभोगिनम[illegible]दुःखसहं च अटनारतं भा
रसहं जनयति सूर्येक्षितः सौरः १ चपलमसंतप्तपापं मातुरनिष्टं प्रियान्वितं स्वाद्य उत्पन्नमंदनर दुःखं करोति चंद्रेक्षितः सौरः २ अतिरूपं विक्रांतविख्यातगुणं म
हाजनपुरोग तीक्ष्णं साहसनिरतं जनयति वक्रेक्षितो मंदः ३ भारवहान्स्तामसिकान्न शोभनविटपपेक्ष्य वर्जितांश्च विविधांश्च धूर्तनिरतान् जनयति[illegible]वी।
क्षितः सौरः समुक्तिगुणं नरेंद्रं रूपवशकरं चिरायुषमरोगं त्रिदशगुरुदृष्टमूर्तिर्जनयति सौरः स्वगृहसंस्थः ४ विधनं परदाररतं सुभगं सुखिनं च वित्त[illegible]च॥
उत्पन्नपानभक्ष्यं जनयति शुक्रेक्षितः सौरः ६ इति स्वगृहगेशनैश्चरदृष्टिः इति ग्रहाणां दृष्टिफलानि इति श्रीमद्दैवज्ञवर्यपंडितदामोदरात्मजबलभद्रविरचिते
होरारत्ने ग्रहभावफलदृष्टिफलाध्यायस्तृतीयः ३ ततो मैत्रीचक्रादुपयुक्ताः सूर्यादिग्रहाणां भावा लेख्याः ततो मैत्रीचक्रे सप्तवर्गचक्रं होराद्रेष्काणनवांश।
द्वादशांशत्रिंशांशकुंडलीस्वेष्टकालफलसहितं च लेख्यं ततः स्थानदिक्कालनिसर्गचेष्टादृग्बलानि लेख्यानि ततो ग्रहाणामिष्टकष्टचक्रं लेख्यं अथ सू
र्यादिग्रहाणां राश्यादिबलवर्गफलान्याह वृद्धयवनः मेषंगतोर्कः समरप्रचंडं नरं प्रसूते धनवीर्ययुक्तं शास्त्रार्थवाक्कर्मफलव्यशाब्दं अयोषिणां सा[illegible]
तमुच्चवृत्तं १ वृषंगतोर्कः प्रियगंधमाल्यमिष्टाशनाच्छादनलब्धसौख्यं संगीतविद्याभिरतं रतिज्ञं नरं सुयानं बहुमित्रयुक्तं २ बंधुप्रियं साहसकर्मशी

लसुखान्निरोगोपहतंसपापं तिष्ठंस्तृतीयेदिनकृत्प्रसूतेनरंस्तुभाचारगुणैर्विहीनं ३ मेधाविनंवाङ्मधुरंविनीतंनैपुण्यवाक्सम्यगगुणैरुपेतं तिष्ठंश्चर्थिः।
कर्कटकेमनुष्यंकरोतिनानाविधसौख्यभाजं ४ सिंहेतुसूर्योजनयत्परिघ्नंनरंभृशंक्रोधमुदारचेष्टं सत्याधिकंशौर्यविलब्धकीर्तिमुत्साहयुक्तंसततंबलं
लेच ५ कन्याश्रितोदुर्वलमल्पसत्वंरविः प्रसूतेमृदुदीनवाक्यंस्त्रीतुल्यवीर्यंकृपणस्वभावंनिदानुरक्तंसततंगुरूणां ६ भंगक्षयार्तिव्ययशोकतप्तं
हष्टनीचोपहतप्रदिष्टं तुलाधरस्थोदिनकृन्मनुष्यंकरोतिनीचव्यसनाभिभूतं ७ नित्यंप्रसूतेश्रुतिधर्मशीलंसूर्योष्टमस्थोवननिवासभीष्टं नानार्थयुक्तंसु
भगंमनुष्यंनृपप्रसादात्प्रसुखंजितारिं ८ धनुर्धरस्थोजनयेन्मनुष्यंसूर्योनरेंद्राभिमतंमहांतं शास्त्रार्थशिष्यंनिपुणंनिघृष्टंप्रांतंप्रसूतेव्यवहारदक्षं ९
मृगाभिधानेसवितानिविष्टोविपन्नशीलंजनयेन्मनुष्यं अनिष्टकार्येषुसदानुरक्तंमनोत्तविद्वेषणमल्पसत्वं १० तिष्ठन्रविः कुंभधरेप्रसूतेनरंदृढंहेष
विरोधरोषं अनिश्चितंकर्मसुदुःप्रलापंव्ययान्वितंपापरतंकृतघ्नं ११ मीनहृयस्थोरविरापपुण्यंकुर्यान्मनुष्यंहतशत्रुपक्षं सुहृद्गुरुप्रीतिकरंसु
वाक्यंप्रसन्नचित्तंवहुधर्मशीलं १२ होरांगतोर्कःप्रकरोतितैक्ष्णंस्वपित्तरोगंस्वजनापमानं दृष्टेर्वियोगंकलहंचदुःखंधनक्षयंवैरिवलप्रभूतं
१३ होरांगतोरात्रिपतेर्दिनेशोनरंविधत्तेसततंसुशीलं रोगैर्विमुक्तंविगतारिपक्षंप्रियातिथिंवंधुजनप्रधानं १४ रोगाभिभूतंसविताकरोतिनरंभि
भमप्रचुरंस्वकीये उद्विग्नचित्तंपरदेशभाजंजयत्यतापंप्रवलंनितांतं १५ अंशेविधोर्वासरपः प्रसूतेधर्मिष्ठजंस्वस्वजनंविपापं गीतप्रियंवाञ्छित
मृष्टदारंप्रभूतकोशंदयितंनराणां १६ द्रेष्काणगोर्कोधरणीसुतस्ययदाप्रजातःप्रकरोत्यथारीन् असृग्व्यथानीचसमागमंचपूर्वार्थहानिंसततंन
राणां १७ अंशेगतःसोमसुतस्यभानुः स्वधर्मशीलंप्रकरोतिमर्त्यं विलासिनीकामपरंसदैवविचित्रवाक्यंद्विजदेवभक्तं १८ वृहस्पतेरंशग
मंतुप्रयातोभानुर्विधत्तेमनुजंविनीतं प्रियातिथिंसर्वगुणैःसमेतंमेधान्वितंवाक्यविशारदंच १९ अंशेस्थितोदैत्यपुरोहितस्यभानुर्विधत्तेसुशिनं
मनुष्यं स्त्रीवल्लभंदेवगुरुप्रसक्तमरोगदेहंवहुसत्वयुक्तं २० द्रेष्काणमर्कोपगतोर्कजस्यपापप्रसूतेप्रकृतंकृतघ्नं नरंसुतार्तंव्यसनोपतप्तंप्रशीलं

तं वंधुजनैर्विमुक्तं २१ नवांशके स्वे सविता प्रसूते नरं पराभूतमनल्पसौख्यं कलिप्रियं वञ्चिणामं च शौर्यसमेतप्रभावं बहुरोगभाजं २२ नवांशके रात्रिप तेर्विवस्वान् करोति मर्त्यं स्थिरतं एवं दक्षं सुतान्वितं ज्ञानं यशोधनार्थं नृपप्रियं मुख्यतमं स्वपक्षे २३ कुजस्य भानुर्नवभागसंस्थो वीरं द्रुपंगाभिदलं प्रसूते निराकृतं दीनमुरुत्यकोपं पापानुरक्तं कृतजातिमाजं २४ तिष्टन्रविः सोमसुतस्य जातं नवांशके वातभयं करोति जितारिपक्षं सुतयानुरक्तं वरं सवभोगसुखैः समेतं २५ नवांशके देवपुरोहितस्य तिष्ठन् विः सत्यधनं प्रसूते तपोनुरक्तं कांतिनामभीष्टं जितेंद्रियं सर्वसुखादिवासं २६ रूपान्वितं वंधुजनप्रधानं विवेकिनं धर्मपरं जितारिं नवांशके दैत्यपुरोहितस्य नरं प्रसूते सविता प्रगल्भं २७ पराजितं निर्धनमल्पवीर्यं कामान्वितं वंधुजनैर्विमुक्तं शनैर्नवांशे सविता प्रसूते नरं खलं दुर्गतिरोगभाजं २८ सूर्यांशके स्वे सविता प्रसूते नरं सुतीक्ष्णं परभीतिचित्तं प्रभूतरोषं गतवीर्यमर्थं परस्व दक्षं मतिज्ञाद्विहीनं २९ सूर्यांशके रात्रिपतेर्विवस्वान करोति सौम्यं शुभकर्मयुक्तं विद्याविनीतं सततं सुखाढ्यं प्रसन्नचित्तं विभवैः समेतं ३० प्रियैर्विमुक्तं वधवंधयुक्तं परं पापानुरक्तं पुरुषं प्रसूते सूर्यांशके भूतनयस्य भानुर्महीनसत्यं परतर्ककं च ३१ सत्याधिकं सर्ववस्तु रवेः समेतं प्रियातिथिं ब्राह्मणसंमतं च सूर्यांशके सोमसुतस्य भानुः सतिष्टन्प्रसूते मनुजं सनाथं ३२ स्त्रीवल्लभं गीतकलासु दक्षं भोगान्वितं वस्त्रविलेपनाढ्यं सूर्यांशके देवगुरोर्विवस्वान् करोति मर्त्यं विनयप्रधानं ३३ सशिल्पिनं धर्मरतं सुदांतं प्रियातिथिं सर्वसहं सुशूरं सूर्यांशके दैत्यगुरोः प्रसूते भानुर्नरं पार्थिवमानयुक्तं ३४ स्त्रीवंचकं पापरतं कृतघ्नं श्रिया विहीनं सततं कुचैलं करोति भानुर्वहुदुःखयुक्तं सूर्यांशकस्थः कुशनेश्वरस्य ३५ त्रिंशांशके स्थो धरणीसुतस्य भानुर्विधत्ते धनमल्पपुण्यं विताधिवासं भृतकं सुशीलं रोगाधिकं सह्यजनैः समेतं ३६ त्रिंशांशके सूर्यसुतस्य भानुर्नरं विधत्ते स्वजनानुरक्तं विहीनवित्तं पुरुषं कृतघ्नं विद्वेषशीलं गतसौहृदं च ३७ त्रिंशांशके देवपुरोहितस्य करोति भानुः प्रणयप्रधानं यशस्करं शौर्यगुणैः समेतं महाधनं शास्त्ररतं मनुष्यं ३८ हिरण्यमुक्तामणिवस्त्रभाजं स्त्रीणामभीष्टं सुरभक्तियुक्तं त्रिंशांशके स्थः शशिजस्य भानुः करोति मर्त्यं विगतारिपक्षं ३९ त्रिंशांशके दैत्यपुरोहितस्य करोति सूर्यः सुभगं मनु।

ष्यं नानार्थयुक्तंवरवाजिभाजंनीरोगकायंव्रतिनामभीष्टं ४० करोतिभानुःस्फुहृदं स्ववीर्यात्प्रभूतमित्रंविजितारिपक्षं स्वबंधुपूज्यंधनधान्ययुक्तंपुत्रान्वितं
ब्राह्मणसंमितंच ४१ धीरंगुरुंस्फुप्रजनप्रधृष्यंप्रभूतकोशंगजवाजिजुष्टं स्वक्षेत्रवीर्यप्रकरोतिभानुर्नरंसदासत्यगुणैःसमेतं ४२ स्वतुंगवीर्यात्कुरुतेदि
नेशोनरंप्रसिद्धंविजितारिपक्षं प्रियातिथिंपार्थिवमानयुक्तंमहाधनंनीतिपरंप्रधानं ४३ नवांशवीर्यप्रवलोविवस्वान्नरंप्रसूतेसततंमनोज्ञं विचित्र
माल्याभरणंसुखाढ्यंप्रशांतचित्तंनिरुजंसुशीलं ४४ शुभग्रहालोकनवीर्ययुक्तोभानुःप्रसूतेनिरुजंमनुष्यं सौभाग्ययुक्तंस्तुतलाभभाजंनरेंद्रपूज्यं
द्विजदेवभक्तं ४५ पुंराशिवीर्यप्रवलोविवस्वान् करोतिभक्तंगुरुसद्द्विजानां नरंविनीतंसुभगंसुशीलंधर्मान्वितंशीतिकरंनराणां ४६ अहःशाव
लाढ्योसविताप्रसूतेर्नानार्थयुक्तंसततंमनुष्यं हस्त्यश्वरत्नांवरमाल्ययुक्तंविलासितंपार्थिवमानयुक्तं ४७ चेष्टावलाढ्यप्रकरोतिभानुःनरंप्रचेष्टानु
गतारिपक्षं प्रभूतमित्रंगतसर्वदुःखंसुखान्वितंवांधवमानयुक्तं ४८ करोतिभानुर्द्विजवीर्ययुक्तोनरंप्रसिद्धंविनयेनयुक्तं धर्मानुरक्तंप्रियवल्गुवाक्यंसदा
नुकूलंदयितंजनानां ४९ करोतिभानुःस्वदिनस्यवीर्यान्नरंप्रगल्भंसुभगंसुकांतं प्रभूतचित्तंप्रियमप्रधृष्यंविद्वेषिणांकीर्तिहरंनितांतं ५० होरा
वलाढ्यःप्रकरोतिभानुःप्रसिद्धमत्यद्भुतवीर्ययुक्तं नरंनृणामिष्टतमंसुवाक्यंस्तुत्यंसदावंदिजनस्यमर्त्यं ५१ दिनाधिपःपक्षवलेनपुष्टःप्रभूतपक्षंपुरु
षंसुवाक्यं सुचारुवाक्यंवहुकोशयुक्तंविद्याविनीतंसुभगंमनोज्ञं ५२ मासवलाढ्यःप्रकरोतिभानुर्नरंविदग्धंधनवाजियुक्तं प्रभूतमित्रंरणलब्धशब्दं
महाविनीतंरतिलालसंच ५३ दिनाधिपोवर्षवलेनयुक्तःकरोतिकृत्यंसुशुभेषुसक्तं नारांगनारिंगतदुःखशोकंनितांतपुष्टंद्विजदेवभक्तं ५४ नि
स्त्रिंशकंचपिशुनस्वभावंपरान्नरक्तंकठिनंदरिद्रं भानुर्यदामित्रवलेनहीनस्तदानकामंपरमंप्रसूते ५५ स्वक्षेत्रवीर्येणविवर्जितोर्कःस्वस्थान
वासैःप्रकरोतिहीनंस्ववंधुहीनंपरदेशरक्तंकरोतिमर्त्यंव्यसनैःसमेतं ५६ अर्करोतिनीचानुरतंविधतेविवर्जितस्तुंगवलेनमित्रं सुखेक्षिरोगोपहतं
सुदुष्टंप्रजाविहीनंचमहानियुक्तं ५७ सूर्योनवांशात्मकवीर्यहीनोकरोतिमर्त्यंप्रियविग्रहंच विषाग्निशस्त्रज्वरपित्तभाजंपितर्जनंस्याविकलोपचार

शुभग्रहालोकनवीर्यहीनः करोतिभानुः सुकृतेविरूपं हृद्रोगिणं वद्धकृनंचमूर्खंकृतापराधंसततंसुभीरुं ५९ भानुर्विधत्तेनरवीर्यहीनःशौर्येणहीनंव
हुभिः समेतं पराजितंसर्वजनैर्विहीनंसुतार्थयानैर्धनधान्यवस्त्रैः ६० आशावलशोहितमेवसूर्यः सर्वासुदिक्षुप्रकरोतिहानिं मिथ्याप्रलापंविदधातिवुद्धिं
पराङ्मुखत्वंद्विजदेवतानां ६१ चेष्टावलेनप्रविवर्जितोर्कः करोतिचेष्टांसततंसुनिंद्यां नृणांतथावुद्धिविपर्ययंच विभूषितांसाधुजनेनवैरं ६२ दिग्वले
नप्रविवर्जितोर्कः करोतिनित्यंसकृपणंमनुष्यं हतप्रतापंस्वजनैर्विहीनंपरांगनासेवकमभ्युपेतं ६३ स्ववारवीर्येणविवर्जितोर्कः करोतिमर्त्यंसततंकुचैलं
विधर्मरक्तंवहुकूटभाजंसुहृज्जनानांप्रसभंसुदुष्टं ६४ होरावलेनैवविवर्जितोर्कः करोतिमूर्खंप्रणयेनहीनं विद्वेषयुक्तंपरतर्ककंचप्रज्ञाप्रहीनंप्रव
लंमनुष्यं ६५ दिनाधिपः पक्षवलेनहीनः करोतिमर्त्यंसततंसुदुःखं स्वपक्षहीनंविगतप्रलापंमायाविनंनिष्ठुरवाक्यरंच ६६ सूर्योयदामा।
सवलेनहीनस्तदाप्रसूतेविकृतंमनुष्यं वह्वाशिनंव्याधिभिरर्दितांगंचौरावनीशैः परिभूतमेव ६७ दिनाधिपोवर्षवलेनहीनोदारिद्र्ययुक्तंकु
रुतेमनुष्यं द्यूतक्रियानाशितभूरिवित्तंवेश्याभिरक्तंस्वजनैस्त्यक्तंनित्यं ६८ इत्यादित्यचारफलानि मेषेतुचंद्रः पुरुषंप्रसूतेशूरंमुदासत्ववलैरुपेतं
ख्यातंवहुस्त्रीसुतभृत्यवर्गंप्रभक्षिणंत्यागिनमूर्जितंच १ वृषेशशीगर्वितमिष्टदारस्मिताल्पभाष्यंसुभगंप्रसूते तेजस्विनंवद्धशनंसुवेषंमहाजनंद्रव्यपरि
ग्रहंच २ चंद्रस्तृतीयेमधुराभिधानंकार्याभिचारेनिपुणंप्रसूते तिष्ठन्शशीकर्कणिकार्यधीरंसुमेधसंवाग्विशदंप्रसूते प्रिवादनंचप्रियदर्शनं चंप्राप्तं।
वहुज्ञानविकीर्णवुद्धिम् ४ सिंहेशशीसत्ववलोपपन्नंनरंप्रसूतेनरलब्धमानं सिंहाननास्यंपृथुपीनकायंमांसप्रियंदुःप्रसहंक्षुधालुं ५ कन्यांस।
माश्रित्यशशीप्रसूतेनरंसुवाक्यंमधुरंविनीतं स्त्रीलालसंवैसुकुमारमूर्तिंसुमेधसंसाधुजनाभिरामं ६ तुलाधरस्थोजनयत्युदारंनरंशशीवाङ्मति।
सत्वयुक्तं मनस्विनंसात्विकमंत्रशीलंशुचिंविनीतंसुभगंसुरूपं ७ निशाकरोवृश्चिकगः समृद्धंशूरंनरंसाहसिकंप्रसूते ख्यातंसनामीश्वरल।
ब्धमानंक्रूरंपरार्थानरुचिंप्रचंडं ८ धनुर्द्धरस्थोनृपलब्धमानंचंद्रः प्रसूतेनवमुच्चवृत्तं शूरंशुचिंसत्यपरंविनीतंश्रीमंतमाद्यंगुरुदेवभक्तं ९ त्ति

हो॰र॰ ष्टंप्रसूतेमकरेशशांकोनरंवनारण्यजलाभिरामं संगीतहास्याभिरतंसुवेषंख्यातंपरस्त्रीरतिलोलुपंच १० कुंभेशशीरोषिणमल्पसौख्यंसूतेकृशंदुर्भरमल्प
५८ वित्तं वहुक्रियारंभमजातमिष्टंप्रदिष्टंवंधुगुरुवंचकंच ११ मीनुद्दयप्रत्ययिनंसमर्थंपांडित्यभाजंप्रचुरार्थयुक्तं ह्रीदानदाक्षिण्यपरंविनीतंनरंशशीवा
ह्मधुरंप्रसूते १२ होरांगतोरात्रिपतिर्यदास्यात्तदानरंशीलरतंकरोति स्वधर्मरक्तंनृपमानयुक्तंकृतज्ञमुत्साहितमप्रमत्तं १३ त्र्यंशेशशीवासरपस्यनित्यं
करोतिपापंवहुशत्रुयुक्तं अल्पार्थसत्वंविगुणंहृतस्वंदौर्भाग्यदेहंपरलुब्धचित्तं १५ करोतिवित्तंवहुमित्रवित्तंपुत्रान्वितंवंधुजनैःसमेतं त्र्यंशेस्वकीयेसुखि
नंसुकांतंनिशाधिपोमर्त्यमलंघितारं १६ त्र्यंशेशशांकोविचरन्कुजस्यनरंप्रसूतेविगतप्रतापं हीनक्रियंदुःखशतैरुपेतंपरार्थलुब्धंगतसौहृदंच १७
द्रेष्काणमाप्तःप्रकरोतिचंद्रःसौम्यस्यसौम्यंसुभगंमनुष्यं मेधाविनंसर्वगुणैःसमेतंविद्यान्वितंसर्वकलासुदक्षं १८ त्र्यंशेगुरोःरात्रिपतिःप्रसूतेशास्त्रा
नुरक्तंमनुजंसुशीलं नीचासुहृत्संस्कृतमल्पकोपंप्रियातिथिंदेवगुरुप्रभक्तं १९ सितस्यचंद्रोविचरन्त्रिभागेकरोतिमर्त्यंवरयानयुक्तं स्त्रीवल्लभंसत्यमुदारचेष्टं
कलाधिपपूज्यतमंनृपाणां २० शनेर्यदात्र्यंशमनुप्रयातश्चंद्रस्तदारोगिणमेवधत्ते. दीनंदरिद्रंविकृतंसपापंमहापरंनिष्ठुरमेवमर्त्यं २१ नवांशकेरात्रिपतिर्य।
दास्यात्सूर्यस्यदुष्टंमनुजंप्रसूते स्त्रीचंचलंपापरतंसदैवप्रनष्टवुद्धिंविजितंपौरुषं २२ नवांशकेस्वेप्रकरोतिचंद्रोनरंसुरूपंसुभगंसुशीलं स्त्रीसंमतंसर्वगु
णैःसमेतंविद्याविनीतंजनवल्लभंच २३ नवांशकेभूमिसुतस्यचंद्रस्त्वसत्गुणार्तिप्रकरोतिमर्त्यं क्लीवंकृशांग्याधितमल्पसत्वंस्त्रीदुर्भगंकामपरंसदैव ॥
२४ सौम्यस्यभागेनवमेशशांकः करोतिसौम्यंसततंसुखाढ्यं नित्यंसुहृद्देवगुरुप्रसक्तंमहाधनंपंडितमप्रमेयं २५ गुरोर्नवांशेविचरन् शशांकःकरो
तिमर्त्यंनयसत्यसारं विद्याविनीतंसुहृदांवरिष्ठंद्विजप्रियंरोगभयव्यपेतं २६ शुक्रस्यभागेनवमेशशांकोनरंप्रसूतेवहुवित्तवंतं पुत्रान्वितंपुण्यधनै
रुपेतंप्रियातिथिंसर्वजनाभिरामं २७ चंद्रःशनेर्भागमनुप्रयातोभवांत्यमस्यातरुक्तवाचं नरंप्रसूतेविकृतस्वभावंपरार्थलुब्धंव्यसनैःसमेतं २८ ग्रं॰
सूर्यांशकेर्कस्यनिशाधिनाथोभयाधिकंदुःखयुतंमनुष्यं प्रासादिनंमित्रजनैर्विहीनंस्तदीर्घसूत्रंसततंकृतघ्नं २९ सूर्यांशकेस्वेप्रकसेतिचंद्रोथवा ५१

न्वितंवाग्मिनमल्पशत्रुं नरंनितांतंशुभपुत्रयुक्तंस्त्रीवाहनाढ्यंपरपक्षहीनं ३० सूर्यांशकेभूमिसुतस्यचंद्रः करोतिनित्यंवहुसौख्ययुक्तं विचक्षणंभोगयुतंसुवे।
षंसुधर्मशीलंसततंसुशीलं ३१ सूर्यांशकेसोमसुतस्यसोमः सौम्यंप्रमत्तेमुखिनंमनुष्यं शिल्पज्ञमत्यद्भुतकर्मयुक्तंप्रियातिथिंविश्रुतमेवनित्यं ३२ सू।
र्यांशकेदेवपुरोहितस्यनरंसुवेषंप्रकरोतिचंद्रः नृपप्रसादंविनयैःसमेतंसुचित्रयानंवहुमित्रयुक्तं ३३ सूर्यांशकेभार्गवनंदनस्यनरंविनीतंप्रकरोतिचंद्रः
नृपप्रसादैःप्रचुरंसमृद्धंहस्त्यश्वयुक्तंप्रचुरान्नपानं ३४ शनैश्चरस्यार्कविभागसंस्थोवंधुंविधत्तेचलसत्वयुक्तं कीनाशमात्स्यंतमंनितांतंस्ववंधुव।
र्गैःपरिवर्जितंच ३५ त्रिंशांशकेभूमिसुतस्यचंद्रःश्रद्धाविहीनंकुरुतेतिकौलं मलिम्लुचंनीचजनानुरक्तंरक्तार्दितंकोपपरंनसुजिमं ३६ त्रिंशद्विभागेर्क।
सुतस्यचंद्रोविरूपदेहंमुखरंकरोति विकाशिनंस्थूलकचंसुजिह्मंपरापवादेनिरतंसदैव ३७ त्रिंशांशकेरात्रिपतिर्यदास्यान्मेधाविनंचैवतदाप्रसूतेजी
वस्यमर्त्यंभुविलब्धकीर्तिंश्रियाधिकंपार्थिववल्लभंच ३८ त्रिंशांशकेसोमसुतस्यचंद्रोनरंविधत्तेशुचिमप्रसन्नं स्त्रीवल्लभंगीतकलासुदक्षंप्रियाति।
थिंनित्यमुदारचेष्टं ३९ त्रिंशांशकस्थोविधुराविधत्तेशुक्रस्यमर्त्यंवहुवीर्ययुक्तं स्त्रुपुण्यशीलंहययानयुक्तंदयारतंसत्सुसदानुरक्तं ४० सुहृद्बलाच्छीतम
यूखमालीनरंविधत्तेवहुमित्रयुक्तं सुहृत्प्रियंपार्थिवमानपुष्टंवि[illegible]धिकेसाधुर्तिसलज्जं ४१ स्वस्थानवीर्येणयुतः शशांकोनरंविधत्तेवनितासमृद्धं स्वस्था
नपूज्यंयदिसंगरक्तंनित्यंप्रशांतंनृपवल्लभमेव ४२ स्वतुंगसारेणयुतः शशांकः प्रोत्तुंगकर्माणमहीनसत्वंनरंप्रसूतेद्विजदेवभक्तंवहुस्वयुक्तंसततंसमृद्धं ४३
नवांशपुष्टः प्रवलः शशांकोनरंविधत्तेसुतयानयुक्तं रोगैर्विमुक्तंसुकुमारदेहंभोगाधिकंसर्वकलासुदक्षं ४४ शुभग्रहालोकनसारयुक्तश्चंद्रोभयैर्वर्जित
मुत्तमंच हस्त्यश्वयुक्तंपुरुषंप्रसूतेशूरंमहोत्साहिनमृद्धिमंतं ४५ स्त्रीक्षेत्रवीर्यात्प्रवलाच्छशांकः कुर्याज्जितारातिगणंगुणाढ्यं वह्वन्नवित्तंप्रमदास्व
भीष्टंमर्त्यंमहालोकयुतंकरोति ४६ आशावलाद्रात्रिपतिर्जितारिःस्ववंधुपुत्रेणधृतंसलज्जं महाधनंसर्वगुणाधिवासंस्त्रीवल्लभंमानधनंकरोति॥
४७ चेष्टावलाढ्योवहुमित्रकोशंचंद्रोविधत्तेनिरुजंमनुष्यं श्रुताधिकंसत्यरतंविनीतंनित्यंसुराराधनतत्परंच ४८ निशावलाढ्यः प्रवलः शशांको

नरंप्रसूतेद्युतितेजयुक्तं वस्त्रान्नपानैर्विविधैरुपेतंसौभाग्यवंतंवहुदानशीलं ४९ करोतिचंद्रः स्वदिनोद्भवेनयुक्तंप्रशक्तंसततंमनुष्यं मित्राधिकंसौम्यवपुःप्रसिद्धं
नानार्थविद्यापरितुष्टचित्तं ५० होरावलाढ्योविषमांगदर्क्षगुरुप्रियंगीतरतंसुकांतं महासहिष्णुंकृषिकर्मयुक्तंचंद्रः प्रसूतेसुतकन्यकाढ्यं ५१ हि
मद्युतिर्मासवलेनकुर्यात्क्रियान्वितंकल्पतरुंसमृद्धं शिल्पाधिकंकीर्तिकरंसुदारं प्रियातिथिंतुष्टिपरंनयज्ञं ५२ वर्षेस्तुतंवर्षवलाच्छशांकोन
रंप्रसूतेशुभकर्मरक्तं दिव्यांगनाभोगरसानुरक्तंसत्याधिकंपापजनैर्विमुक्तं ५३ चंद्रःसुहृद्वीर्यविहीनमूर्तिः करोतिदीनंपरतर्ककंच सुदीर्घसूत्रं
व्यसनैरुपेतंहितार्थशक्तिंपुरुषंसदैव ५४ स्वस्थानवीर्येणविहीनमूर्तिश्चंद्रोनरंदीनतरंप्रसूते पराभवार्त्तंनृपमानहीनंकृशंविवर्णंकुसुहृ
त्समेतं ५५ स्वतुंगवीर्येणविवर्जितस्तुचंद्रः प्रसूतेकृपणंमनुष्यं नीचानुरक्तंपरिहीनसत्वंप्रकीर्णकामंवहुशोकभाजं ५६ नवांशवीर्येणविव
र्जितस्तुनयेनहीनंपुरुषंशशांकः करोतिदुष्टंचतथाकृतघ्नंभीरुंरुजार्तंनृपपीडितंच ५७ शुभग्रहालोकनहीनमूर्तिः करोतिचंद्रः सततंकुरूपं॥
कुचैलमुग्रंकृपणस्वभावंपापानुरक्तंसुभुजंसदैव ५८ स्त्रीक्षेत्रवीर्येणयदाविहीनोसदाशशांकः प्रकरोतिपापं दौर्भाग्ययुक्तंद्विजभक्तिहीनंविहीनश
क्तिंपरिपीडितंच ५९ चंद्रोदिशावीर्यविवर्जितश्चविदेशरक्तंप्रकरोतिमर्त्यं दुष्याटनंदुर्भगमल्पकृत्यंकृपांविहीनंसुतमित्रहीनं ६० चेष्टावलेनेवविव
र्जितस्तुचंद्रः प्रसूतेसततंकुचेष्टं विद्वेषभाजंपरदाररक्तंनित्यंखलंपार्थिवमानहीनं ६१ चंद्रोनिशावीर्यवलेनहीनः करोतिनेत्रोद्भवरोगयुक्तं।
चौरैःप्रमुष्टार्थचतुष्पदाढ्यंस्त्रीलोकनिंद्यंविकलंखलंच ६२ स्ववारवीर्येणविवर्जितस्तुकरोतिचंद्रोवहु[illegible]युक्तं सेवारतंधर्मसुखैर्विहीनंपरान्न
भोक्तारमनल्पदोषं ६३ होरावलेनैवविहीनमूर्तिश्चंद्रः सुमूर्खंमनुजंप्रसूते संकष्टभाजंसुविहीनकोशंसुहृज्जनैः [illegible]प्रधानं ६४ चंद्रोयदामासव
लेनहीनस्तदाप्रसूतेधनधान्यहीनं मर्त्यंसुभीरुंविजितंगतार्थंपराभवैकास्पदमेवनित्यं ६६ इतिवृद्धयवनेचंद्रचारः मेषे[illegible]भसमप्रचंडशूरं नरंस
हस्तकर्मशीलं तेजस्विनंसात्विकमप्रधृष्यंदुर्मर्षणंदानपरंप्रसूते १ वृषेस्ववंधुप्रतिकूलवैरं भौमः कुलोत्साहकरंप्रसूते सुदुष्टशीलंवहुदुःप्रतापंप्रभसंगम

रधूनात्मजेश २ संतुष्टमानेमिथुनेप्रसूतेभौमोमनुष्यंबहुलप्रवासे नानार्थशिल्पसकलासुदक्षंबहुश्रुतंवाक्यविशारदंच ३ [illegible] कुजो कर्कटके [illegible]
कुर्वीतवैकल्परुगर्दितांगं पुनःपुनर्वर्धितवित्तःकृतार्थंनरंपरान्नाशनविश्रुतंच ४ अंगारकःसिंहमुपेत्यसूतेनरंवपुष्मंतमुदग्रसत्वं अमर्ष [illegible] तिरंड़ं
परप्रहर्तारमसंशयंच ५ कन्यागतोलोहितमूर्तिराढ्यं पुंसंसतामार्जवमल्पशौर्यं प्रियप्रलाभं परगीतदक्षंनरंप्रसूतेविविधाश्रयंच ६ तुलाधरस्थःक्षितिकुजोऽध्व
शीलंप्रसक्तवाक्यंजनयत्यनिष्टं विकत्थनंवक्रनृतं कृपाणहतांगमुत्साहितपूर्वमित्रं ७ भौमोष्टमेपापमसत्प्रवृत्तं कुर्यान्नरंवहुपराधवैरं शठं [illegible]
तांतवंधमाचारसंस्कृतधर्मशीलं ८ धन्वागतोधन्विनिलोहितांगोवहुक्षतंक्षीणमनुं प्रसूते शठंनरंनिष्ठुरवाक्यशीलं विपन्नदारात्मजमस्वतंत्रं ९ मृगेतुभौमः
सुखिनंसुकांतंनिरंतरंश्रेष्ठतमंप्रसूते धनाधनोपार्जितसुशीलंचभूपतिंवामनुजेश्वरंवा १० कुंभेतुभौमःविकृतंमनुष्यंसूतेनरंदुर्भगदर्शनंच पैशून्यवाग्वानृत
वचनादिदोषैरजस्रापहृतमनुष्यं ११ तिष्ठन्कुजोमीनयुगेप्रजातंप्रवासिनंमंदधियंप्रसूते वहुद्विजाभ्यर्दितवचनादिविपन्नसर्वस्वमतीक्ष्णशोकं १२ होराश्रितो
वासरपस्यभौमोवधप्रियंसाहसकर्मशीलं नरंप्रसूतेवहुरोगयुक्तंसिताश्रितंततमत्तनुनितांतं १३ होराश्रितोरात्रिपतेर्महीजोकरोतिमर्त्यंविनयेनयुक्तं भोक्तारमा
संव्यवहारशीलंगतप्रसूतिंविगतारिपक्षं १४ सुखाश्रितोगोपहृतंस्वशीलंस्वल्पात्मजंक्लेशपरंखलंच अंशेकुजोवासरपस्यतिष्ठन् करोतिमर्त्यंविगतप्रतापं १५ कू
रंखलंद्वेषिणमिष्टधर्मंख्यातंनृपाणांस्वगुणैःकुदारैः अंशेगतोरात्रिपतेर्महीजोनरंप्रसूतेविगताधिपुष्टं १६ स्वअंशभागेविचरन्महीजःकरोतिमर्त्यंवहुरोग
युक्तं परान्नरक्तंप्रवरप्रकोपंगतप्रतापंसततंकुशीलं १७ अंशेकुजःसोमसुतस्यतिष्ठन्गंभीरसत्वंस्थितिमूर्तिमंतं नरंप्रसूतेवहुवित्तयुक्तंनरे
न्द्रसन्मानसमन्वितंच १८ अंशेगुरोर्भूमिसुतःप्रसूतेनरंविदग्धंप्रथितंकुवेषं शुश्रूषकंदेवगुरुद्विजानांप्रनष्टचित्तंमतिमतंतथैव, १९ अंशेकुजो
भार्गवनंदनस्यनरंप्रसूतेवनितास्वभीष्टं हिरण्यलोहाप्तधनप्रसिद्धंक्रियारुचाभिःप्रयतंप्रगल्भं २० द्रेष्काणमार्केविचरन्महीजोमूर्खंसदाचारगुणे
विहीनं प्रनष्टशीलंप्रियविग्रहंचनरंप्रसूतेसततंकुचैलं २१ नवांशकेवासरपस्यभौमोलुब्धंकुजोनिद्रिमसक्तचित्तं तिष्ठन्वितंतः ल्पसुखंमनुष्यं ६

हो॰र॰ हृद्रोगिणं बहुशनं शठं च २२ चरन्नवांशे प्रकरोति भौमश्चंद्रस्य कांतं सुखमानयुक्तं सुहृद्द्विजातिथ्यपरं प्रशांतं पूज्यं सतां बंधुहिते र[illegible]तं स[illegible] [illegible]
६० प्रचरन्करोति भौमो ति हिंस्रं विकृतं मनुष्यं खड्गादियुद्धे निपुणं विशीलं विद्वेषिणं साधुजनस्य नित्यं २४ बुधस्य भौमः प्रचरन्नवांशके [illegible]
नां द्रव्यान्वितं धीरमुदारसत्त्वं विस्तीर्णसत्त्वं सुभगं सुखाढ्यं २५ गुरोर्नवांशे विचरन्महीजः करोति मर्त्यं विविधान्नपानैः [illegible]
वैरैः समेतं २६ शुक्रस्य भागे नवमे तु भौमः करोति मर्त्यं रतिलब्धसौख्यं सुहृद्गुरुप्रीतिकरं सुकान्तं [illegible] धुरक्तं बहुभृत्ययुक्तं [illegible] शनेर्नवांशे विगत[illegible]
नरं प्रसूते बहुपापरक्तं गुह्यास्रिरोगोपहतं सुदुष्टं प्रियाविहीनं परलर्कं कंच २८ रतिप्रियं कूटरतं कुशि[illegible] स्थिरं वा व्रणांकं धनेच सूर्यांशके तु जीवं[illegible]
भौमो नरं प्रसूते विटधूर्तचेष्टं २९ सूर्यांशके रात्रिचरस्य भौमो नरं प्रसूते सुवपुः सुकान्तं उदारशीलं [illegible] सौख्यभोजं प्रा[illegible] [illegible]जितं च [illegible]
दशांशे विचरन्महीजो स्त्रीदुर्भगं प्रेष्यकमस्वतंत्रं स्वरूपतुल्याकृतिकर्मयुक्तमसत्सुगात्रं व्यसनैः समेतं ३१ व्यायामग्रामावर[illegible]ण[illegible]ख्यातं[illegible]
वरांगनां च सूर्यांशके सोमसुतस्य भौमो नरं प्रसूते नृपपीडितं च ३२ प्रख्यातबुद्धिं सुखिनं स्व[illegible]काविवा[illegible]निवारतं च सूर्यांश[illegible]गुरोः [illegible]
वित्तं सुभगं प्रसूतो ३३ स्त्रीणामभीष्टं मधुरं विनीतं दानोपचारादरमानयुक्तं सूर्यांशके भूमिसुतो भृगोश्च करोति नित्यं प्रणतारिपक्षं ३४ स्वे[illegible]
शीलं बहुप्रलापं चपलं कुशीलं सूर्यांशकस्थो रविजस्य भौमो करोति मर्त्यं कलहानुरक्तं ३५ अनेकद्रव्याढ्य[illegible] चेष्टं बहुव्ययामर्थं [illegible]
वेरूवं प्रकरोति भौमो नरं कुरूपं व्यसनैः सुतप्तं ३६ लुब्धं परस्त्रीनिरतं सदैव विद्वेषणं दुर्वचनाभिलापं च त्रिंशांश[illegible]भौम मर्मविद्[illegible]
नुष्यं ३७ यत्तव्रताध्यापनदानशीलं पुरोहितं पार्थिवमंत्रिणं च त्रिंशांशके देवगुरोर्महीजः करोति मर्त्यं बहुधर्मयुक्तं ३८ दांता[illegible]शिष्टावरगं[illegible]
धुहितं[illegible]व त्रिंशांशके सोमसुतस्य निष्ठं कुजो विधत्ते सुविदं प्रसूतो ३९ आलेख्यविद्यानिपुणं सुशीलं बंधुप्रियं भीतविशा[illegible] त्रिंशां[illegible]
[illegible]प्रसूते बहुवित्तयुक्तं ४० भौमो यदा शक्रबलेन युक्तः करोति मर्त्यं सुहृदैः समेतं प्रभूतसौख्येन युतं सुरूपं गुरुद्विजाचार्य[illegible]

महीजः करोतिमर्त्यंसुतमानयुक्तं स्त्रीभूषणात्तरतिभूरिदक्षकलानिवित्तमधुरंभृतारि ४२ विद्यागम...सुतवितंयुक्तं सुपुण्यशीलं ... नस्तुभौमः करोतिमर्त्यप्रणतंद्विजानां ४३ देवद्विजार्याचितलब्धकीर्तिश्शूरं सतामाश्रयमाशुविद्यं भौमः ... युक्तः क लै ४४ ... शत्रुपक्षं कविंनृपामात्यमहन्तरं वा शुभग्रहालोकनदृष्टियुक्तो भौमः प्रसूते सुभगं मनुष्यं ४५ ... द्विजदेवभर्ता प्रभूतगोज...धान्यवहुगन्नानूरनमद्भुतार्थं ४६ दिग्वीर्यपुष्टः प्रकरोति भौमानरं प्रसूते सततं कुशीलं कांतं प्रभा नान्वितं धर्मपरायणं च ४७ चेष्टावलाढ्यः प्रकरोति भौमः नरं प्रचेष्टं सततं कुचेष्टं वित्तानुकूलसुहृदं सतां च पुण्ययुक्तं निपुणं क्रियां ... रात्रिवलेन युक्तः नरं प्रसूते शुभगं मनुष्यं आरामवापीकरणानुरक्तं स्त्रीलाभयुक्तं प्रचुरान्नपानं ४८ स्ववारवीर्यप्रवलो महीजः सुतिं ... नरं प्रसूते वहुभोगभाग्यं कांतं प्रियस्थानविलेपनं च ५० होरावलाढ्यः प्रकरोति भौमो ... श्रुतिशास्त्रवित्तं प्रभूतगो...मितां गेहं मनुष्यं ५१ प्रख्यातमत्यंतसुखोपभोगं जितारिमारक्षकसाधुदारं स्वस्वामिवीर्येण युतो महीजः नरं विधत्ते दयितं नृपाणां ... प्रियदावपु ... रोति मर्त्यं धनधान्ययुक्तं हतद्विषं तुष्टिपरं सहिष्णुं प्रियंवदं सर्वजनानुरक्तं ५३ भौमोयदा पक्षवलेन पुष्ट ... विगतारि ... प्रसिद्धं ... धनाढ्यं स्वकुलप्रधानं ५४ भौमोयदा मित्रवलेन हीनः नराकुमित्रं जनयेन्मनुष्यं खलं कुरूपं धनधान्यहीनं देवद्विजानां ... जनानुकू ... क्षेत्रवीर्येण विवर्जितस्तु भौमो निकृष्टं विदधाति मर्त्यं स्त्री... धुजनव्यपेतगतार्थशक्तिं विजितं विपक्षैः ५६ स्त्री... कलहे विचित्रैः संपीड्यते सर्वजनैर्मनुष्यो भौमो यदा तुंगवलेन हीनः ५७ नवांशवीर्येण विवर्जितस्तु भौमः प्रसूते ... रः पराभवं मित्रकृतं तथैव ५८ शुभग्रहालोकनवीर्यहीनः करोति मर्त्यं विकृतांगमेव विमुक्तधर्मं सहजापरक्तं विगर्हितं शीलपरि... विवर्जितस्तु भौमः प्रसूते तिभयं मनुष्यं हिंसापरं वहुणशून्यकोशं श्रिया विमुक्तं रतिहीनसौख्यं ६० आशावलेनैव विवर्जितस्तु भौ

हो.र. वृद्धांगनासेवनलब्धशीलंपरार्थचेष्टास्वतिकष्टभाजं ६१ क्षद्रोगिणंदुर्वलदेहयंत्रंमूलंस्मृतिंभूतिपरिग्रहंच चेष्टावलेनैवविवर्जितस्तुभौमः प्रस्
६१ विमुक्तधर्मविगतप्रभावंद्यूतप्रियंपापरतंकुशीलं सदाविहीनःप्रकरोतिभौमोनरंसदाशत्रुभिरर्दितंच ६३ स्ववास्वीर्यणविवर्जितस्त [illegible]
ष्यं स्नानोपभोगाभरणादिकाढ्यंपुरातनोपासनकर्मशीलं ६४ परांगनासंगमसक्तभावंसाध्वीव्रतघ्नंचसुदारुणंच दोरा [illegible] वीनत
रोतिमर्त्यंव्यसनैःसमेतं ६५ द्वेष्यंजगत्याहतवेषचेष्टं [illegible] विहीनसत्त्वंसुखलंकृतघ्नं भौमोयदामामनल्नेनहीनस्तदाप्रसूते [illegible] ६६ [illegible]
मविक्षदारंपापोचतंधर्मफलव्यपेतं करोतिभौमोवलनहीनोनरंनितांतंप्रियसाहसंच ६७ श[illegible]पासनसंग्रहेछुसु ६८ [illegible] स्त्रीणमनोा
पक्षवीर्येणविवर्जितस्तुभौमःप्रसूतेतिविकर्मशीलं ६८ इतिवृद्धयवनेभौमचारः मेषंगतस्ति [illegible] तुतोमनुष्यंकुर्यात्का [illegible] टनशठंच
प्रलापंप्रियविग्रहंतुभूरिश्रमोत्पन्नविपन्नवित्तं १ वृषंगतस्तुपृथुपीनकांतंवुधो[illegible]त्यागिनमिष्टदारं गधर्वल[illegible]ल[illegible]रतिहास्य[illegible] दक्षप्रगल्भं
वाक्यं २ वुधःप्रसूतेमिथुनेसुवाक्यंनरंप्रियाभाषणमिष्टवेषं शिल्पश्रुतज्ञानक[illegible]विधि[illegible]न्थनभ[illegible]मेनमूर्जितेच ३ चतुर्था
कसूनुस्तिष्ठन्विदेश[illegible]प्रसूते प्राज्ञंकविंस्त्रीरतिगेयवित्तंवहुक्रियासक्तमनस्विनंच ४ वुधोनरंसिंहमुपेत्यकुर्या[illegible]ज्ञानवल[illegible]
हसत्वस्थितविज्ञानंजगत्पतिज्ञानमसत्यवाक्यं ५ कन्यामुपेत्यप्रचुरंप्रसूतेधर्मप्रियं[illegible]मिंदुसूनुः [illegible] य
विमिश्रितंच ६ तुलांगतःशिल्पविवादवादेतोवुधोविधत्तेचपलंप्रमत्तं ७ प्रचारहत[illegible]चारंपरपक्रियोपा[illegible]
दमर्षदुःखश्रमशोकतप्तं विद्विष्टकर्माणमसाधुशीलंपारुष्यदंपुंश्चलनिश्चितंच ८ धनु[illegible]स्थश्ववुधो[illegible]नुष्यंविर[illegible]
र्यशिल्पश्रुतिशौर्ययुक्तंमेधाविनंवाक्यविशारदंच ९ वुधोमृगस्योजनयत्यनर्थंनीचंपर[illegible]मतत्पचेष्टं [illegible]
सुनस्वभावं १० कुंभेतुसौम्यःसुचिशौचहीनंनरंप्रसूतेपरिभू[illegible]मन्यैः [illegible]वुद्धिकर्मा० [illegible]नलज्जरतिद्युत्[illegible]

मोचस्याभूनिरंतंप्रसूते देशानुगंवाग्मिनंर्कमसाधुदारिद्रमल्पप्रजाविष्टदारं १२ होरांवुधोवाम [illegible] जातस्तीव्र [illegible] कामथुरविधि [illegible]
वद्विजानांपरनिंदकंच १३ होरांगतोशत्रिपतेस्तसौम्यानरंप्रसूतेसुभगंसुशीलं विशिष्ट [illegible] द्विगुणानर्थ [illegible] युक्तः क
शेवुधोवत्सरपस्यातिष्ठन्नरंप्रसूतेपरवादयुक्तं क्रूरंहताशंसकृणाकुरूपंकूटानुरक्तंचस [illegible] सकम १५ त्र्यंशेकु [illegible] त्रिप [illegible] सुत
सभुश्रूषकंदेवगुरुद्विजानांलिपिप्रवीणंकलहप्रियंच वुधोयदाभूमिसुतस्यसंस्थोभागेतृतीयप्रकरोतिमर्त्य [illegible] सततंकुशीलं कांतं [illegible]
त्यपदारयुक्तं १७ स्ववन्हिभागेन्दुसुतःप्रसूतेनरंसुरूपंसुभगंसुशीलं यज्ञव्रतादिष्वनुरक्तचेष्टंदातारमार्यंवहुमित्र [illegible] युक्तंनिपुणंसुरूप [illegible]
प्रसभंमनुष्यं स्त्रीवल्लभं [illegible] मलंघ्यवीर्यंप्रभूतकोशंविविधार्थयुक्तं १९ भागेतृतीयेशशिजःसितस्यतिष्ठन्प्रसूतेसुविदग्धमेव [illegible] धर्म [illegible]
तंनृपवल्लभंच २० त्र्यंशेशनेःसोमसुतःप्रयातःकरोतिनित्यंसकृणंमनुष्यं विवादिनंदुर्वल [illegible] सत्वप्रशासिनविग्रह [illegible] क्रमंच २१ वरनवांशस्थिन
रोतिपापंविकृतंमनुष्यं स्त्रीसौख्यहीनंकलहप्रियंचद्यूतप्रियंचौर्यरतंविशीलं २२ स्त्रीदुर्भगंवंधुजनैर्विमुक्तंप्र [illegible] शीलंहृतशक्तिदर्पं सौम्यो
मेषर्क्षदास्तदाविधत्तेसुमुखंनितांतं ख्यातंचपुष्टंनमुदारचेष्टंजेतारमीड्यंसुहृदांसतांच २४ नवांशकेभूमिसुतस्यसौम्यानरंविधत्ते [illegible] देहं विक
ल [illegible] निष्टंद्वेष्यंखलंपार्थिवपीडितंच २५ नवांशकेस्वे [illegible] सौम्यः सौम्यंसुरूपंसुभगंमनुष्यं देवद्विजातिप्रणवंप्रसन्नंप्रियाभिमानंस्वजनानुकू
वांशकस्थःसुरपूजितस्यसौम्यःप्रसूतेसुखिनंमनुष्यं [illegible] नार्थलाभप्रचुरप्रतापंसुमित्रयुक्तंसततंसुशीलं २७ शुक्रे [illegible] वुध [illegible]
विविधार्थयुक्तं प्रभूतमित्रद्विजपूजनेष्टंसुतान्वितंनित्यमुदारचेष्टं २८ सौरस्यभागेनवमेवितिष्ठन्करोतिसौम्योतिरुजं [illegible]
गुणैरयोग्यंपरांगनासक्तमनार्ययुक्तं २९ सूर्यांशकस्थोविदधातिसौम्योव्रणांरवेःपापमतिंनसौख्यं कुमित्रसंतंरिपुमक्षेर्
संचयंच ३० सूर्यांशकेशीतकरस्यसौम्योनरंविधत्तेविविधप्रतापं सुतार्थयुक्तंरतिसौख्यभाजंविशिष्टशीलंविनयैःसमेतं ३१

सौम्यः चरन्विधत्तेतिशठंविशीलं गतश्रियंवंधुजनेननित्यंपापात्मकंरोगसमन्वितंच ३२ सूर्यांशकेस्वेप्रकरोतिसौम्यानरंप्रभुंशास्त्र
प्रणतारिपक्षंजितेंद्रियंश्लाघ्यतमंसदैव ३३ सूर्यांशकेदेवपुरोहितस्यसौम्यःप्रसूतेसुतरांसुशीलं मर्त्यंमहावृत्तविवृद्धयुद्धं श्रियान्वि
र्यांशकेभार्गवएवसौम्यःकरोतिमर्त्यंप्रचुरान्नकोशं नृपप्रियंसाधुजनानुरक्तंसद्धर्मशीलंवहुपुण्यसौख्यं ३५ सूर्यांशकेसूर्यसुत ... ौम्यःक
मनुष्यं व्यपेतशीलंवहुरोगयुक्तंमायापटुंनिर्दयनिष्ठुरंच ३६ त्रिंशांशकेभूमिसुतस्यसौम्यःकरोतितिष्ठन्परतर्ककंच रौद्रंनरंकुत्स ... मतंपराङ्मुख
जानां ३७ त्रिंशांशकस्योर्कसुतस्यसौम्यःकरोतितिष्ठन्परतर्ककंच रौद्रक्रियासक्तमतिंप्रचंडंघृतप्रियं ... धिभिरर्दितांगं ३८ ... स्वपुर
शांशावस्थः प्रकरोतिधीरं सदाविनीतंगुणिनामभीष्टंस्ववंधुपूज्यंकुलसत्तमंच ३९ त्रिंशांशकेस्वेशशिस ... ुतोमर्त्यंसुक्तंमनुजेप्रसूते गुणैर्भुविख्या
यंप्रसन्नमूर्तिंसततंसुशीलं ४० त्रिंशांशकेदानवपूजितस्यसौम्योविधत्तेप्रचुरंप्रतापं प्रभुंपरक्षेत्रतथाधन ... गधर्वलीलंसुकलत्रयुक्तं ४१ स्वमित्रवी
म्यःकरोतिनित्यंवहुमित्रयुक्तं प्रशमशीलंगुरुदेवभक्तंशुश्रूषकंसाधुजनेसदैव ४२ सौम्योर ... वोधंच ... न्यनभ ... तमर्त्यंप्रियमेवलोके स्थिराकि
वंविख्यातशर्वंदृढमित्रपक्षं ४३ स्वतुंगवीर्येणयुतस्तुसौम्योनरंविधत्तेप्रमदास्वभीष्टं प्रद ... ४ वुधोनरंसिंहमुपेत्यपकंमा ... नित्यं ४५ नं
स्तुसौम्योनरंप्रसूतेसततंमनुष्यं शुचिक्षमासत्यरतंकृतज्ञंमनस्विनंसर्वसुखाधिवासं ४ ... ग्मिम नमिंदुसूनुः श्री ... णां
शसहंरतंतंनृपप्रियंपुण्यभक्तिंसदैव ४६ विज्ञानशास्त्रश्रुतिवाक्यशिल्पगांधर्वमार्गेच ... चारंद एपक्रियोपा ...
र्तिं ४७ दाक्षिण्यसौहार्दविलासहास्यसौभाग्यचातुर्यगुणैरुपेतं आशावलाढ्यःप्रको ... धनु ... रिस्थश्चवुधो ... नुष्यंविर ...
रोतिसौम्यःस्त्रीवल्लभंभूपयुतंमनुष्यं स्वाचारधर्मप्रचुरंप्रगल्भंमत्याधिकंनीतिपरंसदै ... भ ... मतस्यचेष्ट ... र्व ... ल ... च
ल्पवानेप्रियंगंधमाल्यसेवाविधिज्ञंसुहृदोपचारं ५० स्ववारवीर्येणयुतस्तुसौम्यःकरोति ... कल्प ... नलज्जरतिं ... शीलव ... प्रस ...

ठिं ५२ [illegible]ः प्रकरोति सौम्यो नरं न[illegible]णाम निशं हितेषु वहुश्रमक्लेशसहं विनीतं दुर्द्धर्ष[illegible]जातस[illegible]कामथुरं विहि[illegible]
पक्षयुक्तं जनप्रियं धर्मपरं स्वरूपं प्रमाथिनं वैरिगणस्य सम्यक् ५३ स्वमासवीर्यप्रवलस्तु सो[illegible] द्विगुणं नयं तु प्रि[illegible]युक्तः क
स्त्रीसुभगं सुवेषं ५४ सौम्योद्ववीर्यप्रवलः प्रसूते नरं कलाकोविदमङ्गतार्थं सौहार्दमानप्रण[illegible]दरं [illegible]म १५ त्र्यंशे[illegible]
र्निजघन्यरक्तं च नसौहृदं च सौम्यः सुहृद्वीर्यविवर्जितस्तु नरं प्रसूते विषयप्रसक्तं ५६ स्वत्रेवीर्येण वि[illegible] प्रकरोति म[illegible]सततं कुशीलं कांतं [illegible]
नर्थैर्व्याध्यादिविद्वेषयुतं सदैव ५७ स्वतुंगवीर्येण विवर्जितोज्ञः नरं प्रसूते ति निकृष्टचेष्टं प्रपीडितं रमार्यवहुमि[illegible]यक्तं निपुणं वि[illegible]
विवर्जितोज्ञः कठोर[illegible]नयनमतुल्यं विमुक्तदेहं सहजायरक्तं विगर्हितं शीलपरिक्रियाभिः ५९ शुभं[illegible]ति[illegible]प्रसूते सुविर[illegible]ः करो[illegible]ततं [illegible] शु
ल्पकोशं विरक्तमित्रं विकृतिप्रगल्भं ६० द्यूरात्रिवीर्येण विवर्जितोज्ञः करोति भी[illegible]सततं हतांसं [illegible]शासनविग्रह[illegible] स्वाचारसत्क्रांतधर्महीनं
नः प्रकरोति सौम्यो नरं हताशं [illegible] सनप्रतप्तं युद्धोत्सुकं चौरगणाधिपं च क्रियाविहीनं परदेशरक्तं ६२ [illegible]विमुक्तप्र[illegible]पो वर्जितोज्ञो नरं प्रसूते तिखल
तथा निष्ठुरवाक्यशीलं विपन्नदारात्मजसंघतं त्रं ६३ स्ववारवीर्येण विवर्जितोज्ञो नरं प्रसूते वहुकष्टभाजं [illegible]कलत्रमां[illegible]नवैरोपहता
रा[illegible]तिवर्जितोज्ञो नरं प्रसूते वहुशत्रुपक्षं रोगान्वितं दुःख[illegible]रीतवृत्तं द्यूतप्रियं प्रश्रयशौर्यहीनं ६५ स्वपक्षवीर्येण विवर्जितोज्ञो नरं [illegible]सूते मा[illegible]
प्रभूतदोषं सततं रुजार्त्तं विहीनपक्षं वहुतर्कक्षं च ६६ [illegible]वीर्येण विवर्जितोज्ञो करोति मर्त्यं कुटिलस्वभावं गुरुद्विजाचार्य[illegible]पसन्न[illegible]
६७ वुधोयदावर्षवलेन हीनस्तदा प्रसूते निधनं मनुष्यं नानार्थनाशैः परिपीडितांगं खलानुरक्तं गुरुभक्तिहीनं ६८ इति[illegible]ये व[illegible]
सूते दुर्धर्षणं सत्वचलं स्वभावं विख्यातकर्माणमतिप्रगल्भमोजस्विनं वृद्धगुणैरुपेतं १ वृषे गुरुः पीडयति प्रचारं नरं प्रसूते सुभगं सुवेषं
नीतं देवद्विजाचार्यकृतोपचारं २ तृतीयराशौ च सुरेज्यमंत्री नैपुण्यदाक्षिण्यपरं प्रसूते सुमेधसं वाङ्मनसा हितार्थं कृपापरं वुद्धिगुणान्वि

हो॰र॰ कर्कटकेसुरूपंविद्वांसमोजोबलवीर्ययुक्तं प्राज्ञंप्रसूतेप्रियधर्मभाजंयशस्विनंलोकपुरस्कृतंच ४ सिंहेगतेदेवगुरुःप्रवीरंनरंप्रसूतेस्थितधी
६३ दारमुग्रंशूरंबहुस्निग्धसुहृज्जनंच ५ षष्ठेक्रियाज्ञानविशुद्धबुद्धिंमेधाविनंकर्मकथाभिरामं शास्त्रार्थशिल्पश्रुतिकाव्यचित्तंसुदर्शनंदेव
चित्रार्थबहुप्रलापंगुरुर्गुरुंख्यातधियंप्रसूते ६ तुलेविचित्रार्थबहुप्रलापंगुरुर्गुरुंख्यातधियंप्रसूते कांतंशुभाचाररतंविनीतंप्राज्ञंवणि[illegible]ार्थमहंतं ७
वृश्चिकमभ्युपेत्यस्फुटंप्रसूतेबहुशत्रुपक्षंसुहृद्बलंक्लेशसहंबहुशीलंप्रपंचकंहिंसुमनिष्टदारं ८ धनुर्धरस्थस्तुगुरुःप्रसूतेप्रियोपहारंश्रुतिधर्मशीलं यद
मस्थितार्थदातारमार्यंबहुमित्रपक्षं ९ गुरुर्मृगेमार्देवमल्पवीर्यंनीचक्रियाचाररतंदुरंतं मूर्खंपराज्ञाकसमर्थहीनंबहुश्रमंक्लेशसहंप्रसूते १० कुंभे
नंनृशंसंविद्वेषशीलंजनयत्प्रसत्यं कुशिल्पिनोपाश्रयकर्मिणंचमुख्यगणानामतिभीचचेष्टं ११ मीनद्वयस्थोगुरुर्णोवृत्तंगुरुर्नरं श्लाघ्यतमंप्रसू
रंभमहीनदर्पंवेदार्थशास्त्रश्रुतिकाव्यचित्तं १२ होरारवेर्देवगुरुःप्रयातःकरोतिमर्त्यंबहुरोषयुक्तं लुब्धंखवाग्दोषयुतंसुनीत्रंसुगुप्तपापंपरतर्कं
स्यहोराधिगतःसुरेज्योनरंप्रसूतेशुभगंमनोज्ञं स्थिरक्रियारंभधनंशरण्यंधर्मःस्वभावंदृढसौहृदंच १४ भागेत्रि[illegible]येसुरराज्यमंत्रीसूर्यप्रसूतेक्रू
रंक्रियाहीनमनःप्रधृष्यंनिंदाकुकर्मार्जितसंपदंच १५ जीवस्त्रिभागेरजनीकरस्यतिष्टन्प्रसूतेसुमनोज्ञरूपंनरंप्रसिद्धंबहुमानवित्तंप्रगल्भं
कं १६ अंशेगतःभूमिसुतस्यधत्तेनृणांभयंबंधुजनप्रसक्तं पिताक्षिरोगंधनधान्यनाशंप्रभाबाधंदस्युकृतंसदेव १७ अंशेगुरुःसोमसुतस्यतिष्टन्
दं विद्याविनीतंबहुधर्मसक्तंसौम्याकृतिंसौम्यगुणैःसमेतं १८ अंशेस्वकेदेवगुरुःप्रसूतेनरंसुशीलंविजितारिपक्षं क्षमान्वितंपार्थिवमानयुक्तंचतुष्प
दकाण्यंशस्थोभृगुजस्यजीवोनरंप्रसूतेबहुकांचनाढ्यं नानास्वभाजंवररत्नयुक्तंसुखान्वितंपार्थिववल्लभंच २० रौद्रंपरस्वापहरंकुबुद्धिमनिष्टकर्माणम
स्थारविजस्यजीवोनरंप्रसूतेबहुशोकभाजं २१ प्रेष्यःकुकर्मातिखलस्वभावोधनैर्विहीनस्तथमंदसत्वः नवांशकेवासरपस्यजीवोयदातदा[illegible]प्रसूतः प्रसव[illegible]
वांशकेराशिपतेःसुरज्यस्तिष्टन्प्रसूतेशुभगंमनुष्यंप्रियातिथिंभीतिकरंनराणांप्रसन्नचित्तंप्रमदास्वभीष्टं २३ मुष्कादिरोगव्यसनोपतप्तं[illegible]

केभूमिसुतस्यजीवस्तिष्ठन्प्रसूतेति खलंमनुष्यं २४ बुधस्यभागेनवमेसुरेज्यस्तिष्ठन्प्रसूतेसदयंमनुष्यं वित्तान्वितंधर्मपरंसुवेषंशास्त्रार्थरक्तंगुरुभक्तियुक्तं २५ जीवोविहरणेप्रसूते।
कीयेकरोतिमर्त्यंनृपतुल्यवेषं पुत्रान्वितंशुद्धकलत्रयुक्तंशास्त्रार्थयुक्तंक्रतवीर्यवंतं २६ शुक्रस्यभागेनवमेसुरेज्यस्तिष्ठन्प्रसूतेसुखिनंमनुष्यं तेजस्विनंकीर्तिकृतंतोनरेवाविकु
धर्मरतंसरेव २७ भवास्तिरोगव्यसनैःसमेतंश्रियाविहीनंविगतप्रतापं नवांशकस्थोरविजस्यजीवोनरंप्रसूतेनृपपीडितंच २८ सूर्यांशकेवासरपस्यजीवोनरंप्रसूतेवि[illegible]
पं श्रकीर्तिमूतंवहुशत्रुपक्षंमित्रैर्वियुक्तंविसुखंविशीलं २९ सूर्यांशकेदेवगुरुःप्रसूतिचंद्रस्यतिष्ठन् धनिनंमनुष्यं प्रियातिथिंपुत्रसुखार्थयुक्तंभूपालपू[illegible]।
जनानां ३० बृहस्पतिर्द्वादशभागसंस्थोभौमस्यसूतेप्रबलंमनुष्यं विधर्मशीलंव्यसनैरुपेतंरुगार्दितंबंधनभाजिनंच ३१ अर्कांशगस्य[illegible]
सूतेप्रथितंत्रिलोके सत्वाधिकंसर्वगुणोरुपेतंप्रभुंप्रियंबंधुजनस्यनित्यं ३२ स्वार्कांशकस्थःप्रकरोतिजीवोतिष्ठन्नरंसर्वसमृद्धिमंतं पुष्टंजितारिंभयशोर्णयुक्तं
रामास्वभीष्टंसततंसुशीलं ३३ जीवोभृगोर्द्वादशभागसंस्थोनरंप्रसूतेहयकांचनाढ्यं प्रियातिथिंभोगिनमार्यशीलंप्रमादिनंवैरिजनस्यनित्यं ३४ सूर्यांशके।
भास्करनंदनस्यजीवोकुचैलंकुरुतेमनुष्यं दीनंविरूपंवहुदुःखभाजंप्रपीडितंदस्युभिरेवभूपैः ३५ त्रिंशांशकेभूतनयस्यजीवोनरंप्रसूतेकुटिलंमनुष्यं ईर्षापरंपा।
डितंलोकवर्ज्यंविहीनशीलंपरिवादरक्तं ३६ त्रिंशांशकेसूर्यसुतस्यजीवस्तिष्ठन्प्रसूतेविधनंमनुष्यं पापानुरक्तंपरदारशीलंस्वबंधुहीनंकुटिलस्वभावं ३७ त्रिं।
शांशकेसोमसुतस्यमंत्रीमनीषिणंवाक्चतुरंकरोति मर्त्यंविरक्तंद्विजदेवभक्तंसंतुष्टचित्तंसततंसुशीलं ३८ त्रिंशांशकेस्वेप्रकरोतिजीवःकुलीनवित्तंसततंमनुष्यं [illegible]
विद्यागमसक्तवित्तंक्षमान्वितंब्रह्मविदांवरिष्टं ३९ त्रिंशांशकेभार्गवनंदनस्यजीवस्त्वरन्वितनयुतंविधत्ते नरंविनीतंसुतभोगयुक्तंस्त्रीणामभीष्टंनृपलोकमान्यं ३९
सुहृद्दलोदेवगुरुःप्रसूतेनरंविनीतंसततंसुशीलं ख्यातंस्थिरंस्फीतिधरंसुमित्रंसद्वृत्तयुक्तंचतथाजितारिं ४० स्वक्षेत्रवीर्येणयुतःसुरेज्योनरंप्रसूतेगुणशीलवंतं मेधाविनंदेव।
गुरुप्रसक्तंप्रख्यातकर्माणमनल्पवीर्यं ४१ स्वतुंगवीर्येणयुतःसुरेज्योकरोतिनानार्थयुतंमनुष्यं गांधर्वशिल्पव्यवहारकार्यमाधुर्यदाक्षिण्यपरंदयालुं ४२ शुभग्रहालोकनवीर्ययुक्तो
जीवोविधत्तेविरुजंमनुष्यं पापैरनार्यैरखिलैर्विरुद्धमभ्यर्चितंज्ञातिभिरेवभूपैः ४३ पुंसेत्रवीर्येणयुतस्तुजीवोगांभीर्यधैर्यैःप्रवरंमनुष्यं चतुष्पदाढ्यंकुलदेवमुख्यं धर्मसुशीलंनृप

वल्लभंच ४४ बृहस्पतिर्दिग्वलवान्प्रसूतेसुपंडितंभूरिगुणैःसमेतं वस्त्रान्नपानैःसततंमनोज्ञंगतारिपक्षंगतसाध्वसंच ४५ चेष्टावलाढ्यःसुरराजमंत्रीसुचेष्टितंसंज।
नयेन्मनुष्यं तंत्रान्वितंलब्धविशालसौख्यंशूरंधनाप्तंक्षमयासहिष्णु ४७ दिवावलाढ्यःप्रकरोतिजीवोनरंप्रसिद्धंवहुवित्तयुक्तंप्रसन्नमूर्तिंप्रणतारिसंघंसुखान्वितंतंत्र।
विद्यावरिष्ठं ४८ स्ववारवीर्येणयुतस्तुजीवोविद्याधिकंसंजनयेन्मनुष्यं स्त्रीलाभयुक्तंस्वजनानुकूलंप्रियंवदंसर्वकलासुदक्षं ४९ गुरुर्यदावर्षवलेनयुक्तःसततंप्रसूते।
सुभगंमनुष्यंअनार्यशीलंवहुवीर्ययुक्तंवधूंनृपाणांप्रचुरान्नपानं ५० स्वमासवीर्येणयुतःसुरेज्यःकरोतिमर्त्यंसुभगंकृतज्ञं कांतंविनीतंप्रचुरांगनाढ्यंस्ववंधुपूज्यंस।
तंत[illegible]ढ्यं ५१ होरावलाढ्यःप्रकरोतिजीवोनरंमहाज्ञानयुतंप्रशस्तं विज्ञानशास्त्रश्रुतिसौख्यवंतंप्रियातिथिंमानधनैःसमेतं ५२ जीवोयदापक्षवलेनयुक्तोनरंप्रसूते
तिचसप्रधानं विद्यान्वितंसर्वसुखाधिवासंरत्नान्वितंवाजिगजैःसमेतं ५३ जीवोयदामित्रवलेनहीनस्तदाप्रसूतेकृपणंमनुष्यं शत्रुप्रहारज्वरपानदोषस्त्रीरोगवंधादि
निपीडितंच ५४ स्वस्थानवीर्येणविवर्जितस्तुजीवःप्रसूतेकठिनस्वभावं मृतांगनंकुक्षिरुगार्तिदेहंमित्रैर्विहीनंभयविह्वलंतं ५५ जीवोच्चवीर्येणविवर्जितस्तुकरोतिनी
चप्रकृतिंमनुष्यं पुत्रार्थहीनंविवरंकृतघ्नंप्रपीडितंपार्थिवचौरसंघैः ५६ नवांशवीर्येणविवर्जितस्तुसुरेंद्रमंत्रीकुरुतेभ[illegible]तं पापादिरोगैःसहितंसुदीनंविहीन[illegible]
विसुखंविशोकं ५७ [illegible]द्रालोकनवीर्यहीनोजीवःप्रसूतेतिकुरूपदेहं स्ववंधुहीनंजठरस्वभावंवैरिप्रियंक्रोधपरंकुशीलं ५८ पुंवीर्यहीनःसुरराज[illegible]नंप्रसूते।
ललनास्वभावं [illegible]शठंदैषकृतिकप्रकारंश्लेष्मार्तिदेहंवृजिनात्मकंच ५९ दिग्वीर्यहीनःकुरुतेसुरेज्योनरंविहीनंधनधान्यजातैः विदेशसक्तंचपलस्वभावं[illegible] कफ
दमेवनित्यं ६० चेष्टावलेनेवविनासुरेज्यःकरोतिपापात्मकमुग्ररूपं स्त्रीलोकविद्युल्ललनावुदोषैः संपीड्यतेवानृपतेर्मनुष्यैः ६१ करोतिजीवोद्युवलेनहीनः नरं[illegible] पि
शुनस्वभावं कन्याप्रजंवातरुजाभितप्तंनिर्वारिविद्वेषविवृद्धदोषं ६२ स्ववारवीर्येणविनासुरेज्योनरंप्रसूतेपरिभूतवीर्यं पित्ताग्निदाहज्वरशास्त्रचौरैःप्रपीडितंधर्मविव[illegible] ६३
स्ववर्षवीर्येणविनासुरेज्यःकरोतिमर्त्यंधनऋद्धिहीनं कृशंकृतघ्नंचपलस्वभावंकफानिलाभ्यांसततंचयुक्तं ६४ विवर्जितोमासवलेनजीवःकरोतिमिश्र[illegible]
वादेषुसक्तंकृतघ्नंपरान्नरक्तंपरपोषितांघं ६५ करोतिहोरावलहीनमूर्तिःसुरेंद्रमंत्री[illegible]शाढ्ययुक्तं गततत्रयंहीनवलंकुलस्पवंधात्मककारककारकंच ६६ [illegible]

हीनः करोति मर्त्यं निजपक्षहीनं लोभाभिभूतं परिहीनसत्वं प्रभूतशत्रुं परदाररक्तं ६७ इति वृद्धयवने गुरुचारः मेषे तु शुक्रो जनयत्यशांतं वरं बहुक्लेशविरोधशीलं सुदुर्मनस्त्रीहरणप्रसक्तं
सर्पं वनारण्यविचारिणं च १ वृषे बहुस्त्रीसुतरत्नमाढ्यं रम्याकृतिं प्रसूते भृगुजः सुमूर्तिं स्वबंधुभर्तारमनेककीर्त्यं कृषीवलं गोकुलजीविनं च २ निषेवमाणो वृषभं प्रसूते शुक्रो नरं वाग्मिन
मूर्जितं च सुहृद्द्विजातिप्रियं प्रकृतज्ञं विज्ञानशास्त्रार्थकथारतं च ३ चतुर्थराशौ यदि षोडशांशुर्विलिप्टं प्रसूते रतिधर्मशीलं प्राज्ञं श्रुतिज्ञानविशारदं वरिष्ठं मृदुस्वभावं प्रियदर्शिनं च ४
सिंहाश्रितस्तु प्रियबंधुपक्षं शुक्रः प्रसूते नरमल्पसत्वं विचित्रसौख्यं व्यसनं सुरूपं गुरुद्विजाचार्यपरायणं च ५ कन्यागतो मार्दवमल्पवित्तं शुक्रः परोपासनजीवितं च स्त्रीभूषण
रतिगेययुक्तं कलालिपिज्ञं मधुरं च कुर्यात् ६ तुलाधरस्थो भृगुसूनुराढ्यं नरं प्रसूते रुचिरार्थपण्यं विचित्रमाल्याबरमात्मवश्यं बहुप्रवासं श्रमलब्धवित्तं ७ शुक्रोष्टमर्क्षे तु गतो नृ
शंसं विशेषशीलं जनयत्यधन्यं प्रद्विष्टदुष्टप्रतिलोमभार्यं शठं परस्त्रीषु न पत्रपं च ८ धनुर्धरस्थो विगतार्थविघ्नं शुक्रः प्रसूते त्रिविलक्षशब्दं सद्धर्मकामार्थफलैरुपेतं जगत्प्रियं का
न्तमनल्पवृत्तं ९ करोति राशौ दशमे मनुष्यं शुक्रो बहुक्लेशभयश्रमार्थं पैशून्यलोभाश्रितवंचनानां प्रयोगिनं क्लीबविपन्नचेष्टं १० शुक्रश्च लक्ष्मीभवनेऽथ मर्त्यं स्वयोगरागव्यसनोपप
न्नं कर्मस्वसम्यक्करणफलेषु शुक्रः कुर्याद्विरूढं गुरुभिः सुतैश्च ११ मीनद्वयस्थो जनयत्युदारं शुक्रः प्रतिज्ञातरतं मनुष्यं रिपुबुद्धिकर्मप्रचुरं सुरूपं नृपप्रियं सज्जनमानलब्धं १२ होरांग
तो वासरपस्य शुक्रो करोति मूर्खं विधनं विशीलं हिंसानृतस्तेयपरं शकामं पैशून्ययुक्तं च विधर्मशीलं १३ होरागतो रात्रिपतेस्तु शुक्रः सताप्रियं स्फीतधनं करोति गंधर्वलीलामृतगीत
रक्तं विनीतं प्रियं पार्थिवचक्रगं च ॥ १४ द्रेष्काणसंस्थो दिनपस्य शुक्रो नरं प्रसूते कठिनं गतस्वं कुपोषिताभ्यागतसौख्ययुक्तं क्षुद्रं नृशंसं बहुरोषिणं च १५ तृतीयभागे शशिलांछनस्य
तिष्ठन्भृगुः सौख्ययुतं प्रसूते विद्याविनीतं पितृमातृभक्तं तेजस्विनं धर्मपरं कृतघ्नं १६ तृतीयभागे धरणीसुतस्य शुक्रश्च रम्यापरतं करोति क्षुद्रोगवंतं व्यसनैरुपेतं मायावि
नं वंचनतत्परं च १७ द्रेष्काणसंस्थः शशिजस्य शुक्रो नरं प्रसूते शुभगं मनोज्ञं रतिप्रगल्भं प्रियधूर्तदारं सुवर्णरत्नात्मजभागिनं च १८ भागे तृतीये सुरपूजितस्य शुक्रश्च रत्न
श्रेष्ठतमं सुरूपं सत्यान्वितं सर्वकलासु दक्षं क्षमान्वितं प्रीतिकरं जनानां १९ त्र्यंशे स्वकीये भृगुजः प्रसूते नरं प्रगल्भं धनिनं सुशीलं अध्यात्मविद्यान्वितं स्वरूपं कुलप्रधा
नं व्यसनैर्विहीनं २० भागे तृतीये रविजस्य शुक्रः करोति मर्त्यं वधबंधयुक्तं स्वबंधुहीनं परदाररक्तं विद्वेषशीलं सततं कुसेव्यं २१ नवांशकस्थो दिनपस्य शुक्रः करोति मर्त्यं

हो॰ र॰ विकलंसुभीरुं वहुद्विषंनिष्क्रियमल्पवीर्यंप्रपंचयुक्तंगतसत्वसौख्यं २२ नवांशकेभार्गवनंदनस्तुचंद्रस्यधत्तेतनयंनराणां सद्योषितांवैधनधान्यलाभंरिपुक्षयंवंधुसमागमंच
६५ २३ नवांशकेभूमिसुतस्यशुक्रोनरंप्रसूतेरुधिरार्दितांगं प्रपीडितंरस्सुनृपैःसदैवप्रद्वेषशीलंनिकृतिप्रियंच २४ वुधस्यभागेनवमेतुशुक्रः करोतिमर्त्यंविबुधंसधर्मं तीर्थां।
श्रयंदेवगुरुप्रभक्तंप्रियातिथिंमन्त्रियमेरूपेतं २५ शुक्रोनवांशेसुरपूजितस्यकरोतिमर्त्यंप्रणतंद्विजानां विवेकविद्यागमशास्त्रलुब्धंनृपप्रियंसेवचरैःसमेतं २६ नवांशकेस्वभृ
गुजःप्रसूतेऽध्यात्मविद्यानिरतंमनुष्यं स्वधर्मपूज्यंसुधियासमेतंहंतारिपक्षंव्रतशीलिनंच २७ स्थितोनवांशेर्कसुतस्यशुक्रोनरंप्रसूतेसरुजंसुदुःखं भार्यासुतार्थैःपरिवर्जितंचप्रपीडि
तंनीचजनैर्विशेषात् २८ सूर्यांशकेवासरपस्यशुक्रः करोतिदीनंनचदीर्घसूत्रं वुध्याविहीनंस्वजनैर्विमुक्तंद्रोहात्मकंवाद्रतंनृशंसं २९ शुक्रोर्कभागेशशिलांछनस्यनरंप्रसूतेवरयानभा।
जं नृपप्रियंभोगिनमर्थवंतंविहारवापीकरणेषुसक्तं ३० सूर्यांशकेभूतनयस्यशुक्रः विदेशरक्तंमनुजंप्रसूते द्यूतप्रियंयुद्धपरंकृतघ्नंविवेकहीनंपरदारभाजं ३१ सूर्यांशकेसोमपुत्र।
स्यशुक्रोनरंप्रसूतेशुभगंमनोज्ञं स्थानार्थपानैःसहितंप्रसिद्धं विद्यार्जनेतत्परमल्परोषं ३२ सूर्यांशकस्थःसुरपूजितस्यशुक्रः करोत्यार्यमतिंसुदानं सन्मानसौहार्दसुतार्थयुक्तं
विचित्रभोगंद्रविणोपपन्नं ३३ सूर्यांशकेस्वंभृगुजःप्रसूतेविचित्रवाक्यंरतिगेयरक्तं धर्मार्थकामैःसहितंसुवित्तंनृपप्रधानंनिजवंधुमान्यं ३४ अर्कांशकेसूर्यसुतस्यशुक्रस्तिष्ठन्प्रस
तेसुखभाग्यहीनं पापात्मकंशत्रुविवर्जितंचप्रवासिनंव्याधिभिरर्दितंच ३५ त्रिंशांशकेभूमिसुतस्यशुक्रस्तिष्ठन्प्रसूतेसरुजंमनुजं पित्रार्दितंसद्धरमल्पवीर्यंसुनीचयुक्तंप्रभूभयशोकं॥
३६ त्रिंशल्लवेसूर्यसुतस्यशुक्रस्तिष्ठन्प्रसूतेवहुशोकखिन्नं हतात्मकंवंधुवियोगयुक्तंप्रपंचशीलंगतसत्यशौचं ३७ त्रिंशांशकेदेवपुरोहितस्यशुक्रश्चरन्देवरतंप्रसूते सुधर्मशी
लंसुजनाप्तदोषंनरेंद्रपूज्यंव्रतचारितंच ३८ त्रिंशांशकेसोमसुतस्यशुक्रस्तिष्ठन्प्रसूतेसुवपुर्मनुष्यं सौम्यंधनाढ्यंवरदाररक्तंहस्त्यश्वभाजंनृपवल्लभंच ३९ त्रिंशल्लवेस्वेभृगुजः।
प्रसूतेनरंविनीतंधनधान्ययुक्तं तुलाधिकंकीर्तिकरंसुवित्तंहास्यरतंकेलिकरंप्रसह्य ४० शुक्रोयदामित्रवलेनयुक्तस्तदाप्रसूतेवहुमित्रपुत्रं प्रियातिथिंज्ञानदयाप्रसक्तंदेवंध
नैश्वर्यगुणैःसमेतं ४१ स्वस्थानवीर्येणयुतस्तुशुक्रः करोतिमर्त्यंपुरुषप्रधानं स्वस्थानपूज्यंप्रमदास्वभीष्टंप्रसन्नचित्तंधृतिनाधिपंच ४२ स्वतुंगवीर्येणयुतस्तुशुक्रः करो रा॰र॰
तिमर्त्यंवहुकीर्तिभाजं पुण्यात्मकंसंत्पसमृद्धिमंतंचतुष्पदाढ्यंप्रियदर्शनंच ४३ नवांशवीर्येणयुतस्तुशुक्रः करोतिमर्त्यंविजितारिपक्षं यज्ञप्रियंदानपतिंप्रसिद्धंनिर्गुण ६५

दोषंस्वकुलप्रधानं ४४ शुभग्रहालोकमवीर्ययुक्तः शुक्रः प्रसूतेशुभकार्यमुग्रं रोगैर्विमुक्तंप्रणतारिपक्षंप्रियातिथिंसर्वसुखैः समेतं ४५ स्वक्षेत्रवीर्यैप्रबलस्तुशुक्रः करोतिमर्त्यं
हुयोषितान्यं सौभाग्यसौंदर्ययुतंसुकांतंनानार्थलाभैः सहितंसदैव ४६ आशावलाढ्यः प्रकरोतिशुक्रः नरंप्रसन्नंगतशत्रुपक्षं दिग्देशविख्यातियुतंसुताढ्यंप्रभूतचित्तंचप्र
दाप्रियंच ४७ चेष्टावलाढ्यः प्रकरोतिशुक्रोनरंप्रसन्नंद्युतिमल्पपापं हस्त्यश्वयुक्तंगुरुविप्रभक्तंभयैर्वियुक्तंसुतलाभयुक्तं ४८ शुक्रोयदावारवलेनयुक्तस्तदाप्रसूतेसहजंप्र
वं वित्तानशीलंवहुशास्त्ररक्तंसुधर्मशीलंहतशत्रुपक्षं ४९ करोतिशुक्रोव्दवलेनयुक्तस्तदाप्रसूतेसुभगंजितारिं चतुष्पदाच्छादनभोजनाद्यैः समन्वितंसर्वसमृद्धिमंतं ५० होरा
वलाढ्यः प्रकरोतिशुक्रोनरंसुशीलंप्रियवाक्यदक्षं महाजनैः पूजितमेवनित्यंप्रसन्नमूर्त्तिंप्रियदर्शनंच ५१ शुक्रोयदापक्षवलेनयुक्तस्तदाप्रसूतेविजितारिपक्षं स्वपक्षमा
न्यंवहुधर्मयुक्तंप्रियांगनासंगमलब्धसौख्यं ५२ शुक्रोयदामित्रवलेनहीनस्तदाप्रसूतेविधनंमनुष्यं मित्रैर्विहीनंवहुदुःखशोकेरुपद्रुतंपार्थिवपीडितंच ५३ स्वक्षेत्रवी
र्येणाविवर्जितस्तुशुक्रः प्रसूतेतिखलंविशीलं दुष्टांगनासत्यरतंकुरूपंविधर्मिणंपापरतंकृतघ्नं ५४ स्वतुंगवीर्येणविवर्जितस्तुशुक्रः प्रसूतेमलिनंसुपापं नीचानुरक्तंपरदारलु
ब्धंहिस्तंमहाव्याधिभिरर्दितांगं ५५ नवांशवीर्येणविवर्जितस्तुशुक्रः प्रसूतेति कठोरचित्तं भयातुरंसत्यधनैर्विहीनंविद्वेषशीलंगतसौहृदंच ५६ शुभग्रहालोकनवीर्यहीनः शुक्रः
प्रसूतेपरिभूतदेहं विकर्मरक्तंसततंसुदुःखंप्रपीडितंपार्थिवदस्युभिश्च ५७ स्वक्षेत्रवीर्येणविवर्जितस्तुकरोतिशुक्रः प्रखलंमनुष्यं परापवादात्मकमल्पसौख्यंस्त्रियावियुक्तं
वहुहानिंशुक्रः ५८ आशावलेनैवविवर्जितस्तुशुक्रः प्रसूतेपरदेशरक्तं भोगैर्विहीनंशठंरहातंघ्नमायाविनंसाधुजनैर्विहीनं ५९ चेष्टावलेनैवविवर्जितस्तुशुक्रः प्रसूतेवधवंधयुक्तं
क्रूरंकुकर्माश्रितमल्पसत्वंप्रभूतशत्रुंधनदारहीनं ६० शुक्रोयदावासरवीर्यहीनः करोतिमर्त्यंसततंकुचैलं चोरंप्रदुष्टंवहुसंगयुक्तंवीर्यप्रमुक्तंभयविह्वलंच ६१ शुक्रोयदा
वारवलेनहीनस्तदाप्रसूतेहतशत्रुदारं सत्येनहीनंपरिभूतमन्यैः सदासशोकंस्वजनैर्वियुक्तं ६२ करोतिशुक्रोव्दवलेनहीनो नरंनिकृष्टंकुटिलस्वभावं वित्तैर्विहीनंगतवंधुव
र्गंप्रवासशीलंकलहप्रियंच ६३ शुक्रोयदामासवलेनहीनस्तदाप्रसूतेस्वजनैः समेतं विवादशीलंव्यसनैः प्रतप्तंघूतप्रियंसाधुजनस्यवाच्यं ६४ होरावलेनैवविवर्जितस्तुशु
क्रः प्रसूतेमतिसत्यहीनं लज्जावियुक्तंविधनंकुचैलंपराङ्मुखंदेवगुरुद्विजानां ६५ शुक्रोयदापक्षवलेनहीनस्तदाप्रसूतेपुरुषंगतस्वं अनार्यशीलंगतमानलज्जंभयातुरंका

पुरुषंमुजिद्धं ६६ इतिवृद्धयवनेशुक्रचारः॥ मेषेर्कसूनुर्जनयत्यनार्यंकुवेषमाधिव्यसनश्रमार्थं गतश्रियंविष्टुरदुष्टवाक्यंविगर्हितंनिर्धनमिष्टवैरं १ वहुक्रियासंगम।
मर्थहीनवृषेर्कसूनुर्जनयेन्मनुष्यं असत्ककर्माणमयुक्तवाक्यंवृद्धांगनानांहृदयानुगंच २ क्रमागतार्किर्मिथुनेप्रसूतेकामातुरंवह्नृणवंधनार्तं शठप्रयोगंछलकूटमेवद्ध।
ष्टक्रियंदांभिकमंत्रिणांच ३ शनैश्चरः कर्कटकेप्रसूतेनरंदरिद्रंसुभगाभिमानं सदाश्रमार्त्तंजननीवियुक्तंमृदुंविशिष्टक्रियमातुरंच ४ सिंहस्थितोर्किर्जनयत्यशीलंविगर्हि
ताचारगुणंमनुष्यं प्रवृद्धदोषंनिजलोकवाह्यंक्रियासुनीचासुसदाभिसक्तं ५ शनैश्चरःषष्ठमुपेत्यराशिंनपुंसकाकारतनुंप्रसूते परान्नवेश्माभिरतंगतस्वंशठंशिशुस्त्रीज।
[illegible] ६ तुलाधरस्थोरविनःप्रधानमुत्पादयत्यर्थपरंमनुष्यं सौराष्ट्रदेशाटनलब्धमानंचयःप्रकर्षोपकृतास्पदंच ७ शनैश्चरोवृश्चिकगोमनुष्यंविद्वेषवैषम्यपरंप्र
सूते धर्मादपेतंविषशस्त्रदग्धंप्रचंडकोपंनिरपत्रपंच ८ धनुर्धरस्थोमृदुमल्पवाक्यंस्वधर्मवित्ताभिरतंप्रसूते कृतार्थवाक्यंव्यवहारशिक्षाक्रियाभिचारज्ञमनल्पसौख्य
९ स्थितोर्कसूनुर्जनयेन्मृगाख्येनरंस्ववंशोद्भवपूज्यमग्र्यं क्रियाकथाचार्यमनेकशिल्पैःप्रवासिनंवृद्धपुरस्कृतंच १० शनैश्चरःकुंभधरेप्रपन्नःकुर्यान्नरंसत्यधनंसुवा।
क्यं आरोग्यकार्यंवरयानयुक्तंशूरंनृपैःपूजितमल्पपापं ११ शनैश्चरोमीनयुगेप्रसूतेसद्वंधुसंवंधिसुहृद्वरिष्ठं प्रशांतमत्यर्चितमिष्टयत्तंविद्यासुशिल्पेष्वभिजातय
त्नं १२ होरांगतोवासरपस्यसौरिर्नरंप्रसूतेवहुवैरियुक्तं प्रनष्टधर्मंविगताभिमानंदयाविहीनंपरदारलुब्धं १३ होरांगतोरात्रिपतेस्तुसौरिर्नरंप्रसूतेवहुकीर्तियुक्तं सौंद।
र्यसौख्यार्थसमृद्धियुक्तंप्रियंमनोज्ञंप्रणतंसुराणां १४ द्रेष्काणसंस्थोदिनपस्यसौरः करोतिकन्याप्रजनंमनुष्यं व्यायामभाजंविगतप्रतापंप्रसन्नशीलंसततंसुजिह्मं १५
भागेतृतीयेरविजःप्रसूतेचंद्रस्यमर्त्यंमहदर्थयुक्तं विवेकिनंसर्वकलासुदक्षंविपक्षहीनंसुतलालसंच १६ भागेतृतीयेववितजस्यसौरश्चोरंशठंप्रेष्यकरंप्रसूते सुनिष्ठु
रंपापरतंनृशंसंव्यपेतलज्जंगतसौहृदंच १७ द्रेष्काणसंस्थःशशिजस्यसौरः करोतिमर्त्यंवहुशास्त्रयुक्तं वित्तानिनंधर्मरतंप्रशास्यंस्वदारतुष्टंगतसाध्वसंच १८ द्रेष्काणसं।
स्थःसुरपूजितस्यसौरःप्रसूतेद्विजदेवभक्तं प्रियंवदंसर्वसहंप्रगल्भंमहाजनैःपूजितसाधुदारं १९ भागेतृतीयेरविजःप्रसूतेशुक्रस्यतिष्ठन्प्रचुरान्नपानं लाभान्वितंध
र्मपरंसुमित्रंहतारिपक्षंव्यसनैर्वियुक्तं २० स्ववन्हिभागेरविजःप्रसूतेनरंसदाचारमनल्पसौख्यं नृपात्मजैःप्रीतिकरंवदान्यंविमुक्तरोगंवहुमित्रयुक्तं २१ सूर्यस्यभागेनव

मेकेसूनुः करोतिमर्त्यंवहुतीव्रकोपं हिंस्रंप्रनष्टैः सुजनैर्विमुक्तंप्रद्वेषशीलंपरिभूतमन्यैः २२ चंद्रस्यभागेनवमेर्कसूनुर्नरंप्रसूतेसुकलत्रयुक्तं शास्त्रानुरक्तंकतुदानशीलं।
जितेंद्रियंमंत्रविदांवरिष्टं २३ शनैश्वरोभौमनवांशसंस्थोनरंप्रसूतेवचनस्वभावं परांगनासंगरतंविधर्मंमित्रैर्विहीनंसततंकुचैलं २४ शनैश्वरः सौम्यनवांशसंस्थः
करोतिमर्त्यंसुखभोगतप्तं कांतंशुभंलाभपरंविधिज्ञंप्रियातिथिंयज्ञरतंप्रधानं २५ शनिर्नवांशेसुरपूजितस्यनरंप्रसूतेसुरविप्रभक्तं विवेकविद्यागमसत्ययुक्तंप्रसन्न
वक्त्रंप्रचुरान्नपानं २६ मार्तंडजः शुक्रनवांशसंस्थः करोतितीर्थाश्रयमिष्टधर्मं. प्राज्ञंकृतज्ञंवुधलोकसेव्यंजितेंद्रियंशुभ्रमतिंमनोज्ञं २७ नवांशकेस्वेमंकरोतिसौरोन
रंसुदातारमरंवियोगं सुयोषिताभोगविवृद्धसौख्यंजितारिपक्षंस्थिरमुग्रवीर्यं २८ सूर्यांशकेवासरपस्यसौरोनरंप्रसूतेसुमतिंमनुष्यं सुनिष्ठुरंअल्पपरंसुदुष्टंनीचानु
रक्तंविगतप्रभावं २९ सूर्यांशकेऋक्षपतेःप्रयातःसौरःप्रसूतेसुमतिंमनुष्यं लाभान्वितंपार्थिवमानपुष्टंगांधर्वशिल्पादिषुसक्तचित्तं ३०. शनैश्वरोद्वादशभागसंस्थोवु
धस्यसूतेप्रतिमंमनुष्यं वित्तान्वितंधर्मरतंसुलज्जंनरंप्रसूतेक्षितिपस्यजिह्मं ३१ प्रपीडितंवित्तविकारदोषैर्भैरिसदानियतमंनराणां मार्तंड्जोद्वादशभागसंस्थोकी
र्त्यान्वितंशास्त्रविशारदंच ३२ आदित्यजोद्वादशभागसंस्थोजीवस्यसूतेर्थपरंमनुष्यं पुत्रान्वितंवांधवनामयुक्तंलज्जान्वितंब्राह्मणसंमतंच ३३ अर्कांशकेभार्गवजस्य
संस्थः करोतिमर्त्यंप्रचुरान्नपानं विशिष्टदारंवररत्नभाजंभाग्याधिकंप्राणभृतांवरिष्टं ३४ सूर्यांशकेस्वेदिनपस्यपुत्रोनरंप्रसूतेस्थिरवुद्धियुक्तं व्रतोपवासान्वितमिष्ट
मित्रंसुतत्वप्रधानंसततंकुशीलं ३५ त्रिंशांशकेभूमिसुतस्यसौरः करोतिपापात्मकमुग्रचेष्टं नरंनरेंद्रैःपरिभूतदेहंरोगोषतमंप्रखलस्वभावं ३६ त्रिंशांशकेस्वेरविजःप्र
सूतेनरंविनीतंविगतारिपक्षं वित्तार्जनेतत्परमिष्टमित्रंमहावलंसत्यरतंनयज्ञं ३७ त्रिंशांशकेदेवगुरोःप्रयातःशनिःप्रसूतेसुभगंमनुष्यं व्रतोपवासार्जितधर्मवृद्धिं
प्रियंवदंसत्ययुतंप्रगल्भं ३८ त्रिंशांशकेसोमसुतस्यसौरिर्नरंप्रसूतेप्रवरंकुलस्य सौम्याकृतिंपंडितमिष्टधर्मंनपत्रपंशास्त्ररतंसदैव ३९ त्रिंशांशकेभार्गवनंदनस्यक
रोतिसौरःसुतसौख्ययुक्तं प्रियातिथिंवृद्धियुतंकृतज्ञंनारीप्रियंपूज्यतमंनृलोके ४० शनैश्वरोमित्रवलेनयुक्तोनरंप्रसूतेवहुमित्रवंधुं स्थिरस्वभावंवहुकीर्तियुक्तं।
विद्याविनीतंसततंमनोज्ञं ४१ शनिर्यदास्थानवलेनयुक्तस्तदाप्रसूतेशुचिमप्रमत्तं प्रभूतवेश्यपार्थफलंसुदारंचतुष्पदाढ्यंनृपपूजितंच ४२ मंदोयदास्वोच्चव

लेनयुक्तस्तदा प्रसूते शुचिमप्रमत्तं प्रभूतरत्नार्थयुतैः समेतं गतारिपक्षं सततं सुशीलं ४३ मेधापरं पुण्यपरं जितारिं सभासदं ब्राह्मणसंमतं च ४४ शुभग्रहालोकनवीर्ययुक्तः।
शनिर्यदा उग्रनरं करोति कृषिक्रियालब्धहिरण्यसस्यं वराश्वयुक्तं सुखिनं सुशीलं ४५ पुंक्षेत्रवीर्येण युतोर्कसूनुर्नरं प्रसूते त्व पुवीर्ययुक्तं परैरधृष्यं वनिताखभीष्टं प्रियंवदं स
वंकलासु रक्षं ४६ शनैश्चरो दिकवलवुद्धियुक्तो नरं प्रसूते प्रचुरान्नपानं दाक्षिण्यशीलं वहुभोगयुक्तं गांधर्वशीलं द्विजदेवभक्तं ४७ चेष्टावलाढ्यो रविजः प्रसूते नरं सुचेष्टं
सुतरां सदैव सत्यान्वितं देवगुरुप्रभावं सुतीर्थयुक्तं पितृभक्तिरिक्तं ४८ शनैश्चरो रात्रिवलेन युक्तो नरं प्रसूते नरसौख्ययुक्तं भोगाधिकं सौम्यवपुं सुचेष्टं दयान्वितं दानरतं सल
ज्जं ४९ शनैश्चरो वर्षवलेन युक्तः कीर्त्याधिकं सज्जनयेन्मनुष्यं नित्यं सुदांतं व्यसनैर्विहीनं जितेंद्रियं विप्रसुरानुरक्तं ५० शनैश्चरो मासवलेन युक्तो नरं प्रसूते नयनाभिरामं प्रतापि।
नं धर्मसंहं सहितं सुहितैषिणं सर्वजनस्य नित्यं ५१ शनैश्चरो वारवलेन युक्तो नरं प्रसूते वहुशाठ्ययुक्तं अहिंसकं मानगुणैः समेतं प्रभूतकोशं जनवल्लभं च ५२ होरावलाढ्योर
विजः प्रसूते सन्मानभाजं जननीवियुक्तं धर्मे रतं पार्थिवमानयुक्तं विशिष्टलोकानुगतं सदैव ५३ शनिर्यदा पक्षवलेन युक्तस्तदा प्रसूते गतशत्रुपक्षं स्वपक्षपूज्यं स्वकुलप्रधा
नं विमुक्तरोगं गतपापमेव ५४ शनैश्चरो मित्रवलेन हीनो नरं प्रसूते तिखलं विमित्रं हतात्मजं श्रीरहितं विरूपं प्रपीडितं भूपतिना सदैव ५५ स्वस्थानवीर्येण विवर्जितोर्कि नरं
प्रसूते विधनं विशीलं परार्दितं पापरतं कृतघ्नं रुगर्दितं वांधववर्जितं च ५६ स्वतुंगवीर्येण विवर्जितोर्किः नरं प्रसूते विधनं विशीलं परैर्जितं दीनधनं नियुक्तं द्यूतादिदोषैः सहि
तं सदैव ५७ नवांशवीर्येण विवर्जितोर्किः करोति नित्यं वहुशास्त्रयुक्तं पूर्वं सुहित्स्वधनधान्यहीनं प्रमादिनं पार्थिवपीडितं च ५८ पुंक्षेत्रवीर्येण विवर्जितः सौरः प्रसूते रिपु
रोगयुक्तं दौर्भाग्ययुक्तं विकृतं सुतीक्ष्णं सदा विधर्मं निजधर्महीनं ५९ शनैश्चरो दिग्वलवर्जितस्तु नरं प्रसूते परदाररक्तं निराशमुग्रं गुरुद्रोहयुक्तं विपन्नलज्जं सहजं सदैव ६०
चेष्टावलोनो रविजः प्रसूते सुवेषितानर्थपरं मनुष्यं विद्वेषशीलं कुटिलं कुदारं सन्मानहीनं धनवर्जितं च ६१ शनैश्चरो रात्रिवलेन हीनो नरं प्रसूते रतिसौख्यहीनं मायाविनं
व्याधिभिरार्तदेहं दुष्टाशयं सर्वजनस्य नित्यं ६२ शनिर्यदा वारवलेन हीनस्तदा प्रसूते विधनं मनुष्यं वहुप्रकारैर्व्यसनैरुपेतं निंद्यं कुवेषं वहुसाहसं च ६३ शनैश्चरो वर्षवलेन
हीनो नरं प्रसूते ज्वरपित्तयुक्तं पामाशिरोर्तिप्रसवैर्विकारैः संपीडितं सत्यविहीनमेव ६४ शनैश्चरो मासवलेन हीनो करोति मर्त्यं परतर्ककं च ।तस्वकं हान्यसुतं करोति म।

वासशीलैरयिनाक्षिीने ६५ होराबलानःप्रकरोतिमिरोगानंप्रसक्तंसुतदारहीनं विधमेरक्तंसततंमुद्वेगप्रपीडितंवधेनेनेननित्यं ६६ शनैश्चरः पक्षबलेनहीनःकरोतिम
र्त्यनिजपक्षहीनं पापात्मकंबंधुभिरार्त्तदेहं विदेशशीलंपरतर्ककंच. ६७ इतिवृद्धयवनेशनैश्चरचारः "अथोच्चादिबलरूपंग्रहाणांस्थूलं सएववल्यो उच्चबलेनसमेतःप
ऐविभूतिंप्रसाधयति स्वत्रिकोणबलंपुंसांसाचिव्यंबलपतित्वंच १ स्वर्क्षबलेनचसहितः प्रमुदितधनधान्यसंपराक्रांतंमित्रभवनसंयुक्तोजनयतिकीर्त्यान्वितंपुरुषं.
२ नेजस्विनअतिसुखिनंस्थिरविभवंनृपाच्चलब्धधनं निजहोराबलयुक्तोजनयतिविक्रांतमतिचिंत्यं स्वद्रेष्काणबलेनहीनोगुणभाजनंग्रहः कुरुते नवांशकबल
युक्तःकरोतिपुरुषंप्रसिद्धंच ३ सप्तांशकबलसहितः साहसिकंवित्तकीर्त्याढ्यं द्विरसांशबलसमेतः कर्मरतंपरोपकारकंचैव ४ त्रिंशांशबलेनतथाविकसत्सौख्यगु
णान्वितंकुर्यात् "शुभदर्शनबलसहितःपुरुषंकुर्याद्गुणान्वितंख्यातं ५ शुभगंप्रधानमखिलंसुरूपदेहंसुसौम्यंच पुंस्त्रीभवनबलेनचकरोतिजनपूजितंकलाकुश
लं ६ पुरुषंप्रसन्नमूर्तिकंन्यंपरलोकभीरुंच स्थानबलेनसमेतःस्थितिसौख्यंसुहृच्चभागाढ्यः ७ धीरोनिश्चलवित्तःस्वतंत्रकर्माभवेन्मनुजः आशाबलसमवे
तोनयतिस्वविंशनंतश्चपुरुषः ८ नीलावस्त्रविभूषणवाहनसौख्यान्वितंकुरुते क्वचिद्राज्यंक्वचित्पूजांक्वचिद्भाग्यंक्वचिद्यशः ९ ददातिविहगश्चित्रंचेष्टावीर्यसम
न्वितः आयनबलसमेतोरत्नविविधार्थसंगमंस्वदिशि १० वक्रिणस्तुमहावीर्याः शुभाराज्यप्रदाग्रहाः पापाव्यसनदापुंसांकुर्वंतिचवृथाटनं ११ स्वस्थःशरीरस
नागमंसुखंस्वभावजबलेनविदधाति शुभमतुलंविहगेंद्रोराज्यंचविनिर्जितारातिं १२ रात्रिदिवाबलपूर्णोभूगजलाभेनशौर्यपरिवृद्ध्या मलिनयतिशत्रुपक्षंभजतिच
लक्ष्मीनभश्चरैः पुरुषः १३ द्विगुणाद्विगुणादब्दवर्षाधिपमासदिवसहोरेशाः क्रमपरिवृध्यासौख्यंस्वदशासुधनंचकीर्तिंच १४ पक्षबलाद्रिपुनाशंरत्नांबरहस्तिमं
पददद्युः स्त्रीकनकभूमिलाभंकीर्तिंचशशांककरधवलां १५ सकलकरभावरभावितनिर्मलकरजालभासुराःसततं राज्यंग्रहाविदध्युःसौख्यंचमनोरथानीतं १६
अथग्रहाणामुच्चत्रिकोणमित्रनीचशत्रुराशिफलंलिख्यते तत्रोच्चफलंचंद्रिकायां "पुण्यैर्धनैः परिजनैःसुतदारकोशैश्चंडप्रतापनिकरैर्विजितारिसंघः कोपःकु
लेनिजनैः परिपूज्यमानस्तुंगर्क्षगेदिनकरेभवतिप्रजातः १ दाताभोक्ताप्रचुरयुवतीनायकोविश्वबंधुर्नानाक्रीडापरिणतमतिश्चंचलात्मास्वभावः पुत्रीपुत्रैर्

पगजस्थैः पूर्णगेहो विलासी चंद्रे तुंगे भवति मनुजो लोकमान्यः प्रसन्नः २ चंडप्रतापवशिताखिलभूमिपालाः शस्त्रप्रहारनिपुणो धनधान्यपूर्णः रक्ताधिकोरणध
रासुपरप्रजातस्त्कंगस्थिते क्षितिसुते मनुजः प्रतापी ३ अध्यापकः सन्मतिमान्नृपतिप्रधानो लोकोत्तरान्नविभवो गुणवानुदारः सत्कीर्तिवान्सुतनयो निरुजः सुमित्रस्तु
गेबुधे भवति सर्वजनोपकारी ४ भूमंडलीपतिरुदारमतिश्च दाताब्रह्मात्मबोधविमलो वहुपुत्रपौत्रः तीर्थानुरागहृदयो दृढमेरुबंधस्त्कंगे गुरौ धनपतिः सततप्रजातः ५ दे
शाधिपो दृढमतिसुतनुः सुमंत्री शूरः समस्तजनपालनलब्धकीर्तिः चौरादिशासनरतः सुकविः सुबुद्धिस्तुंगे भृगौ कुलेपतिर्मनुजोतिहृष्टः ६ आसागरं क्षितिपतिर्दृढदेह
बंधो हिंसारतीरणभुविप्रथितप्रभावः हस्त्यश्वरत्नमणिभिः परिपूर्णगेहः सूर्यात्मजे भवति तुंगगते मनुष्यः ७ भवति धरणिपालो नीचजाते प्रतापी हयधनगजयुक्तो।
जातिवर्गानुरक्तः कुटिलमतिरभीतिर्भूरिभांडारयुक्तस्तमसि मिथुनसंस्थे जायते मानवेंद्रः ८ मूलत्रिकोणादिफलानि साराण्वल्पा भानुस्त्रिकोणसंस्थो धनवंतं सुखाति
निपुणं भोक्तारं धनवंतं शशी त्रिकोणगः पुरुषं १ वक्रोपि भास्करोपमं शूरं खलु निर्दयं वापि सौम्यो विनादशीलं जयिनं मूलत्रिकोणगः कुरुते २ देवगुरुस्त्वक्रूरं महत्तरं
नयविदं सुखोपेतं दानवगुरुरयिजनयेत ग्रामपुरश्रेष्ठसाम्राजमतिसुभगं ३ आत्मत्रिकोणे आर्किः धनवंतं कुलयुतं शूरं तीक्ष्णमयूखः कुरुते पुरुषं हृष्टं महोद्यकर्मा
णं धर्मरतिं हिमरश्मिर्मनस्विनं रूपवंतमात्मर्क्षे १ आद्यप्रचंडचपलं भौमः कुरुते स्वराशिगः पुरुषं शशितनयोपि विधत्ते वल्गुकथं पंडितं वापि २ काव्यशक्तिसमाद्य
गुरुचेष्टवाक्पतिः स्वराशिस्थः दानवपूज्यः कुरुते कृषीवलं स्फीतवित्तं च ३ कुरुते शनैश्चरोपि मान्यमदुःखं स्वराशिगः पूर्वं मित्रगृहेर्कस्थानं स्थिरसौहृदमर्थदातारं मि।
त्रर्क्षगः शशांकोपशस्ततोलब्धसौख्यं बहुमानं अंगारकोपि कुरुते सुहृद्धनारक्षणेपि संसक्तं शशिजः सुहृद्गतः करोति चातुर्यहास्यधनवंतं वचसामधि[illegible]पूजासतं।
सुविशिष्टकर्माणं ६ मित्रगृहे भृगुतनयः सुहृत्प्रियं दयितं वित्तमतिशूरं भास्करसूनुः कुरुते परान्नभोजनमधर्मरतं ७ नीचेसंविताकुरुते प्रेष्यं वा भवजनोविंधुयुतं।
च हिमरश्मिरल्पपुण्यं रोगिणमपि दुर्भगं लोके ८ नीचस्थः क्षितितनयोनर्थव्यसनोपतप्तमतिनीचं कुरुते हिमकरपुत्रः क्षुद्रं स्वज्ञातिविद्वेषं च ९ नीचगतः प्रकुरुते म
लिनं प्राप्तापमानमतिदीनं असुरगुरुरस्वतंत्रं प्रनष्टदारं विषमशीलं १० कोणे विपन्नशीलं विगर्हिताचारमर्थरहितं कुरुते शत्रुगृहे कौने स्वर्कहाति सुनिर्नत्तचापि॥

॰१ तुहिनमयूखः कुरुते क्रूरो गिणमरिगृहे नरं सततं बंधाद्भिभ्राजमानो विकलं वा दुर्भगं लोके १२ अज्ञानवाग्दीनस्तृष्णो मिनेकम तिदीनं क्लीबं गुरु विविजितं न समा
यं वृत्तं च १३ शुक्रो रिगृहे भृतकं कुमंत्रमतिदुःखितं जनयेत् भास्करसुतोपि कुरुते मलिनं व्याध्या विशोकसंतप्तं १४ द्वौ वुच्चे विदधाते सधनं कीर्त्यान्वितं ... नमपार
क्षकमाद्यं च भूपतिं च त्रयस्त्रमग्रतिमं १५ आद्यनृपात्प्तकीर्तिं चत्वार उदारधर्मसंयुक्तं ख्यातं नृपतिं • प्रतिमंपंचाने कार्थरुद्धकोशं च १६ षट् कोच्चगाः ... नृपतिं
पुरुषं सदा प्रदानमानसंपन्नं वहुवाहनमंडितं १७ स्वोच्चं याताः सर्वे समुद्रपर्यंतमेदिनीनाथं जनयंति चक्रवर्तिनमवनीश्वरजातकं चित्संवा १८ द्वाभ्यां त्रिकोणसंस्थां
भ्यां कुटुंबी कुलवर्द्धनः श्रेष्टः प्रख्यातकीर्तिस्त्रयग्रहाभ्यां भुवि जायते महाधनस्त्रिभिश्चैव गुणग्रामाधिनायकः आद्यो नृपाप्तसत्कारश्चतुर्भिर्लोकसंमतः अग्रलोकः प्रधानो।
पुरनगरभूपकोशेषु पंचग्रहे स्त्रिकोणे भवति कुटुंबप्रभवसौख्यः विद्यादानधनाढ्यः समन्वितो भवति षड्भिरेव पुमान् राज्यशांतिनियतं गोपालकुलेपि संजातः २२ स्वत्रि
कोणगतैः सर्वैर्भवेज्ज्ञातो महीपतिः वस्त्रस्त्रीवलसंपन्नो विद्याशास्त्रविशारदः २३ द्वौ स्वगृहे कुर्वंति कुलाधिकं वंधुपूजितं धन्यं वंशाकरमर्थसहितं स्थानयशोभिस्त्रयो विगताः २४
ख्यातं विशिष्टचेष्टं श्रेणीपुरगणसहितं चत्वारः पंचावनीश्वरसमं प्रभूतगोभूमियुवतिपुत्रयुतं २५ षड्भिः प्रवृद्धशब्दो घ्नति कोपशरीरं गजवाजिमातंगः भवति नृपवंशजो नोनिय।
तं पृथिवीपतिः स्वर्क्षे २६ राज्याधिनृपं स्वर्क्षे जनयति जितारिपक्षमिह सततं मित्राश्रयं सुवृत्तं द्वौ मित्रगृहे समाश्रितौ कुरुतः २७ बांधवसुहृदुपकर्ता त्रिभिर्विशिष्टो गुणैर्भवेज्ज्ञा।
तः ब्राह्मणदेवाराधनपरः चतुर्भिर्धुरंधरः ख्यातः २८ राजोपसेवकः स्यात्पंचभिराद्यो नतस्य शुभकर्ता विस्तीर्णभोगवाहनवसुमान् षड्भिर्नरेंद्रतुल्यः स्यात् २९ सर्वैर्मित्रर्क्ष
गतैर्बहुनागाश्वभृत्यसाधनो राजा द्वाभ्यां नीचे नीचो निश्चितवाक्योंगनासहितः मूर्खो धर्मा भिरतस्त्रिभिर्ग्रहैर्नीचगैः प्रेष्यः आलस्यनष्टचेष्टश्चतुर्भिरिह नीचगैर्भृतकः अगृहः प्र
भिन्नदारः पंचभिरिह कुरुते दासः घातो भयश्रमतप्तः षड्भिर्विश्वोभुवेत्स्वामः ३२ भिक्षुकभुक्तो जितभुक् भवति पुमान् विगतसर्वस्वः नीचैः सप्तभिरखिलैर्दिनकरकलेव।
राजातः ३३ द्वावरिभुवनसमेतौ क्लेशवंतौ नित्यविग्रहरुचीनां अतिपरिभूतानामपि नृणां जन्मप्रदौ कथितौ ३४ विविधव्ययदुःखभुजां त्रयः श्रमेत्पल्वनष्टचिन्नां च
त्वारग्रहयोगात् मृत्सुमर्थविनाशरोगतप्तानां ३५ पंचारिगृहे विहगा नष्टव्यसनाभिचरतमानां षस्तभोगानाथवतां दुःखवतां चैव जन्मकराः समारिभिर्ग्रहैर्द्रा विभवत्सकलेवरं।

हो०र०
६९

प्रसूतानां शाक्त्याच्छादनभोजनवंचितकानांभवतिसदा ३७ स्वेषुस्वभागेषुफलंसमग्रंत्रिकोणवत्स्यात्फलमंशकेषु स्वक्षेत्रतुल्यंभवनांशकेषुनीचारिभागेषुजघन्यमेव ३८
इतिउच्चत्रिकोणराशिमित्रनीचशत्रुगृहगतफलानिइतिश्रीमद्दैवज्ञवर्यपंडितदामोदरात्मजवलभद्रविरचितेहोरारत्नेग्रहचारोच्चादिफलाध्यायश्चतुर्थः अथारिष्टाध्यायोनि
रूप्यते कश्यपः षष्ठाष्टरिष्फगश्चंद्रः क्रूरैश्चसहवीक्षितः जातस्यमृत्युदःसद्यस्त्वष्टवर्षैःशुभेक्षितः १ शशिवन्मृत्युदा६।८।१२सौम्याश्चवक्राःक्रूरवीक्षिताः शिशोर्जातस्य
मासेनलग्नेसौम्यविवर्जिते २ यस्यजन्मनिधीस्थाः सुःसूर्यार्कीदुकुजाभिधाः तस्यजातोजनित्रीचभ्राताचनिधनंलभेत् ३ पापेक्षितयुतोभौमः लग्नगोनशुभेक्षितः मृत्युदस्त्वष्टमस्थो
पिसौरेणार्केणवापुनः ४ पापान्वितःशशीधर्मेद्यूतलग्नमतायदि शुभैरवीक्षितयुतस्तदामृत्युप्रदःशिशोः ५ संध्यायांचंद्रहोरायोगंडांतेनिधनायवै प्रत्येकंचंद्रपापैश्चकेंद्रगैः
स्याद्विनाशनं ६ रवेरस्तमंडलार्द्धास्तात्सायंसंध्यात्रिनाडिका तथैवार्द्धोदयात्पूर्वंप्रातःसंध्यात्रिनाडिका ७ चक्रपूर्वापरार्द्धेषुक्रूरसौम्येषुकीटभे ८ लग्नगेनिधनंयातिनात्रका
र्याविचारणा व्ययशत्रुगतैःक्रूरैःमृत्युर्द्रव्यगतैरपि ९ पापमध्यगतेलग्नेसत्यमेवमृतिंवदेत् ९ लग्नसप्तमगौपापौचंद्रोपिक्रूरसंयुतः यदात्ववीक्षितःसौम्यैः शीघ्रान्मृत्युर्भवे
त्तदा १० जीर्णेशशिनिलग्नस्थेपापैःकेंद्राष्टसंस्थितैः योजातोमृत्युमाप्नोतिसोविशत्रुर्नसंशयः ११ पापयोर्मध्यगश्चंद्रःलग्नाष्टाद्यंतसप्तमः अचिरान्मृत्युमाप्नोतियोजातःसशिसुस्त
दा १२ पापद्वयमध्यगतेचंद्रेलग्नसमाश्रिते सप्ताष्टमेनपापेनमात्रासहमृतःशिशुः १३ रवौपापान्वितेग्रस्तेयदालग्नंसमाश्रिते अष्टमस्थेकुजेशस्त्रान्मृतिःस्यान्मातृवालयोः
१४ शनैश्चरार्कभौमेषुरिष्फधर्माष्टमेषुच शुभैरवीक्षमाणेषुयोजातोनिधनंगतः १५ पापेक्षितयुतास्तेतेयोगाश्चोक्तफलप्रदाः सौम्येक्षितयुतास्तेपिसर्वथाफलप्रदाः १६
यवनंजातके शनिक्षेत्रगतोभानुर्भानुक्षेत्रगतःशशी विंशद्वर्षेभवन्नाशोरक्षितोयदिशंकरः १७ लग्नस्थितोयदाराहुःकेंद्रंभवतिचंद्रमाः वालस्पतेरपि [illegible] रक्षितो
यदिशंकरः २ चतुर्थेचयदाराहुःकेंद्रषष्ठाष्टगःशशी दशमेब्दैभवेन्मृत्युःसद्योजातोनसंशयः ३ सप्तमेचयदाराहुर्मूर्तौभवतिचंद्रमाः वर्षेचतुर्थेमरणं [illegible] नसंशयः
४ जन्मकालेयदाराहुःषष्टेष्टमेगतस्तदा अपस्मारीभवेद्बालःसद्योजातोनसंशयः ५ अष्टमेद्वादशेजीवःलग्नेभवतिचंद्रमाः अष्टमेमंगलश्चैवसद्यातियम [illegible] ६ सप्तमस्थो
भूमिपुत्रोलग्नेभवतिचंद्रमाः आत्मानंपितरंहंतिमातरंचनसंशयः ७ शुकजातके राशिसंधिषुयेजातास्तेवाला [illegible] जीवितः पापदृष्टियुतेचापिनिः

रा० ६९

चंद्रादित्यौतृतीयस्थौक्रूरभेक्रूरसंयुते व्याधितस्यविजानीयांत्रिदोषश्चातिवर्तते २ होरायांकर्कटस्थंद्रौनिधनेचसमन्विते निधनस्थः परःकश्चिज्जातेमासेननजीवति ३
सहितौजन्मयामित्रेयस्यांगारकभास्करौ राहुदयेयदाजातः ग्रामदशाहान्मृतिर्भवेत् यद्रेष्काणोचयामित्रेयस्यस्याद्दारुणग्रहः क्षीणचंद्रोविलग्नस्थः सद्योहरतिजीवितं ५
आयोह्निमस्थिताःसर्वेग्रहाबलविवर्जिताः षण्मासंवाद्विमासंवातस्यायुःसमुदाहृतं ६ विलग्नाधिपतौनीचेनिधनेचार्कजोभवेत् कृच्छ्रेणजीवितंविद्यात्दृष्टेयोविनश्य
ति ७ ग्रहणपरिवेषकालेजातःपापोविलग्नस्थःलग्नेवाबलहीनेजीवतिवर्षत्रयंत्रिमासंवा ८ क्षीणंयद्वाशशांकंपश्येद्राहुःसमागमेपापेःजन्मेशेसप्तमस्थेनिधनेषष्ठाष्टमेवर्षे
९ यस्याष्टमगःपापोलग्नेशेपापसंयुते केंद्रेसौम्ययुतेदृष्टेहीनेनिधनंस्यात्सप्तमेवर्षे १० अर्केंदुयोगराशिःपापयुतोयस्यकेंद्रनवमस्थः निधनंकुरुतेवर्षेसुविषजलेहृत
तुनसंदेहः ११ चतुर्थेनवमेसूर्येवाष्टमेत्वबृहस्पतौ द्वादशस्थेशशांकेचसद्योमृत्युविनिर्दिशेत् १२ द्वादशस्थेयदासौरिःजन्मस्थोपिभूसुतः चतुर्थेसैहकेयश्चसोष्टमासान्नजीवति १३
शुभलग्नेयदायातःषष्ठेचैवनिशाकरः शनैश्चरस्थवधुस्थस्तृतीयेमासिनश्यति १४ मेषालिमृगकुंभस्थोलग्नादष्टमगोरविः द्वित्र्यादिपापकेंद्रस्थोमरणायनसंशयः
१५ भौमोविलग्नेशुभदैरदृष्टःषष्ठाष्टमेवार्कसुतेनदृष्टः सद्यःशिशुंहंतिवदेन्मणित्थःस्मरेचजातानशुभेक्षितश्च १६ सोमजातके द्वादशस्थोरविकुजावष्टमस्थो
यदाशनिः वर्षमेकंनजीवतिरात्रिनोयदिशंकरः द्वादशस्थौरविकुजौतनुस्थौशशिसूर्यजौ सोमेणदृश्यतेलग्नंसयातियममंदिरं लग्नाच्चतुर्थेसूर्यःसप्तमेचशनैश्चरः
नगतेचंद्रेमासमेकंनजीवति तृतीयस्थौरविकुजावष्टमस्थोयदाशनिः बलहीनौगुरुभृगूवर्षमेकंनजीवति अष्टमस्थोयदापापश्चंद्रःषष्ठोयदाभवेत् बलहीनौ
एकादशेगुरुभृगूत्रिमासान्मृत्युमिछति लग्नेभास्करपुत्रेचनिधनेहिममालिकः तृतीयस्थोयदाजीवःसयातियममंदिरं लग्नात्षष्ठेशशिकुजौसौम्यस्तद्वादशेस्थितःतंनुस्था
गुरुभृगूवर्षमेकंनजीवति लग्नसंस्थौरविकुजावष्टमस्थेयदाशनिः निर्वीर्यश्चयदाजीवोजीवनंतस्यनिष्फलं १८ होरायांदृश्यतेचंद्रोहोरापालोस्तिमोथवा तेसितः।
सप्तमेसौरिःकष्टाकोजीवनंनहि १९ अरिजायास्थितेचंद्रेभृगुपुत्रेणसंयुते मार्तंडेदशमस्थेचमासमेकंनजीवति २० लग्नस्थोपियदापापःसौम्योद्वादशसंस्थितःतद्रा

हो॰ १॰ मृत्युंव्रजेज्जातोदेवराजसमोयदि २१ लग्नस्थाःसर्वपापास्तद्वादशस्थोयदागुरुः वुधोभवेद्यदाषष्टेसयातियममंदिरं २२ सप्तमसप्तमगेभौमेलग्नेभास्करशीतगू यदाषष्टे
७० गुरुभृगूतस्याकष्टंसमादिशेत् २३ पापःसप्तमगःपंगुर्द्वादशेचंद्रमायदि अष्टमेमंगलोयस्यतस्यमृत्युर्भवेध्रुवं २४ कृष्णपक्षेदिवाजातःसप्तमेगुरुभार्गवौ चंद्रराहोश
नौदृष्टेसप्तरात्रंनजीवति २५ शुक्रेलग्नेयदाजातोअष्टमेचनिशाकरे शनैश्चरगतेरंध्रेषण्मासंसनजीवति २६ जातःसौरिर्विलग्नस्थोभृगुःसूर्येणसंयुतः द्वादश
स्थोगुरुश्चैवपंचमासंनजीवति २७ तृतीयैकादशेचैवनवमेपंचमेभृगुः सप्तमस्थोयदाजीवोजीवेद्वर्षशतंनरः २८ कंटकस्थोयदाजीवोसप्तमस्थोपिभार्गवः
वुधेचलग्नसंप्राप्तेशतंजीवतिजातकः २९ लग्नेजीवस्तथाशुक्रःसौम्यश्चाष्टमगोभवेत् पापाःसर्वेनपश्यंतिजीवेद्वर्षशतंनरः ३० पूर्णचंद्रेशुभेवर्गेमित्रेवामित्र
वीक्षिते उच्चत्रिलाभसंस्थोवापूर्णायुर्जातकोभवेत् ३१ कल्याणवर्मावृहस्पतिर्भौमगृहेष्टमस्थःसूर्येंदुभौमार्कजदृष्टमूर्तिःवर्षैस्त्रिभिर्भार्गवदृष्टिहीनोलोकांतरंप्राप
यतिप्रसूतं १ वक्रीशनिर्भौमगृहंप्रपन्नःछिद्रेथषष्टेथचतुष्टयेवा कुजेनसंप्राप्तवलेनदृष्टोवर्षद्वयंजीवतितत्रजातः २भास्करहिमकरसहितःशनैश्चरःमृत्युदःप्र
सवकाले वर्षैर्नवभिर्जातैरित्याहुर्ब्रह्मशौंडाख्याः ३ भौमदिवाकरसौराछिद्रेजातस्ययस्य शत्रुगृहेम्रियतेवश्यंसनरोयमकृत्तरक्षोपिमासेन ४ एकःपापोष्टमगःश
त्रुगृहेपापवीक्षितोवर्षात् मारयतिनरंजातंसुधारसैर्यैनपीतोपि ५ रविशशिभवने शुक्रोद्वादश १२ रिपु ६ रंध्रगोशुभैःसर्वैःदृष्टःकरोतिमरणंषड्भिर्वर्षैर्नसंदेहः
६ कर्कटधामनिसौम्यःषष्ठाष्टमसंस्थितोविलग्नर्क्षात् चंद्रेणदृष्टमूर्तिर्वर्षचतुष्केनमारयति ७ तीव्रफलाराजयोगाःपवनाद्यैर्येविनिर्मितास्तेषु वक्तव्यंरेष
विदास्वलकुलजातस्यरिष्टमिति ८ केतुर्यस्मिन्नृक्षेभ्युदितस्तस्मिन्प्रसूयतेयोहि मासद्वयेनमरणंविनिर्दिशेत्तस्यजातस्य ९ गगनस्थोदिवसकरःपापैर्वहुभिर्नि
रीक्षितःसद्यःमारयतिभौमधामनिशाद्भिेचनसंशयोभवति १० जन्माधिपतिःपापःपापर्क्षेपापयुग्दृष्टःपीडांजनयतिपुंसांशुभयुग्दृष्टोनघातितरां ११ जेनेयेद्र
ष्काणनिगडाहिविहंगपाशधूसंज्ञाः मरणायसप्तवर्षैःक्रूरयुतानस्वपतिदृष्टाः १२ लग्नेलग्नाधिपोयस्यपापयुक्तेक्षितोभवेत् पीडांकरोतिजातस्यशुभयुग्दृष्टि राम स्मः
तोल्पिका १३ राहुश्चतुष्टयस्थोनिधनायनिरीक्षितोभवतिपापैः वर्षैर्वदंतिदशभिःषोडशभिःकेचिदार्याः १४ पापास्त्रिकोणकेंद्रेसौम्याः … कहाक्षिपुन … स्थो ७९८

श्च सूर्योदये प्रसूतः सद्यः प्राणांस्त्यजति जंतुः १५ क्षीणशशी श्च द्रोलग्नस्थः क्रूरवीक्षितः कुरुते स्वर्गगमनं हि पुंसां कुलीरगो जान् ॥२।२ परित्यज्य १६ वर्षात्मलेनक्षीन ॥...
मसंस्थितो विलग्नर्क्षात्सद्यः क्रूरैर्दृष्टः सौम्यैर्व्दाष्टकेनैव १७ अशुभशुभैः संदृष्टे वर्षचतुष्केण निर्दिशेदंतं अनुपातः कर्तव्यः प्रोक्तादूनग्रहैर्दृष्टे १८ सौम्याः षष्ठाष्ट ३
क्रूरैर्वक्रोपसंगतैर्दृष्टः मासेन मृत्युरात्तेयदि न शुभैर्युक्तसंदृष्टाः १९ लग्नाद्द्वादशधनगैः क्रूरैर्म्रियते चरंध्ररिपु संस्थैः शुभसंपर्कमयाते मासे षष्ठे ऽष्टमे वापि २०॥
लग्नाधिपो जन्मनि षष्ठाष्टरिष्फगो जन्मकाले अस्तंगतो मरणकरो राशिप्रमितैर्वर्दहर्षैः २१ होराधिपतिर्हीने पापयुतो मरणमेव विदधाति मासेन जन्मनाथस्तद ... द्वेनशुभदृष्टः
२२ चंद्रः कुजरविजयुतः स्वसुतस्थानेन न वापि शुभदृष्टः मरणं शिशोः प्रयच्छति वर्षेन वमेन संदेहः २३ होरेश्वरस्त मृत्यौ पापैः सकलैश्च दृश्यते वलिभिः मासि चतुर्थे मरणं जातस्य
करोति मुनिवाक्यं २४ होराजन्माधिपतिः सूर्यः स्वपुत्रसहितो ऽष्टमे भवति राशौ वर्षैराशिप्रमितैर्मरणाय सितेन संदृष्टः २५ द्यूनचतुरस्रसंस्थे पापद्वयमध्यगे शशिनि जातः वि
लयं प्रयाति नियतं दैवैरपि रक्षितो वालः २६ व्ययाष्टसप्तोदयगे शशांके पापेन दृष्टे शुभदृष्टिहीने केंद्रेषु सौम्यग्रहवर्जितेषु प्राणैर्वियोगं व्रजति प्रसूतः २७ चक्रस्य पूर्वभा
गे पापाः सौम्यास्तथापरे चैव वृश्चिकलग्ने जातागतायुषः वज्रमुष्टियोगे ऽस्मिन् २८ क्षीणे शशिनि विलग्ने पापैः केंद्रेषु मृत्युसंस्थैर्कः भवति विपत्तिरवश्यं यवनाधिपते
र्मतं चैतत् २९ राश्यंतगतैः पापैः संध्यायां हि मम यूपहोरायां मृत्युः प्रत्येकस्थैः केंद्रेषु शशांकपापैश्च ३० पापद्वयमध्यगते होरासंप्राप्त संस्थिते चंद्रे सौम्यैः सबलैः स्व
रैरनीक्षते वधं वं म्रियते ३१ द्यूनाष्टमगैः पापैः क्रूरग्रहवीक्षितैः सह जनन्याः म्रियते शुभसंदृष्टे सत्यस्य मृताद्वदेद्व्याधिं ३२ ग्रहणमध्यगते चंद्रे स क्रूरे लग्नगे कुजे
ऽष्टमे मात्रा सार्धं म्रियते चंद्रवदर्के सशस्त्रेण ३३ क्षीणे शशिनि विलग्ने कंटकनिधनस्थितैः पापैः सौम्यादृष्टे मृत्युः प्रवदेज्जातस्य निर्देश्यः ३४ द्यूनगते ऽर्के लग्ने कंटकनि
धनस्थितैः पापैः सौम्यादृष्टे मृत्युर्यमे कुजे वाविपर्ययं वापि ३५ अत्यंतरयुते चंद्रे शुभैरदृष्टे चिरान्मृत्युः होरानिधनास्तगतैः पापैः क्षीणे व्ययस्थिते चंद्रे जातस्य भवति
मरणं सद्यः केंद्रेषु चेन्न शुभाः ३६ लग्नात्पंचमनवमनैधनसंयुक्ताश्चंद्रसौरिसूर्याराः जातस्य वधं कुर्युः स द्योगुरुणा न चेद्दृष्टाः ३७ लग्ने चंद्रे केंद्रा प्राप्ताः बलिनस्त्रि
कोणकेंद्रेषु सौम्यैरमिश्रदृष्टाः सद्यो मरणाय कीर्तिता यवनैः ३८ शुक्रो रविशशिसहितो मारयति नरं सदा प्रसवकाले दृष्टोपि देवगुरुणा न वमिर्वर्षैर्न संदेहः ३९ नि

धनास्तव्ययलग्नत्रिकोणगाः क्षीणचंद्रसंयुक्ताः पापाबलिनः शुभैरदृश्यमानागताप्युषं कुर्युः ४० योगेबलिनः स्थानेस्वंवालग्नेगतेपिवाचंद्रे बलवतिवाशुभदृष्टेह्यावर्षान्मृत्युःकाल
स्यात् ४१ रविचंद्रभौमगुरुभिः कुजभृगुसूर्येंदुभिस्तथैकस्थैः रविशनिभौमशशांकैर्मरणंखलुपंचभिर्वर्षैः ४२ राशिप्रमितैर्वर्षैर्मारयति विलग्नपोरिपुस्थानेमासैः [illegible]णप
तिर्द्विवर्षैरंशाधिपोहंति ४३ मारयति षोडशाहाच्छनैश्चरः पापवीक्षितोलग्ने ग्रहयुक्तोमासेननवर्षाद्युद्दक्तमारयति ४४ रविशशियुक्तःशशिजः सौम्यैर्दृष्टोविनाशय
तिनूनं एकादशभिर्वर्षैर्दिवांकेपि स्थितंजातं ४५ लग्नेरविसौरकुजाः शत्रुगृहेसप्तमेशशीक्षीणः दृष्टोनदेवगुरुणासप्तभिरब्दैर्विनाशयति ४६ केंद्रेरविमुषिततनुः
क्षितिसुतोमंदावलोकितोयसुतः वर्षद्वयेनचंद्रोमारयति किमत्रगणितेन ४७ लग्नाधिपतिश्चंद्रोमरणपदस्थोपिकृष्णतांयातः क्रूरैः सकलैर्दृष्टोनशुभैर्वर्षैस्त्रिभि
स्तमारयति ४८ लग्नाधिपतिःपापःशशिनांशोरिष्फगोयदाचंद्रात् क्रूरैर्विलोक्यमानोमारयतिशिशुंनवभिरब्दैः ४९ दर्शनभागेसौम्याःक्रूराश्चादृश्यगाःप्रसवकाले रा
हुर्लग्नोपगतोयमभवनंनयतिपंचभिर्वर्षैः ५० राहुःसप्तमभवनेशशिसूर्यनिरीक्षितोनशुभदृष्टः दशभिर्द्वाभ्यांसहितैरब्दैर्जातंविनाशयति ५१ घटसिंहवृश्चिकोद
यकांतस्थितिर्हरतिजीवितंराहुः पापैर्निरीक्ष्यमाणःसप्तमितैर्निश्चितंवर्षैः ५२ केतोरुदयःपूर्वपश्चाद्दुल्कानिपवननिर्घाताः रौद्रेसार्पमुहूर्तेशापैःसंत्यज्यतेजातः ५३ क्षीणं
यदाशशांकंपश्यतिराहुःसमागतंक्रूरैः मारयतितदादिवसैर्निर्व्याजंकतिपयैरेव ५४ कुंभेदशतिशशांकोभागेमृत्युस्तथैकविंशाख्ये सिंहेपंचमेंशेवृषेनवमेंतथैवोक्तः ५५
अलिनित्रिविंशयुक्तेमेषेचतथाष्टविंशतिनेमृत्युः कर्कटकेद्वाविंशेतुलिनिचतुर्थेमृगेविंशे ५६ कन्यायांप्रथमेंशेधनुषिराष्टदशेझषेदशमे मिथुनेद्वाविंशेशशि
नोंशेजन्मनिवर्षैर्गतैस्तुतावद्भिः मरणंहिजन्मभाजामयांतकवद्वरक्षाणं ५७ अथयोगायुर्यत्नजातके होरेश्वरेर्कसंस्थेजन्मेशेसौम्यदृग्हीने केंद्रगते
श्चपापैर्जातस्याविंशतेर्भवतिमृत्युः १ नीचांशकस्थश्चंद्रोप्यष्टमसंस्थःक्षयीचमरणकरः कुंजमंदाभ्यांदृष्टस्तस्यायुःपंचविंशतिःपरमं २ भौमेलग्नेबलिनेराशिमंदेकेंद्र
गेबलाद्रिक्तो आविंशतेर्मृतिःस्याद्व्यंगोवारोगयुक्तोवा ३ कुजरवियुक्तेलग्नेचरराशौमध्यसंस्थितेजीवे सुतधर्मगतेचंद्रेजातस्याविंशतेर्मृतिः [illegible] चंद्राष्टम
गेःपापैःसौम्यैरपोक्लिमस्थितैर्जन्मनिधनारिगतेचंद्रेतस्यायुर्विंशतिःपरमं ५ अर्थव्ययर्क्षसंस्थोजीवो [illegible] नसंयुक्तः सप्ताष्टमश्चयदावे

शात् ६ गुरुणायुक्तो शुक्रोधनोपगः पंचमे कुजार्कसुतौ बलरहितश्चेत् चंद्रोजातोल्पजीवितोनियतं अष्टाविंशतिवर्षेमरणंचंद्रोर्कराहवोलग्ने कुस्थलकलीनराशौविक्ष
गतस्तदानियतं ८ चंद्रलग्नाष्टमपतीकेंद्रगतावष्टमेग्रहः कश्चित् आद्वात्रिंशन्मरणंनान्यस्मिन्शुभयुतेकेंद्रे ९ चंद्रेक्षीणेस्वर्क्षेनिधनेकेंद्रगेष्टमेपापे लग्नेशेबल
हीनेजातः परमायुरात्रिंशत् १० होरानिधनाधिपयोः स्फुट्योगकेंद्रमृत्युराशिस्थः तत्रसमेतः पापोनिधनंस्यात्सप्तविंशत्या ११ रंध्रेश्वरोभाग्यफलेयातेतस्योलग्ना
धिपेक्रूरदृष्टेऽष्टमस्थे जातश्चतुर्विंशतिवर्षमायुः शुभेक्षितेस्तेरपमृत्युर्नैषः १२ पापोदयेसुरगुरौशनिदृष्टेराहुणायुक्तेयः कश्चिन्निधनंगतोमरणंजनयेद्विरुद्ध
संख्यकैः १३ होरेशेषष्ठगतेसक्रूरौचंद्रभास्करौसुतगो निधनेशेबलवर्जितेत्रिंशद्वर्षाण्यसौजीवेद्द्वात्रिंशज्जातकक्रमः १५ आपोक्लिमगतेचंद्रेलग्नेशेच
तथैवहि पापेक्षितेबलैर्हीनेजीवत्यष्टचतुर्गुणं १६ गुरुशुक्रौचकेंद्रस्थौलग्नेशेपापसंयुते आपोक्लिमस्थेसंध्यायांजातस्यायुस्त्र्यषित्रयम् १७ पापमध्यगते
सूर्येलग्नस्थेशत्रुवेश्मनि जातश्चरोगपीडार्तः परमायुस्त्र्यषित्रयं १८ भौमेंदूलग्नगौयस्यकेंद्राष्टमविवर्जितैः सौम्यैः कुलिकवेलायांजातस्यायुस्त्र्यषित्रयं १९।
अष्टमपतौविलग्नेस्थिरराशौजायतेनरोयस्तु चत्वारिंशद्वर्षैर्मरणंरंध्रेनशुभयुक्ते २० लग्नेशेनिधनांशस्थेलग्नेशेनिधनेश्वरे पापयुक्तौतदाजातः पंचाशद्वर्ष
जीवतः २१ यस्यकेंद्रेपापयुक्तेलग्नगेक्रूरवर्जिते षष्टिवर्षात्परंनास्तिपापैः पंचमसंस्थितैः २२ लग्नेशेव्ययसंस्थितेक्षीणेपापयुतेपिवा षष्टिर्वर्षात्परंना।
स्तिनलग्नेचेद्बृहस्पतिः २३ अष्टमाधिपतौकेंद्रेभौमेलग्नंसमाश्रिते अर्कार्कजौत्रिषष्ठस्थौजीवेदुद्रचतुष्टयं २४ वर्गोत्तमांशगेचंद्रेलग्नस्थेपापवीक्षिते
सौम्यैर्बलविहीनैश्चद्वादशाब्दचतुष्टयं २५ सौम्यैः पापांशकर्कस्थैः पापैः केंद्रगतैस्तथां मध्यमायुरयंयाम सौम्यैः केंद्रविवर्जितैः २६ द्विशरीरोदयेलग्ने
मंदेचंद्रेष्टमेव्ययेपिवा जातस्तत्रमनुष्योजीवेद्वर्षाणिद्विपंचाशत् २७ अलिकर्कोदयेलग्नेसूर्येपापान्वितेविधौ धनगेहेगुरुर्हिकेंद्रेस्याच्छतवर्षतस्या।
युः २८ चतुरस्रगताः पापाः लग्नात्कुर्वंतिमध्यमायुष्यंचंद्रात्तथैवदिवसेः सौम्यैरनवीक्षितानः शुभयुक्ताः २९ सुतदशमेसौम्यैः स्यान्निधनेरव्यन्विते।
व्यये चंद्रे गुरुशुक्रावेकगतौजातस्तत्रैवमध्यमायुः ३० शन्यंशेलग्नेशेनिधनेशसमन्वितेनिशानाथे षष्ठेऽष्टमेव्ययेवाजातस्तस्याष्टपंचाशत् ३१ ल

ग्राधीशान्मृत्युषट्व्ययस्थाः पापाः संतोनैधनेजीवयुक्ते अस्मिन्योगेजायतेयोमनुष्योप्यस्यायुः षष्टिवर्षप्रदिष्टं ३२ होराजन्माधिपतीअर्कः गतौमृत्युराशिसंयुक्तौ केंद्रचतुष्टयहीनेर
वगुरौपंचयुक्षष्टिः ३३ षष्ठाष्टमव्ययगतैर्ग्रहैः समस्तैर्नृपालयोगेच अस्मिन्योगेजातः परमायुश्चाष्टपंचाशत् ३४ अर्ककुजमंदयुक्तेवलवर्जितेदेववरपूज्ये चंद्रोप्यायेसुतेवीसतिवर्षा
णिजीवतिप्रायः ३५ शुक्रजातके चतुर्थैर्ग्रहैर्युक्ते लग्नेद्विविसुखे क्रमात् चिरायुमात्रजातोयोज्ञानवानर्थवान्भवेत् १ पंचमादिषुतैर्युक्तेषष्टि ६० वर्षाणिजीवति नवमादिषुतैः सर्वैः
स्वल्पायुर्जायतेत्रयः २ क्रूरनवमांशकस्थैः केंद्राश्रितैरशीत्यब्दं जीवतितत्रोद्भूतोमिश्रैर्वाषष्टिवर्षंच ३ गुरुचंद्रौहिबुकस्थौलग्नेशेलाभगेवलाढ्यस्यात् सौम्यैर्दशमयातैरशी
तिवर्षाणिपरमायुः ४ जीवांशकस्थारविचंद्रभौमाः केंद्राश्रितालग्नगतः सुरेज्यः वंधुंहित्वायत्रतत्रावशेषैः पंचाशीतिजीवितंतत्रजाते ५ क्रूरभवनेषुपापैः सौम्यक्षेत्रेषुसंस्थितैः
सौम्यैः लग्नेशेस्ववलाढ्येजातः परमायुराप्नोति ६ यद्दिनेनगोभौमः सार्कः होरांगतोप्रसवकाले केंद्रेचामरपूज्ये प्राणिजातोऽत्रवर्षशतं ७ केंद्रत्रिकोणभवनेषुनयस्यपा
पाः लग्नाधिपः सुरगुरुश्चचतुष्टयस्थः भुंक्तेसुखानिविविधानिसुपुण्यकर्माजीवेच्चवत्सरशतंसविमुक्तरोगः ८ चरांशकस्थाः कविमंदभौमाः स्थिरांशकस्थारविदेवपूज्यौ
शेषौतुयुग्मभवनांशकसंप्रयुक्तौदीर्घायुरत्रजननेपुरुषोनृपालः ९ ओजांशकस्थितशुभाः सुखधर्मसंस्थाः पापास्तुयुग्मभवनांशकलाभसंस्थाः चंद्रोविलग्नभवनेयदिपू
र्णरश्मिर्जातोत्रवर्षशतमायुररोगिताच १० मृगवदनपश्चिमार्द्धेभूनंदनचंद्रसंयुतेलग्ने केंद्रगतेसुरेज्येजातोजीवेच्चवर्षशतं ११ स्वोच्चेलग्नेभृगुजेसौम्यैर्दृष्टेमेचंद्रे सूर
मंत्रिणिकेंद्रगतेजातः शतंजीवितोभवति १२ वीरजातके लग्नाधिपोवलीकेंद्रेनदृष्टः पापखेचरैः सौम्यैर्दृष्टश्चकुरुतेराजानंदीर्घजीविनं २ पूर्णचंद्रः सुहृद्भागेलग्नेला
भपरांगतः वलाढ्येधर्मयेमंदेवह्वायुर्जायतेतदा ३ लग्नात्षष्ठाष्टगेचंद्रोयदिकेंद्रेवृहस्पतिः जातोरोगविनिर्मुक्तः शतंवर्षाणिजीवति ४ होराप्रकाशे लग्नेचनि
धनेशून्येचंद्रेवीर्यान्वितेगुरौ शुभस्थानस्थितैः शेषैर्जन्मविद्याच्छतायुषः १ जीवेलग्नेशुभेः केंद्रेनिधनेग्रहविवर्जिते लग्नचंद्रौनदृष्टौचेत्पापैर्जीवतिसप्ततिं २ सौ मः
म्यारव्योस्तत्तमेचंद्रेलग्नेजातोत्रषष्टिकः भृगोगुरौचकेंद्रस्थेजीवेद्वर्षशतंनरः ३ जीवांशस्थाः सकलग्रहेंद्राः केंद्राश्रिताधर्मधनाश्रितावाजातोनरस्सत्र[illegible]नः सर्वास्
युगांतमायुर्वहुशास्त्रकर्ता ४ मंदांशकस्थारविभौमजीवाधर्माश्रिताः कर्मयुतावलाढ्याः राश्यावसानेहिमगौविलग्नेयुगांतमायुः श्रियमाप्नोति ५ धन[illegible]र्थ

मेगतस्क्यस्यभौमांशकस्थेहिमगौत्तद्दृष्टे मुनीश्वरोयंमुनियोगजातः शास्त्रादिकर्त्तायुगमायुरेव ६ अक्षीणचंद्रेसहृदुच्चभागेलाभाश्रितेलग्नमुपागतेन धर्मेस्वसेसूर्यसु
तेवलाढ्येजातोयुगायुर्मुनिवल्लभःस्यात् ७ अतिदीर्घकालयोगेजातोपिजितेंद्रियोभूत्वा दिव्यौषधिप्रयोगात्कगांतमायुस्तथाजीवेत् ८ सिद्धसेनःमोक्षपरमाशम
नेसौम्ये २ गविपंचवर्ग २५ लिप्तस्थे शेषैः परमोच्चगतैःजातः परमायुरामोतिवराहः गुरुशशिसहितेकुलीरलग्ने शशितनयेभृगुजेचकेंद्रयाते भवरिपुसहजोपगैश्च
शेषैरमितमिहायुरनुक्रमाद्विनास्यात् अनुक्तमाङ्गणितक्रमात् अथमातृरिष्टकः केंद्रत्रिकोणगः पापोमातृहासप्तवासरात् सपापोभार्गवात्पापोहि[illegible] मातृनाश।
[illegible] चंद्राच्चतुर्थगः पापोयदिस्याद्बलवत्तरः तदामातृवधंकुर्यात्केंद्रेह्यपरोयदि चंद्राद्दृष्टमगेभौमेशत्रुस्थेवाशुभेक्षिते मातातस्यविनश्येतपितातस्यविदेशगः निशि
चंद्रात्त्रिकोणस्थेमंदेपापनिरीक्षिते दिवाशुक्रात्तथाभौमेजननीम्रियतेध्रुवं निधनारिगतेचंद्रेभौमश्चेत्सप्तमोयदि माता तस्यविनश्येतयदि पापसमन्वितः वृद्धगर्गजा
तके चंद्रमायदिपापानांत्रितयेनप्रदृश्यते मातृनाशोभवेत्तस्यशुभदृष्टेशुभंवदेत् १ धनेराहुर्बुधशुक्रःसौरिःसूर्योयदास्थितः तस्यमातुर्भवेन्मृत्युःमृतेपितरिजायते
२ पापात्सप्तमरंध्रस्थेचंद्रेपापसमन्विते वलिभिःपापकेदृष्टेजातोभवतिमातृहा उच्चस्थोवाथनीचस्थोसप्तमस्थोयदारविः पानहीनोभवेद्बालस्त्वजाक्षीरेणजीव
ति ४ चंद्राच्चतुर्थगःपापोरिपुक्षेत्रेयदाभवेत् तदामातृवधंकुर्यात्केंद्रेयदिशुभानचेत् ५ द्वादशेरिपुभावेच यदापापग्रहोभवेत् तदामातुर्भयंविद्याच्चतुर्थेदशमेपि
तुः ६ लग्नेक्रूरोव्ययेक्रूरोधनेसौम्यस्तथैवच सप्तमेभवनेक्रूरःपरिवारक्षयंकरः ७ लग्नस्थेचगुरौसौरेधनेराहौतृतीयगे इतिचेज्जन्मकालेस्यान्मातातस्यनजीवति।
८ क्षीणचंद्रात्त्रिकोणस्थैःपापैःसौम्यविवर्जितैः मातापरित्यजेद्बालमाषण्मासान्नसंशयः ९ एकांशकस्थौमंदारौयत्रतत्रस्थितौयदा शशिकेंद्रगतौतौवाद्विमा।
तृभ्यांनजीवति १० अथपितृरिष्टं लग्नेसौरीमंदेभौमःषष्ठस्थानेचचंद्रमाः इतिचेज्जन्मकालेस्यात्पितातस्यनजीवति १ लग्नेजीवोधनेमंदरविभौमबुधास्तथा स्ववि
वाहसमयेतस्यबालस्यम्रियतेपिता २ सूर्यःपापेनसंयुक्तःसूर्योवापापमध्यगः सूर्यात्सप्तमगःपापस्तदापितृवधोभवेत् ३ सप्तमेभवनेसूर्यःकर्मस्थेभूमिनंदनः
राहुर्व्ययेन्वयस्यैवपिताकष्टेनजीवति ४ दशमस्थोयदाभौमःशत्रुक्षेत्रसमाश्रितः म्रियतेतस्यजातस्यपिताशीघ्रंनसंशयः ५ रिपुस्थानेयदाचंद्रोलग्नस्थानेशनैश्चरः॥

कुजश्चसप्तमेस्थानेपितातस्यनजीवति ६ भौमांशकस्थितेभानौस्वपुत्रेणनिरीक्षिते प्राग्जन्मनोनिवृत्तिःस्यान्मृत्युर्वापिशिशोःपितुः ७ पातालेचांबरे ७।१० पापोद्वादशेच
यदास्थितः पितरंमातरंहत्वादेशाद्देशांतरंव्रजेत् ८ राहुजीवौरिपुक्षेत्रेलग्नेवाथचतुर्थके त्रयोविंशतिमेवर्षेपुत्रस्तातंनपश्यति ९ भानुःपिताचजंतूनां चंद्रमामातथैवच
पापदृष्टियुतोभानुःपापमध्यगतोपिवापितृरिष्टंविजानीयाच्छिशोर्जातस्यनिश्चितं भानोःषष्ठाष्टमर्क्षस्थैःपापैःसौम्यविवर्जितैः ११ चतुरस्रगतैर्वापिपितृरिष्टंविनिर्दिशे
त् भौमस्सूर्यात्मजोशुक्रात्सुतभेधर्मभेपिवा १२ नेक्षितोगुरुशुक्राभ्यांनेक्षितोपितरंशिशुः भाग्यबंधुगतौपापौलग्नेशोबलवर्जिते १३ सूतिकालेपितादुःखीशिशोरिष्फाष्टमे
पिवा अर्कांशकस्थितेमंदेसूर्येणैवनिरीक्षिते १४ जन्मकालेपितारोगीकुजदृष्टेथवासुते दशमस्थोयदासूर्यःसौरिर्वापद्दिवाकुजः तदाधनक्षयंविद्यात् पितातस्यन
जीवति १५ रुधिरशनैश्चरदृष्टेदिवाकरेदिवजन्मनिरतस्य पापयुतोवाहन्यात्पितरंनिःसंशयंजातः १५ सूर्यादष्टमराशौयदिशुक्रःसौरलोहितौप्रसवे सौम्यादृष्टोप
सुभंकुर्यातांमृत्युमेवपितुः १६ द्वितीयेद्वादशेवापिपंचमेनवमेपिवा भौमभान्वर्कजाहंतिपितरंनचसंशयः १७ तातांबिकामातुलसोदरांश्चमातामहीमातृपितुश्चस
तं सूर्यादिखेटाःखलुपंचमस्थानिघ्नंतिसर्वेक्रमशःप्रसूतौ १८ रुधिरसहितश्चसौरिश्चभवनेरात्रिजन्मनिरतश्च कथयतिपितरमतीतंपरदेशान्नात्रसंदेहः १९ य
त्रस्थःतत्रस्थःस्वपुत्ररुधिरांगसंयुतःसूर्यः प्राग्जन्मतोनिवृत्तंकथयतिपितरंप्रसूतसमात्ररिष्टंतुचंद्रेणज्ञात्वैवंपूर्ववद्वदेत् अथपित्रोरिष्टभंगः सौम्यांतरगतैःपापैः
शुभैःकेंद्रत्रिकोणगैः सद्योनाशयतेरिष्टंतद्भावोत्थंफलंनतत् चतुर्थेदशमेपापःसौम्यमध्येयदाभवेत् पितुःसौख्यकरोयोगःशुभैःकेंद्रत्रिकोणगैः २ जायास्था
नेयदाकेतुश्चंद्रोवाचंद्रजोपिवा मित्रस्थानेयदासूर्योदीर्घायुर्जायतेपिता ३ सौरिकुजौशुभवर्गेभवतोयदिजन्मसमयेपि मातृवधाख्यंदोषंकुरुतैनैवमुनिभिरु
क्तं ४ जननीजन्मवधाख्यादोषाःपूर्वंसुभाषिताःविलयंयांतिनिःकामंसूर्यसुतेलाभभवनस्थे ५ तिग्मरुचिःकिलकुरुतेप्रियमेवात्पराशिगेभानुः मेषमृगमी
नसिंहेषुभदोषापहारकःकथितः ६ बलीकेंद्रोपगःसौम्यःनिधनेशविवर्जितःअरिष्टयोगान्नश्यंतियथाग्नौतूलराशयः ७ गुरुभौमौयदायुक्तौगुरुदृष्टोथवाकु
जः हत्वारिष्टमशेषंचजनन्याःशुभकृद्भवेत् ८ लग्नाच्चतुर्थेयदिपापखेटःकेंद्रत्रिकोणेसुरराजमंत्री कुलद्वयानंददकरःप्रसूतोदीर्घायुरारोग्यसमन्वितश्च इतिपि

त्तोरिष्टः अथरिष्टभंगोनिरूप्यते सारावल्यांसंभूतारिष्टाख्याभंगास्तेषांभवेद्यथायोगैः नानागमानांवस्थेप्रधानभूतायतस्तत्र १ उडुपतिंकृतरिष्टावांभगस्तावन्निरूप्य
तेसम्यक् शेषाणामपिपश्चाद्यथामतंब्रह्मपूर्वाणां २ सर्वैर्गगनभ्रमणैर्दृष्टश्चंद्रोनिवारयति आपूर्यमाणमूर्तिर्यथानृपःस्वंनयद्वेषी ३ चंद्रः संपूर्णतनुःशुक्रेण
निरीक्षितःस्फहृद्भावे कष्टहरणंश्रेष्टोवातहरणंयथावस्तिः ४ परमोच्चेशिशिरतनुर्भृगुतनयनिरीक्षितोहरति कष्टसम्यग्विरेकवमनंपित्तकफान्वियथाशेषात् ५
चंद्रः शुभवर्गस्थःक्षीणोपिशुभेक्षितोहरतिरिष्टं जलमिवमहातिसारंजातीफलवल्कलक्वथितं ६ सप्तमाष्टमंषष्ठस्थाःशशिनःसौम्याःहरंतिकष्टफलं पापै
रमिश्रचराःकल्याणघृतंयथोन्मादं ७ युक्तःशुभफलदाभिर्भिरिंदुःसर्वैर्निहंतिकष्टानि तेषामेवत्र्यंशेलवणमिश्रंघृतंनयनशूलं ८ आपूर्यमाणमूर्तिर्द्वाद।
शभागेशुभस्थोयदिचंद्रः रिष्टंनयतिविनाशंतक्राभ्यासोयथागुदजान् ९ क्रूरभवनेशशांकोभवनेशनिरीक्षितस्तदनु वर्गेरक्षतिशिशुंप्रजातंकृपणाइ
वधनंप्रयत्नेन १० जन्माधिपतिर्बलवान् सुहृद्भिर्वीक्षितःशुभेभागे रिष्टस्यकरोतिविनाशंभीरुरिवप्राप्तसंग्रामः ११ सौम्यक्षेत्रेचंद्रोहोरापतिनाविलोकितोहंति।
रिष्टंनवीक्षितोन्यैःकुलांगनाकुलमिवान्यगता १२ लग्नाधिपतिर्लग्नेदृष्टःसर्वैर्विनाशयतिनूनं हंतिनिशाकररिष्टंसिंहइववनेगजंमत्तं १३ स्वोच्चस्थःस्वगृहेथ
वापिसुहृदांवर्गेथसौम्यस्यवासंपूर्णःशुभवीक्षितःशशिधरोवर्गेस्वकीयेथवा १४ शत्रूणामवलोकनेनपतितःपापैरयुक्तेक्षितः रिष्टंहन्तिसुदुस्तरंदिनपतिःप्रा।
लेयराशियथा १५ शशिन्यतर्बुधसितयोरायेक्रूरेथवाक्यतोगगने दुरितंचातुर्थिकइवनश्यतिमुनिःकुसुमरसैः १६ लग्नेश्वरस्यचंद्रः षड्भिर्दृशायेषुशुभदृष्टः क्ष
पयतिसमस्तरिष्टाननुपातोनिरुपरोधइव पक्षेसितेजन्मयदिक्षपायांकृष्णेथवाहनिशुभाशुभदृश्यमानः तंचंद्रमारिपुविनाशगतोपियत्नाद्दापत्सुरक्षतिपितेव
शिशुं नहंति १८ सर्वानिमानतिबलःस्फुरदंशुजालोलग्नोपगःप्रशमयेत्सुरराजमंत्री एकोबहूनिदुरितानिसुदुस्तराणिभक्त्याप्रयुक्तइवशूलधरप्रणामः २० सौ
म्यग्रहैरतिबलैर्विबलैश्चपापैर्लग्नेचसौम्यभवनेगुरुदृष्टियुक्ते सर्वापदाविरहितोभवतिप्रसूतः पूजाकरःखलुयथादुरितंग्रहाणां २१ पापायदिशुभवर्गेसौम्यैर्दृष्टाः
शुभांशवर्गस्थैः विनिहंतितदारिष्टंपतिंविरक्तायथायुवतिः २२ राहुस्त्रिषष्ठलाभेलग्नात्सौम्यैर्निरीक्षितः सद्योनाशयतिदुरितंमारुतइवतूलसंघातं २३ शीर्षोदयेषुरा

शिशुसर्वेगगनादिराशिभिः सुतोप्यहतिस्थैश्चारिष्टंविलीयतेघृतमिवाग्निस्थं २४ तत्कालेयदिविजयीशुभग्रहः शुभनिरीक्षितोवश्यं सजयतिसर्वारिष्टान्मारुतइ।
वपादपान्प्रबलः २५ परिविष्टोगगनचरः क्रूरैस्तुविलोकितोहरतिपापं स्नानंसन्निहितायांयथाकृतंभास्करग्रहणे २६ उदयेगस्त्यस्यमुनेः सप्तर्षीणांसर्वारिष्टंन।
श्यतितमइवसूर्योदयेजगति २७ अजवृषककर्कटलग्नेरक्षतिराहुः समस्तपीडाभ्यः पृथ्वीपतिः प्रसन्नः कृतापराधंयथापुरुषं २८ मारयतिभंगमपरः सरोजज।
न्मापिविस्मयंकुरुतेभंगयतिकष्टमरिष्टंसमतद्देशेयथाकलभः २९ वहवोयदिवलयुक्तायोगास्तत्राभिमज्यतेरिष्टं सूर्योत्रिकोणमिंदोर्यथाह्रियात्रानरेंद्रस्य ३०
एतेसर्वेभंगाः मयानिरुक्ताः पुरातनाः सिद्धाः येत्तौतेर्दैवविदोनरेंद्रवाल्लभ्यमायाति ३१ माण्डव्यजातके लग्नाधिपोपिवलवानशुभमित्रदृष्टः केंद्रस्थितैः शुभख।
गैरवलोक्यमानः मृत्युंविधूयविदधातिसदीर्घमायुः सार्धंगुणैर्बहुभिरूर्जितयाचलक्ष्म्या १ लग्नादष्टमभवनेगुरुबुधभृगुद्रेष्काणगश्चंद्रः षष्ठस्थोवापिशिशुं।
परिरक्षत्यपनिर्व्याजं २ चंद्रः संपूर्णतनुः सौम्यर्क्षगतः स्थितः शुभस्यांशे प्रकरोतिरिष्टभंगंविशेषतः शुक्रसंदृष्टः बुधभार्गवजीवानामेकतमः केंद्रमागतोपिव।
लवान् यद्यक्रूरसहायः सद्योरिष्टस्यभंगाय ४ सौम्यद्वयांतर्गतः संपूर्णः स्निग्धमंडलः शशिभृत् निःशेषरिष्टहंताभुजंगलोकस्यगरुडइव ५ प्रस्फुरत्किरणजा।
लस्निग्धमंडलोपेतसुरमंत्रिणिकेंद्रगतेसर्वारिष्टंनाशमुपैति ६ सौम्यभवनोपयाताः सौम्यांशकसंभवद्रेष्काणस्थाः गुरुकाव्यचंद्रशिजाः सर्वेरिष्टस्यहंतारः
७ चंद्राध्याश्रितराशेरधिपः केंद्रेशुभग्रहोपिवा प्रशमयतिरिष्टमखिलपापानियथाहरिस्मरणं ८ ग्रंथांतरे एकोपिकेंद्रभवनेनवपंचमेवाभास्वन्मयूख
विमलीकृतदिग्विभागे निःशेषदोषमपहृत्यसुखंप्रभूतिर्दीर्घायुषंविगतरोगभयंकरोति १ यदायामिनीशोदिमेशप्रपश्येद्बुधोमाहवेदीश्यतेयामिनी।
शोतदापीदैववेदीकिमर्थंविमृश्येत्सुखीदीर्घजीवीभवेज्जातकश्च २ होरासारे व्ययस्थानेयदासूर्यः तुलालग्नेतुजायते जीवेत्सशतवर्षाणिदीर्घायुर्बालको।
भवेत् १ कश्यपः एकोपिज्ञार्यशुक्राणांलग्नात्केंद्रगतोयदि अरिष्टंनिखिलंहंतितिमिरंभास्करोयथा २ एकएवबलीजीवोलग्नस्थोरिष्टसंचयं हंतिपा
पक्षयंभक्त्याप्रणाममिवशूलिनः ३ एकएवहिलग्नेशकेंद्रसंस्थोबलान्वितः अरिष्टंनिखिलंहंतिपिनाकीत्रिपुरंयथा ४ शुक्लपक्षेक्षपाजन्मलग्नेसौम्य

निरीक्षिते विपरीतं कम्लपसेतथारिष्टविनाशनः ५ यस्य जन्मनि तुंगस्थाः स्वक्षेत्रस्थास्तथाग्रहाः। निरायुषं शिशुं जातं कुर्वेत्यष्टमगा यदि ६ यवनः एकोपि यदि केंद्र
स्थः शुक्रो ज्ञो वा गिरांपतिः नवमे वा सुतस्थाने सर्वारिष्टं विवारयेत् अत्रारिष्टकर्तृ अरिष्टभंगकर्तृग्रहाणां विशेषबलं चेत्कलर्व्यं इत्यरिष्टभंगाध्यायः अथ राजयो
गाः तत्र वराहः वक्रार्कजार्कगुरुभिः सकलैस्त्रिभिर्वा स्वोच्चेषु षोडश नृपाः कथितैकलग्ने द्व्येकाश्रितेषु च तथैकतमे विलग्ने स्वक्षेत्रगे शशिनि षोडश भूमिपाः स्युः अत्रतात्प
र्यार्थः सूर्ये मेषे उच्चे १ भौमे मकरे २ गुरुः कर्के ३ शनिस्तुलायां एषां मध्ये द्वेको लग्नस्थस्तदा राजयोगचतुष्टयं अथैषां मध्ये यदि त्रय एते उच्चे तं मध्यादेकः कश्चिदेव
लग्नगतस्तदा द्वादश योगा भवंति यथा एको लग्नगतः त्रयः स्वोच्चे सूर्यभौमगुरवः तदा राजयोगत्रयं परस्परं क्रियमाणा नव राजयोगाः यथा सूर्ये भौमशनिभिः उच्चगैस्त्रयः सूर्य
गुरुशनिभिस्त्रयः भौमगुरुशनिभिस्त्रयः एवं षोडशेत्यर्थः तथा च चतुर्णां मध्ये द्वाभ्यामेकेनाश्रितेषूच्चेषु एकस्मिंश्च लग्नगे चंद्रे स्वक्षेत्रगे सति षोडश नृपाः तत्र चतुर्षु पूर्वोक्ता।
द्विशादिभेदाः षट् यथा रविभौमौ १ रविगुरू २ रविशनी ३ भौमगुरू ४ भौमशनी ५ गुरुशनी ६ अनयोरेकस्य लग्नस्थानवशेन द्विविधं यथा सूर्य उच्चे मेषलग्ने तिष्ठति भौ
मः मकर एव १ भौमो मकरलग्ने उच्चे तिष्ठति सूर्यो मेष एवेति द्विविधमेव षण्णामपि द्वादशभेदाः तथा सूर्ये मेषे उच्चे लग्ने कोप्ययोगः एवं भौमादयोप्येकाकिन एव राजयोगत्रयकराः।
एवं षोडशयोगाः इत्यर्थः त्रिप्रभृतिभिरुच्चस्थैः नृपवंशभवाः भवंति राजानः पंचादिभिरन्यकुलोद्भवाश्च तद्वत्त्रिकोणगतैः अत्र विशेषमाह यवनः पापैः पापमतिः
स्यात्स्वोच्चगतैः धर्मवित्तमः सौम्यैः व्यामिश्रैर्मिश्रमतिः पृथ्वीशो जायते मनुजः जीवशर्मा तु पापैरुच्चगैर्नृपो न भवति किंतु वित्तान्वितो भवतीत्याह पापैरुच्चगतैर्जातानभ
वंति नृपा नराः किंतु वित्तान्वितास्ते स्युः क्रोधनाः कलहप्रियाः इति अथ द्वाविंशतिराजयोगानाह वर्गोत्तमगते लग्ने चंद्रे वा चंद्रवर्जितैः चतुराद्यैर्ग्रहैर्दृष्टे नृपा द्वाविंशतिः स्मृ
ताः व्याख्या अत्र चंद्रवर्जितैरिति वचनात्षडेव ग्रहाः उपयुज्यंते तत्र षट्सु ग्रहेषु येके च न चत्वारश्चेत् लग्नं पश्यंति तदा पंचदशभेदाः भवंति पंच चेल्लग्नं पश्यंति षट् षट्
चेत्पश्यंति तदैक एवेति द्वाविंशतिराजयोगा एव एवं चंद्रस्यापि चतुरादिग्रहवशेन द्वाविंशतिराजयोगाः एवं चतुश्चत्वारिंशद्राजयोगा भवंति यवनजातके केंद्रलग्नप
तिर्महोत्तमबलः केंद्रस्य खेटे न चेत् कुर्यान्मथुशिलं सयस्य जनने कुर्यान्नृपाणां नृपं सेनायानसमुत्थरेणुपिहिते सूर्ये दिवे वांगनाक्रीडार्थं प्रियसंगमाय मुदिताः स्यु

भूषणेतत्पराः मांडव्यजातके लग्नेउच्चपदेगतोदिनपतिश्चंद्रेधनस्थेभृगौदुश्चिक्येचतमोयुतेसुखयुतेजीवेव्ययस्थेवुधेलाभेसूर्यसुतेहिकर्मभवनेजातेनुक्ष्मातले
जातोयंखलुमानवोनृपगुणैस्सम्राट्पदंगच्छति १ वृषेविलग्नेयदिपूर्णचंद्रेपराक्रमस्थेसुरनाथपूज्ये संतानभावेशशिपुत्रयोगेषष्टेस्थितेसूर्यसुतेविलग्नात् एवं
हियोगेसुखगेहिसूर्येजायागतेवासुतगेचशुक्रेतमः कुजोकर्मगतोसवीर्योजातः पृथिव्यांखलुवासुदेवः श्लोकद्वयेनायंयोगः कन्याविलग्नेवुधजीवशुक्राधन
स्थितेसूर्यसुतेसवीर्ये तृतीयभावेयदिभूमिपुत्रेजातः पृथिव्यांखलुवासुदेवः ३ भौमेमंदयुतेहिनक्रमतनौसंप्रस्थितेजन्मनिकर्मस्थेरविनंदनेसहजगेशुक्रे
सुखस्थेवुधे क्रूराः षष्टगताहिसप्तमगतेजीवेसवीर्येतदाजातोयंविवुधाधिपोवलरिपुः पृथ्वीगतोजंतुषु ३ उच्चस्थानगतोहिकश्यपसुतोभौमेनचेत्संयुतः सर्वैरेखव
लैर्महावलयुतोजन्माधिलग्नेभवेत् जायाभावगतेशनौसुखगतेवाचस्पतौचंद्रजेचंद्रेणैवयुतेधनेसहजगेराहौ तदावृत्रहा ५ राहौमूर्तिगतेचउच्चपदवीकर्मस्थितेभा
र्गवे चंद्रेद्रव्यगेगुरौव्ययगतेवृश्चिकगेभास्करे पुत्रस्थेरविनंदनेनिधनगेचंद्रात्मजेभूतलेजातोयंखलुमानवोनृपगणैस्सम्राट्पदंगच्छति ६ देवाधीशगुरौहिउ
च्चपदवीमास्थितेलग्नगेजायाभावगतेकुजेधनगतेसूर्यात्मजेसौख्यगे शुक्रेकर्मगतेरवौव्ययगतेराहौचलाभंगते चंद्रेसौम्ययुतेतदाक्षितितलेजातोभवेद्राज्यभाक्
७ सूर्येलग्नगतेस्वकीयभवनेद्रव्यस्थितेसोमजेवृश्चिकेभृगुनंदनेसुखगतेभौमेसुतेवाकपौषष्ठेवारविनंदनेशशधरेजायास्थितेलाभगेराहौवाधरणीगजो
द्भिवस्तदाजातोनृपाणांप्रभुः ८ तुलाविलग्नेयदिचंद्रयुक्तेशुक्रेतदाकर्मगतेगुरौच कुजेशुभेलाभगतेव्ययेचवुधेतदासौभवितानृपोत्तमः ९ अलियुते
यदिलग्नगतेकुजेधनगतेनृपः १० धनुषिलग्नगतेगुरुसंयुतेवुधयुतेयदिकर्मणिचंद्रमाः शनियुतेयदिभार्गवआयगेधनगतेपिकुजेधरणीपतिः ११
कुंभेजन्मनिलग्नगेगुरुयुतेद्रव्यस्थितेभार्गवेदुश्चिक्येपद्मुमणौव्ययेयदिकुजेचंद्रेणयुक्तेवुधे सौख्यस्थेयदिपुत्रभावविगतेराहौतदामानवोजातोयंजग
तीतलेनृपगतोसंपूजितोवृत्रहा १२ शुक्रेश्चागुरुसंयुतोथमंदमितिचेन्मीनेयदालग्नगेदुःश्चिक्येवुधसंयुतेशशधरेलाभस्थितेभूसुते १२ राहौसप्तमगेशनौव्य
यगतेसूर्येधनस्थेनरोजातोयंनगतीतलेविजयवानराज्ञांहिचूडामणिः १३ कर्मस्थितासोमजशुक्रजीवानालग्नगताः सर्वबलेश्चयुक्ताः षष्ठेश्चवालाभगता

श्च पापाश्चंद्रोयस्य तुंगपदे नृपोयं १४ केंद्रेतु सौम्याः सवलाश्च सौम्यस्वकीयभावे यदि स्वोच्चसंस्थे त्रिषष्ठलाभोपगताश्च पापाः जातः पृथिव्यां जगदेकनाथः [illegible] लग्नस्थितो चंद्रज
मार्गवौ वलैर्धनस्थिते देवगुरौ व्यये रवौ जायास्थिते रात्रिपतेस्वकीये त्रिषष्ठलाभेषु खलानृपोयं १५ कर्मसौख्यसुतधर्मगाः शुभाश्चेद्जीवबुधभार्गवाः क्रमात् लाभसहजस्थि
ताः खलाश्चारुसौख्यसहितो महीपतिः १६ लग्नगे स्फुरगुरुश्च सप्तमश्चेंदुजः शशियुतोहि भार्गवः सौख्यभावविगतो महीसुतः कर्मगो नृपकुले महावलः १७ लग्नसौम्ययु
तोहि उच्चपदवीमासंस्थितो रात्रिपः कर्मस्थे रविजे तमोधनगतो लाभे गुरुर्द्वादशे १८ सूर्येकर्मगते कुजे भृगुसुते लाभेथवा कर्मगे जातो भूमिगतीपतिः खलु नरो मत्तेभसे
न्यैर्युतः १८ लग्नेसौम्यो युवतिसहितः कर्मगः सैंहिकेयो लाभे जीवो भृगुजरविजौ चेद्धनस्थौ भवेतां पुण्ये चंद्रो व्ययस्थः खलदिवसपतिर्भ्रातृगो भूमिपुत्रः योगेजा
तः परमवलयुतः फाल्गुनेवा नृपोयं १९ कर्मस्थिते ऽवनिसुते हि सुते च चंद्रो धर्मस्थितावुधबृहस्पतिदैत्यपूज्याः षष्ठत्रिलाभविगता खलु पापसंज्ञा जातो धनाधिप
तिरत्र हि धर्मराजः २० लग्नारूढा गुरुभृगुतमसश्चारवो दीप्यमानाः पुत्रस्थो वै खलु रविसुतः सोमसंस्थश्च चंद्रः सौख्यस्थाने सकलवलयुतश्चेंद्रजः [illegible] भौमौ भ्रा
तृस्थाने सकलवलयुग्भीमसेनो नृपोयं २ कुंभेलग्ने धनस्थे यदि च भृगुसुतः पूर्णवीर्ये हि सूर्ये राहौ जातः सुखस्थाः शशिसितशशिजाः कर्मगो भूमिपुत्रः धर्मस्था
ने रविसुतयुते सैंहिकेये च लाभे देवाचार्ये सकलवलयुते जायते कौरवेशः २२ लग्नेसौख्यत्रिधनेषु संस्थिता जीवसौम्यशशिभार्गवाः क्रमात् लाभषष्ठविगता खलावला
जायते च मनुजो नृपोत्तमः २३ लग्नद्व्ययभावगा वलाढ्या शुक्रजीवशशिनंदनः क्रमात् सप्तमे यदि निशाकरो भवेल्लाभषष्ठत्रिषु पापखेचराः २४ कर्मभावमभिगम्य
पावनः सौख्यभावमपि सौम्यमूर्तयः संस्थिता यदिह सप्तमे शुभा जायते जगति राजशेखरः २५ सर्वेषु केंद्रेषु गताहि सौम्याः सुदीप्तदेहा न खलैश्च दृष्टाः लाभारिदु
श्चिक्यगताश्च पापाः जातः पृथिव्यां खलु राजराजः २६ लग्नस्थे स्फुरपूजिते हि सवले उच्चस्थिते संमिते जायाभावगते भृगौ हि सवले पापास्त्रिषट्लाभगाः अन्ये द्वादशवित्तभा
वविगताः योगाधिराजे जनो जातोयं धरणीं प्रशास्ति नृपतिर्हीनोपि वंशोगतः २७ कर्मस्थाने भूमिपुत्रः उच्चवर्ती विशेषतः मूर्तिस्थाने सुरगुरुर्जायते पृथिवीपतिः २८ सकलकें
द्रगताः शुभखेचराः सकलवीर्ययुताश्च विशेषतः अरिपराक्रमगाः खलखेचराः मुनिवरैः कथितो नृपवल्लभः २९ सकलसौम्यगताश्च निजोच्चगास्तनुधनात्म[illegible]

गतामलाः अरिपराक्रमलाभगताखला विजयतेजगती परमायुषः ३० निर्वाणाधिपपूजितो भृगुयुतो लग्नस्थितः कर्मगो भूपुत्रः शशिसंयुतो धनयुतो वोच्चगतश्च खले स्मृता।
लिशशिनंदने व्ययगते क्रूरे तथा सप्तमे जातोयं खलु हीनवंशविभवो राजाधिराजो भवेत् ३१ लाभे जीवे सकलबलयुते तुंगयाते सवीर्ये लग्नस्थाने भृगुसुतविधौ राहुणा वा विशेषे द्रव्यशी
र्व्ययपरिगते भास्करे सप्तमस्थे चंद्रे भौमे मित्रसंस्थे सकलबलयुते चक्रवर्ती नृपोयं ३१ कर्मे जीवे वियति धनुषि चंद्रयुक्ते विशेषे लाभे भौमे व्ययस्थे दिनकरतनये लग्नसंस्थे।
हि शुक्रः द्रव्ये याते सकलबलयुते भास्करे सौख्यभावे याते राहौ सकलबलयुते लोकनाथो नृपोयं ३२ कर्मस्थाने धरणितनये सप्तमस्थे सुरेज्ये लाभस्थाने भृगुशशिसुते जाय चक्रव
र्ती ३३ बस्याधिजन्मनि खेचरोपरिपूर्णवीर्ये तुंगे स्वकीयभवने सकलाश्च सौम्याः तुंगस्थिता विविधभावमता विपापाः षष्ठाष्टभावरहिताय दिराजराजः ३४ सिंहे लग्ने भानुसौम्ययुक्ते द्रव्यस्था
ने चंद्रपुत्रः सवीर्यः भ्रातृस्थाने सूर्यजे चैव मोक्षे जीवशुक्रे राजराजो धनेशः ३५ सारावल्यां उदयगिरिनिविष्टे मेषसंस्थे ग्रहेंद्रे शशिरुधिरसुरेज्यैर्जायते पार्थिवेंद्र त्रिजलधिरसना
थाः पालकोयश्च भूमेः स्मरिपुपरिवारः सर्वतः स्फूर्तकीर्तिः १ स्वोच्चेगुरावथकुजेक्रियते विलग्ने मेषोदये थ सकुजे च वसामधीशः भूयान् महीभृदिह यस्य रिपक्षसैन्यतिष्ठे।
न्न जातु पुरतो भुवि भूमिपस्य २ निशाभर्त्ता चापभृगुतनये देवपूज्ये सहितः कुजः प्राप्तः स्वोच्चे भृगुमुखगतः सूर्यतनयः विलग्ने कन्यायां शशिसुकरसुतर्यदि भवेतदा वै स राजा भवति
बहुविज्ञानकुशलः ३ स्वर्क्षे नक्षत्रनाथः स्फुटकरनिकरालंकृतः शाङ्गिलग्ने द्यूने सोमस्य पुत्रो यदि रिपुभवने भास्करः संप्रयातः पाताले दानवेज्ये गुरुरपि गगने सौरभौमौ तृतीये स्याद्
मन्वितं च ८ सू· चं· बु· बृ· श· रवींदुसौम्यासुरपूज्यसौरा लाभाश्रिताः संजनयंति मर्त्यं नानामहेंद्रैः सहितं सुदानं गुणानुरक्तं सुधनैः समेतं ९ सू· चं· बु· शु· श· सूर्येंदु
जीवासुरपूज्यसौरा लाभाश्रिताः संजनयंति मर्त्यं गुणान्वितं प्रीतिकरं सुनेत्रं प्रियागमं कीर्तिसमन्वितं च १० सू· चं· बृ· शु· श· सूर्यारसौम्यामरपूज्यशुक्रा लाभाश्रिताः
संजनयंति मर्त्यं मातापितृभ्यां निरतं मनोज्ञं विचक्षणं क्षांतिसमन्वितं च ११ सू· मं· बु· बृ· शु· सूर्यारसौम्यामरपूज्यसौरा लाभाश्रिताः संजनयंति मर्त्यं कुलप्रधानं प्रणता
रिपक्षं सुशीलभाजं वहुधर्मरक्तं १२ सू· मं· बु· बृ· श· सूर्यारसौम्यासुरपूज्यसौरा लाभाश्रिताः संजनयंति मर्त्यं व्रतोपवासामरविप्रभक्तं दानान्वितं सत्यदयासमेतं १३
सू· मं· बु· शु· श· सूर्यारजीवासुरपूज्यसौरा लाभाश्रिताः संजनयंति मर्त्यं प्रभासमेतं वहुशास्त्ररक्तं गुणान्वितं शौचपरं सदैव १४ सू· मं· बृ· शु· श· सूर्यारजीवासुरपूज्य १७९
सौरा लाभाश्रिताः संजनयंति मर्त्यं विद्यासुरक्तं गुरुदेवभक्तं परैर्विमुक्तं सुधियासमेतं १५ सू· बु· बृ· शु· श· चंद्रारसौम्यामरपूज्यशुक्रा लाभाश्रिताः संजनयंति मर्त्यं

हो·र· द्यासमेतं च क्रियया समेतं प्रियंवदं वांधवपूजितं च १६ चं·मं·बु·बृ·शु· चंद्रारसौम्यामरपूज्यसौरा लाभाश्रिताः संजनयंति मर्त्यं नरेंद्रमान्यं हृषिकर्मदक्षं क्षताविपक्षं विभवैः स
१७९ देव १७ चं·मं·बु·बृ·श· चंद्रारसौम्यासुरपूज्यसौरा लाभाश्रिताः संजनयंति मर्त्यं श्रुतार्थभाजं विजितारिपक्षं महीपतिं शास्त्रविशारदं च १८ चं·मं·बु·शु·श· चंद्रारजीवासुरपू
ज्यसौरा लाभाश्रिताः संजनयंति मर्त्यं प्रभूतविद्यागुरुतासमेतं सुज्ञानुभाजं निरुजं सदैव १९ चं·मं·बृ·शु·श· चंद्रारज्ञजीवासुरपूज्यसौरा लाभाश्रिताः संजनयंति मर्त्यं वंदिसु
तं काव्यकथानुरक्तं शौर्यान्वितं धर्मपरं सदैव २० चं·बु·बृ·शु·श· भौमज्ञजीवासुरपूज्यसौरा लाभाश्रिताः संजनयंति मर्त्यं श्रद्धान्वितं भूरिधनं यशस्वं प्रभूतपुत्रान्वितभोजना।
ढ्यं २१ मं·बु·बृ·शु·श· इत्येवं पंचविकल्पजाः रवींदुभौमज्ञसुरेज्यशुक्रा लाभाश्रिताः संजनयंति मर्त्यं सौभाग्यविद्याविभवैः समेतं सदारुजं तं दृढपौरुषं च १ सू· चं·मं·बु·बृ·
शु· रवींदुभौमज्ञसुरेज्यसौरा लाभाश्रिताः संजनयंति मर्त्यं तीर्थानुरक्तं सुधिया समेतं विचक्षणं रोगविवर्जितं च २ सू· चं·मं·बु·बृ·श· रवींदुभौमज्ञमितार्कपुत्रा लाभाश्रिताः
संजनयंति मर्त्यं बहुश्रुतं कांतियुतं विधिज्ञं पूज्यं नराणां गुणसंयुतानां ३ सू· चं·मं·बु·शु·श· सूर्येंदुभौमामरपूज्यशुक्रशनैश्चराः संजनयंति मर्त्यं विप्रप्रियं देवकथानुरक्तं सु।
कीर्तनं शास्त्रविचक्षणं च ४ सू· चं·मं·बृ·शु·श· सूर्येंदुसौम्यामरपूज्यशुक्रशनैश्चराः संजनयंति मर्त्यं आरामदेवानुरतं प्रगल्भं सतामभीष्टं श्रुतकोविदं च ५ सू· चं·बु·बृ·शु·
श· सूर्यारसौम्यामरपूज्यशुक्रशनैश्चराः संजनयंति मर्त्यं सुसत्यवक्तं कुलसुप्रधानं महामतिं गीतविशारदं च ६ सू· मं·बु·बृ·शु·श· चंद्रारसौम्यामरपूज्यशुक्रशनैश्चराः संज
नयंति मर्त्यं समस्तभूपाधिपतिं प्रगल्भं प्रसादहीनं गजवाजिभाजं ७ चं·मं·बु·बृ·शु·श· इत्येवं षड्विकल्पजाः इति बृहद्यवने लाभाभावाश्रययोगाध्यायः ८ अथ व्ययभावस्थ
द्विग्रहादियोगफलम् व्ययस्थितस्तीक्ष्णकरः सचंद्रो नरं प्रसूते ल्पसुखं निराशं अल्पायुषं दानतमं विरूपं पराक्षिकृत्यं कुजनेन नित्यं १ सू· चं· व्ययस्थितस्तीक्ष्णकरः सभौ
मो नरं प्रसूते व्यथितं कृशांगं पराभिभूतं बहुपापरक्तं दुष्टस्वभावं गुणवर्जितं च २ सू· मं· व्ययाश्रितस्तीक्ष्णकरः ससौम्यो नरं प्रसूते निरुजं समेतं प्रसद्दयं क्रूरमतिं सुलुब्धं मू।
र्खं कुशीलं रणकातरं च ३ सू· बु· व्ययाश्रितस्तीक्ष्णकरः सजीवो नरं प्रसूते व्यसनाभिभूतं मलिम्लुचं रोगपरं हतं च व्यर्थश्रमं धर्मविवर्जितं च ४ सू· बृ· व्ययाश्रितस्तीक्ष्णकरः राम·
सशुक्रो नरं प्रसूते ल्पसुखं कुरूपं सुदारदारव्यसनाभिभूतं पापप्रियं कामनिपीडितं च ५ सू· शु· व्ययाश्रितस्तीक्ष्णकरः ससौरो नरं प्रसूते जनिताविरुद्धं नीचानुरक्तं कथयानुर। १७९

क्तं सुनीचकर्मणां मतिव्ययार्त्तं ६ सू. श. व्ययाश्रितो रात्रिपतिः सभौमो नरं प्रसूते कठिनस्वभावं विहीनवृत्तिं वहुक्षुद्ररक्तं भयान्वितं शीलविवर्जितं च ७ चं. मं. व्ययाश्रितो रा।
त्रिपतिः ससौम्यो नरं प्रसूते कलहैः समेतं दरिद्रमार्त्तं परपाकरक्तं सदाभयाढ्यं प्रभयाविहीनं ८ चं. बु. व्ययाश्रितो रात्रिपतिः सजीवो नरं प्रसूते निकटरवाक्यं विरूपगात्रं पु
रदेशभाजं विहीनकोशं गतसौहृदं च ९ चं. वृ. व्ययाश्रितो रात्रिपतिः सशुक्रो नरं प्रसूते निधनं व्ययार्त्तं प्रेष्यं खलं धर्मविवर्जितांगं सुनिर्घृणं कामपराजितं च १० चं. शु. व्य।
याश्रितो रात्रिपतिः ससौरो नरं प्रसूते कुकलत्रभाजं कुपुत्रधान्यान्वितमिष्टवैरं लज्जाविहीनं गतपौरुषं च ११ चं. श. व्ययाश्रितो भूतनयः ससौम्यो नरं प्रसूते विहीनतानुका
रं लज्जाविहीनं वहुरोगभाजं गतिप्रहीनं गतसत्वशौचं १२ मं. बु. व्ययाश्रितो भूतनयो सजीवो नरं प्रसूते तिविहीनकीर्तिं कामार्दितं दुःखपरंपराढ्यं व्ययातुरं वांधवपीडि
तं च १३ मं. वृ. व्ययाश्रितो भूतनयः सशुक्रो नरं प्रसूते तिधनव्यपेतं पुत्रार्दितं दानविहीनवृत्तं सदातुरं हीनरतं कृतघ्नं १४ मं. शु. व्ययाश्रितो भूतनयः ससौरो नरं प्रसूते वि
धिशास्त्रहीनं त्रस्तार्दितं नेत्ररुजासमेतं दौर्भाग्यकामोपहतं सदैव १५ मं. श. व्ययाश्रितः सोमसुतः सजीवो नरं प्रसूत करटप्रधानं सुनिर्घृणं बांधवपुत्रयुक्तं स्त्रीनिर्जितं भ्रांति
समन्वितं च १६ बु. वृ. व्ययाश्रितः सोमसुतः सशुक्रो नरं प्रसूते तिकृपाविहीनं प्रभूतशत्रुं कुधियासमेतं वैरं विवर्णं धनवर्जितं च १७ बु. शु. व्ययाश्रितः सोमसुतः ससौरो नरं प्र।
सूते वहुमाययाढ्यं सदा विवर्णं व्यसनाभिभूतं कुचैलिनं स्त्रीवशगं निराशं १८ बु. श. व्ययाश्रितो देवगुरुः सशुक्रो नरं प्रसूते पशुभृत्यहीनं रुजार्त्तदेहं हतवित्तसंघं सुनिष्ठु
रं शत्रुपराजितं च १९ वृ. शु. व्ययाश्रितो देवगुरुः ससौरो नरं प्रसूते परुषस्वभावं स्त्रीवर्जितांगं जनतासमेतं सुकातरं पापमतिं नृशंसं २० वृ. श. व्ययाश्रितो दैत्यगुरुः ससौ
रेण नरं प्रसूते परवंचकं च चरित्रहीनं सरुजं विशालं दृष्टं अटनं मित्रविवर्जितं च २१ शु. श. इत्येवं द्विविकल्पजाः सूर्येंदुभौमा व्ययगा मनुष्यं कुर्वंति नित्यं पदुपापरक्तं द्यूतप्रियं
द्रोहरतं कृतघ्नं सदातुरं ब्राह्मणदूषितं च १ सू. चं. मं. सूर्येंदुसौम्या व्ययगा मनुष्यं कुर्वंति दीनं सरुजं विवर्णं वहुश्रमं दुष्टमतिं सुलुब्धं सदेहरुक्कं कामपरं कुचैलं २ सू. चं.
बु. सूर्येंदुजीवा व्ययगा मनुष्यं कुर्वंति दुष्टानुरतं कुरूपं व्यपेतधर्मं परदूषितांगं गुणप्रहीनं मतिशास्त्रहीनं ३ सू. चं. वृ. सूर्येंदुशुक्रा व्ययगा मनुष्यं क्षुत्क्षामकंठक्षतद।
ग्धगात्रं त्रपाविहीनं विधनं विरूपं सुकष्टभाजं गतसौहृदं च ४ सू. चं. शु. सूर्येंदुसौरा व्ययगा मनुष्यं कुर्वंति नित्यं क्षयपीडितांगं श्लेष्मार्त्तदेहं प्रभयाविहीनं महाश्रमं श १८०

हो·र तुंभिरर्दितंच ५ सू·चं·श· सूर्यारसौम्या व्ययगा मनुष्यं कुर्वंति नित्यं क्षयपीडितांगं मूर्खंस्वलंशस्त्रपराङ्मुखं गं पैशुन्यरक्तं नृपपीडितंच ६ सू·मं·बु· सूर्यारजीवाजनयंति मर्त्यं गतश्रियं
१८० भूरिकुमित्रभाजं जडस्वभावं विवलं नृशंसं व्यपेतलज्जं कुधनं कुदारं ७ सू·मं·वृ· सूर्यारशुक्राव्ययगा मनुष्यं कुर्वंति कामोपहतं सुनीचं चरित्रहीनं वहुकष्टभाजं कृतघ्नपेतं कलह
प्रियंच ८ सू·मं·शु· सूर्यारसौरा व्ययगा मनुष्यं कुर्वंति नित्यं व्यथयाभिभूतं कुकर्मभाजं जडतासमेतं निरर्गलं शास्त्रपराङ्मुखंच ९ सू·मं·श· सूर्यारजीवाजनयंति मर्त्यं व्यया
श्रिताः कामपरं नृशंसं प्रभूतरोषं सुहृतं निरूपं दौर्भाग्यभाजं जनगर्हितंच ११ सू·बु·वृ· सूर्यज्ञशुक्राजनयंति मर्त्यं मायाविनं निष्ठुरमप्रगल्भं पैशुन्यरक्तं विकृतानुकारं वि
राशमुत्साहविवर्जितांगं ११ सू·बु·वृ· सूर्यज्ञसौराजनयंति मर्त्यं निःस्वं असाधुं धनवर्जितंच मूर्खं खलाढ्यं परदाररक्तमसद्व्ययं पार्थिवपीडितंच १२ सू·बु·श· सूर्यात्मजेज्यभृगुजाः
मनुष्यं व्ययसंश्रिताः संजनयंति निःस्वं विहीनकोशं भृतकं कुशीलं दुष्टस्वभावं भयसंकुलंच १३ सू·बु·शु· सूर्यात्मजेज्यार्कसुताः मनुष्यं व्ययाश्रिताः संजनयंति तीव्रं परान्नपुष्टं वहु
दैन्यभाजं विवेकविद्याध्ययनैर्विहीनं १४ सू·वृ·श· सूर्यासुरेज्यार्कसुता मनुष्यं व्ययाश्रिताः संजनयंति भीरुं प्रतापशीलं नयवर्जितांगं गुणप्रहीनं भयसंकुलंच १५ सू·शु·श·
चंद्रारसौम्याजनयंति मर्त्यं व्ययाश्रिता वित्तविवेकहीनं सुकोपिनं नीतिविहीनमुग्रं प्रभूतशत्रुं रणभाजितंच १६ चं·मं·बु· चंद्रारजीवाजनयंति मर्त्यं व्ययाश्रिताः कामपरं नृ
शंसं सुतव्यपेतं परकर्मरक्तं दुष्टस्वभावं सभयं सदैव १७ चं·मं·वृ· चंद्रारशुक्राव्ययगा मनुष्यं व्ययाश्रिताः संजनयंति दीनं द्यूतप्रियं निर्घृणमोजसाढ्यं प्रलोभिनं वैरि
भिःपीडितंच १८ चं·मं·शु· चंद्रारसौरा व्ययगा मनुष्यं सदा प्रकुर्वंति च कुत्सितांगं स्ववंधुमुक्तं कृतकोपचारं स्त्रीनिर्जितं दुर्जनमानसंच १९ चं·मं·श· चंद्रज्ञजीवा
व्ययगा मनुष्यं सदा प्रकुर्वंति दयाविहीनं प्रभूतदोषं वहुकूटभाजं जनातिगं निर्दयमिष्टदोषं २० चं·बु·वृ· चंद्रज्ञशुक्राव्ययगा मनुष्यं कुर्वंति कामोपहतं सुतीव्रं विक
ल्पनं पापमनुष्यरक्तं मातापितृभ्यां परिमुक्तमेवं २१ चं·बु·शु· चंद्रज्ञसौरा व्ययगा मनुष्यं कुर्वंति नित्यं व्यसनार्त्तमात्रं सुलोल्यभाजं सुनिकृष्टरक्तं श्रद्धाविहीनं परवंचना
कंच २२ चं·बु·श· चंद्रात्मजेज्यभृगुजा मनुष्यं व्ययाश्रिताः संजनयंति निःस्वं लज्जाविवेकादिभिरेवमुक्तं युद्धानुरक्तं गतगौरवंच २३ चं·वृ·शु· चंद्रात्मजेज्यार्कसुता मनुष्यं र·पः
व्ययाश्रिताः संजनयंति दुष्टं पापाधिकं पापकथानुरक्तं कोलस्वभावं व्यसनेरतंच २४ चं·वृ·श· चंद्रासुरेज्यार्कसुता मनुष्यं व्ययाश्रिताः संजनयंति नीचं नीचाश्रयं १८०

नीचर्जितं सुनीचं व्यपेतभोगगुणं वर्जितं च २५ चं·शु·श· भौमज्ञजीवाजनयंति मर्त्यं व्ययाश्रिताः भूरिभयाकुलांगं सुगर्वितं सुष्टकथानुरक्तं व्रताश्रमेभ्यो ब्राह्मणदेवभक्तं २६ म·बु·बृ·
भौमज्ञशुक्रा जनयंति मर्त्यं व्ययाश्रिता वर्णविवर्जितांगं दौर्भाग्ययुक्तं बहुभक्ष्यरक्तं सुनिष्ठुरं प्रीतिविवर्जितं च २७ मं·बु·शु· भौमज्ञसौरा जनयंति मर्त्यं विद्याविहीनं धनभोग
हीनं सुनिष्ठुरं क्लीवपरातिगं स्वश्रिया विहीनं कुसुतं सदैव २८ मं·बु·श· भौमामरेज्यार्कसुता मनुष्यं व्ययाश्रिताः संजनयंति दुष्टं दृष्टात्मनं धर्मविहीनमहत्त्वसुकांतवीतीं
तुरयं सदैव ३० मं·बृ·श· भौमासुरेज्यार्कसुता मनुष्यं व्ययाश्रिताः संजनयंति मर्त्यं चौर्यानुरक्तं व्रणिनं कृतघ्नं श्रुतव्यपेतं गतपौरुषं च ३१ मं·शु·श· सौम्यामरेज्यभृगुजा मनुष्यं
व्ययाश्रिताः संजनयंति नित्यं विवेकहीनं सुततीर्थदारैर्लज्जाविहीनं भयसंकुलं च ३२ बु·बृ·शु· सौम्यामरेज्यार्कसुता मनुष्यं व्ययाश्रिताः संजनयंति नित्यं विवेकहीनं बहु
मायया ढ्यं सदाप्रसादान्वितमुग्रकृत्यं ३३ बु·बृ·श· सौम्यासुरेज्यार्कसुता मनुष्यं व्ययाश्रिताः संजनयंति मर्त्यं प्रभूतदुःखं खलसंगरक्तं विवेकबुद्ध्या सहितं सदैव ३४ बु·शु·श·
जीवासुरेज्यार्कसुता मनुष्यं व्ययाश्रिताः संजनयंति नित्यं ब्रह्मघ्नमाज्ञारहितं कुचेलं पराश्रयं बांधववर्जितं च ३५ बृ·शु·श· इत्येवं त्रिविकल्पजाः रवींदुभौमेंदुसुता मनु
ष्यं व्ययाश्रिताः संजनयंति नित्यं बहुश्रमं पापनिपीडितांगं हुताशमिष्टैर्रहितं सदैव १ सू·चं·मं·बु· रवींदुभौमामरपूजितांगा व्ययाश्रिताः संजनयंति मर्त्यं कृतघ्नमोजोर
हितं विरूपमत्र भयं शत्रुयुतं सदैव २ सू·चं·मं·बृ· रवींदुभौमासुरपूजितांगा व्ययाश्रिताः संजनयंति मर्त्यं पराभिभूतं वनितासुताद्यैः प्रभूतमानं बहुपापकं च ३ सू·
चं·मं·शु· रवींदुभौमार्कसुता मनुष्यं व्ययाश्रिताः संजनयंति नित्यं बुद्ध्याविहीनं व्यसनप्रगल्भं निरंकुशं कांतिविवर्जितं च ४ सू·चं·मं·श· रवींदुसौम्यामरपूजितांगा व्य
याश्रिताः संजनयंति मर्त्यं गतप्रभं व्याधिभिरर्दितांगं भयाधिकं कीर्तिविवर्जितं च ५ सू·चं·बु·बृ· रवींदुसौम्यामरपूजितांगा व्ययाश्रिताः संजनयंति मर्त्यं प्रभाविही
नं गतबुद्धिसत्यं रोद्धान्नरात्यापपराङ्मुखं च ६ सू·चं·बु·शु· रवींदुसौम्यार्कसुताः मनुष्यं व्ययाश्रिताः संजनयंति नित्यं व्याधिप्रकोपं पुरुषं कृतघ्नं नीचाश्रितं नीच
मतिं सदैव ७ सू·चं·बु·श· रवींदुजीवासुरपूजितांगा व्ययाश्रिताः संजनयंति मर्त्यं प्रभूतरोषं गतबुद्धिवित्तं लज्जाविहीनं रणकातरं च ८ सू·चं·बृ·शु· रवींदुजी
वार्कसुता मनुष्यं व्ययाश्रिताः संजनयंति भीरुं गुह्योद्भवैरोमचयैः समेतं तृष्णाधिकं कांतिविवर्जितं च ९ सू·चं·बृ·श· सूर्यारसौम्यामरपूजितांगा व्ययाश्रिताः।

संजनयंति मर्त्यं श्रुतार्थहीनं व्यसनैः समेतं पथ्येन हीनं रुजयाधिकं च ११ सू·मं·बु·बृ· सूर्यारसौम्यासुरपूजितांगा व्ययाश्रिताः संजनयंति मर्त्यं नीचानुरक्तं बहुदोषभाजं कदन्न
पानाशनमुग्रकोपं १२ सू·मं·बु·शु· सूर्यारसौम्यार्कसुतामनुष्यं व्ययाश्रिताः संजनयंति नित्यं श्लेष्मानिलाभ्यां परिपीडितांगं गुणैर्विहीनं परतर्ककं च १३ सू·मं·बु·श· सूर्यारजी
वार्कसुता मनुष्यं व्ययाश्रिताः संजनयंति भीमं असह्यचेष्टं बहुप्रकोपं स्वल्पश्रुतं नीचगतिं सदैव १५ सू·मं·बृ·श· सूर्यारशुक्रार्कसुतामनुष्यं व्ययाश्रिताः संजनयंति मर्त्यं
नीचाभिभूतं बहुनीचभाजं कष्टात्मजं कष्टयुतं सदैव १६ सू·मं·शु·श· सूर्यत्रजीवार्कसुतामनुष्यं व्ययाश्रिताः संजनयंति मर्त्यं दयाविहीनं कुकलत्रवस्त्रैः समन्वितं दीनतमं
गतस्वं १७ सू·बु·बृ·श· सूर्यत्रजीवार्कसुतामनुष्यं व्ययाश्रिताः संजनयंति मर्त्यं क्षतांगमार्त्तं कलहप्रधानं निरर्गलं हीनधनं सदैव १८ सू·बु·बृ·श· सूर्यत्रशुक्रार्कसुताम
नुष्यंव्ययाश्रिताः संजनयंति तीव्रं श्रद्धाविहीनं द्विजनिंदयाढ्यं लुब्धं कृशांगं जडतासमेतं १९ सू·बु·शु·श· सूर्यामरेज्यभृगुजार्कपुत्रा व्ययाश्रिताः संजनयंति मर्त्यं महाक
पार्त्तं गुरुभिर्विहीनमारामउद्योगविवर्जितं च २० सु·बृ·शु·श· चंद्रारसौम्यामरपूजितांगा व्ययाश्रिताः संजनयंति मर्त्यं क्षमाविहीनं बहुकोपभाजं विनष्टसत्यं वनितानिरस्तं २१
चं·मं·बु·बृ· चंद्रारसौम्यासुरपूजितांगा व्ययाश्रिताः संजनयंति मर्त्यं लुब्धं रुजार्त्तं स्वयुतं मिष्टहीनं संपीडितं पार्थिवतस्करैश्च २२ चं·मं·बु·शु· चंद्रारसौम्यार्कसुता मनुष्यं व्ययाश्रिताः
संजनयंति मर्त्यं पितार्त्तहीनं गुरुभिर्विमुक्तं पराभिभूतं वनिताजनेन २३ चं·मं·बु·श· चंद्रारजीवासुरपूजितांगा व्ययाश्रिताः संजनयंति मर्त्यं सुरौद्रं सर्वविपादसुवैरं कुलस्य
वाह्यजनगर्हितं च २४ चं·मं·बृ·शु· चंद्रारजीवार्कसुतामनुष्यं व्ययाश्रिताः संजनयंति मर्त्यं दोषाभिभूतं परदाररक्तं मसह्यं व्याधिभिरर्दितं च २५ चं·मं·बृ·श· चंद्रा
रशुक्रार्कसुताव्ययस्था नरं प्रकुर्वंति सुतप्रमुक्तं · सुपावकं पापकपापमत्तं नृशंसं पराजितं स्त्रीभृतकैः सदैव २६ चं·मं·शु·श· चंद्रत्रजीवासुरपूजितांगा व्ययाश्रिताः संज
नयंति मर्त्यं कुस्वामिबुद्धीरहितं गतस्वं सुनिष्ठुरं पानरतं कुबुद्धिं २७ चं·बु·बृ·शु· चंद्रत्रजीवार्कसुतामनुष्यं व्ययाश्रिताः संजनयंति दीनं कोपान्वितं दानविवर्जितं गतश्री
निर्जितं निर्घृणमप्रमेयं २८ चं·बु·बृ·शु· चंद्रत्रशुक्रार्कसुतामनुष्यं व्ययाश्रिताः संजनयंति तीव्रं दुष्टस्वभावं व्रणपीडितांगं स्त्रीभिरभिभूतं जनगर्हितं च २९ राम
चं·बु·शु·श· चंद्रामरेज्यभृगुजार्कपुत्रा व्ययाश्रिताः संजनयंति मर्त्यं बुद्धिविहीनं गुणवर्जितांगं पराभिभूतं कृपणं सदैव ३० चं·बृ·शु·श· भौमत्रजीवासुरपूजितांगा व्य ८

याश्रिताः संजनयंति मर्त्यं प्रभाविहीनं विकलं विरूपं सुगर्हितं स्नेहविवर्जितं च ३१ मं·बु·बृ·शु· भौमज्ञजीवार्कसुता मनुष्यं व्ययाश्रिताः संजनयंति पापं पराजितं स्त्रीजितवा
स्यविद्यं विरक्तपौरं भयसंकुलं च ३२ मं·बु·शु·श· भौमामरेज्यभृगुजार्कपुत्रा व्ययाश्रिताः संजनयंति दीनं कुसंगरक्तं परधर्मभाजं मसद्व्ययवादिगणं समतं च ३४ मं·बृ·शु·
श· सौम्यामरेज्यभृगुजार्कपुत्रा व्ययाश्रिताः संजनयंति मर्त्यं निर्लज्जमत्युन्नतिसगुल्मरोगातुरं पार्थिवपीडितं च ३५ बु·बृ·शु·श· इत्येवं चतुर्विकल्पजाः रवींदुभौमज्ञसुरेंद्र
पूज्या व्ययाश्रिताः संजनयंति मर्त्यं कुचैलमस्निग्धमरिप्रयुक्तं लौल्यान्वितं कर्मकृतप्रहृष्टं १ सू·चं·मं·बु·बृ· रवींदुभौमज्ञसिता मनुष्यं व्ययाश्रिताः संजनयंति निकृष्टकर्मसंघा
सहितं नृशंसं सदातुरं बांधवपीडितं च २ सू·चं·मं·बु·शु· रवींदुभौमज्ञदिनेशपुत्रा व्ययाश्रिताः संजनयंति मर्त्यं म्लेच्छानुरक्तं परदारभाजं कुसंगसेवासहितं सदैव ३ सू·
चं·मं·बु·श· रवींदुभौमामरपूज्यशुक्रा व्ययाश्रिताः संजनयंति मर्त्यं व्यपेतलज्जं जनिताविरुद्धं कुधर्मपण्यान्वितमप्रगल्भं ४ सू·चं·मं·बृ·शु· रवींदुभौमामरपू
ज्यसौरा व्ययाश्रिताः संजनयंति मर्त्यं बहुव्ययं व्याधिनिपीडितांगं सदातुरं कातरमल्पवित्तं ५ सू·चं·मं·बृ·श· रवींदुभौमासुरपूज्यसौरा व्ययाश्रिताः संजनयंति मर्त्यं
यशोविहीनं क्रूरपानरक्तं मायाविनं निष्ठुरमुग्रवैरं ६ सू·चं·मं·शु·श· रवींदुसौम्यामरपूज्यशुक्रा व्ययाश्रिताः संजनयंति मर्त्यं प्रभूतदुःखं खलसंगरक्तं श्लेष्माधिकं मूर्खं।
तमुग्रनृशंसं ७ सू·चं·बु·बृ·शु· रवींदुसौम्यामरपूज्यसौरा व्ययाश्रिताः संजनयंति मर्त्यं वैरं कुलं शीलविवर्जितांगं गुणैः प्रमुक्तं कृतकस्वभावं ८ सू·चं·बु·बृ·श· रवींदुसौम्या
सुरपूज्यसौरा व्ययाश्रिताः संजनयंति मर्त्यं छलप्रधानं बहुक्रूरभाजं सदाजितं नीचजनैः समेतं ९ सू·चं·बु·शु·श· रवींदुजीवासुरपूज्यसौरा व्ययाश्रिताः संजनयंति मर्त्यं वित्ता
धिकं काममपरं नृशंसं बहुप्रकोपं भयसंकुलं च १० सू·चं·बृ·शु·श· सूर्यारसौम्यामरपूज्यशुक्रा व्ययाश्रिताः संजनयंति मर्त्यं कृपाविहीनं हतपुत्रदारं बहुप्रदानेनिपुणं वाक्य
मेव ११ सू·मं·बु·शु·श· सूर्यारसौम्यामरपूज्यसौरा व्ययाश्रिताः संजनयंति मर्त्यं धनार्थदाराव्यसनैर्विहीनं सुनिष्ठुरं वैरपरं कुबुद्धिं १२ सू·मं·बु·बृ·श· सूर्यारसौम्यासुरपूज्य
सौरा व्ययाश्रिताः संजनयंति मर्त्यं निःश्रीकमुग्रं कलहानुरक्तं विरूपगात्रं परवंचकं च १३ सू·मं·बु·शु·श· सूर्यारजीवासुरपूज्यसौरा व्ययाश्रिताः संजनयंति मर्त्यं नानारुजा
र्तं खलसंगरक्तं कामातुरं भीतियुतं सदैव १५ सू·मं·बृ·शु·श· सूर्यज्ञजीवासुरपूज्यसौरा व्ययाश्रिताः संजनयंति मर्त्यं मूर्खं कुवक्त्रं विकरालनेत्रं ब्रह्मद्विषं शत्रुजितं सु

तीव्रं १५ सू॰ बु॰ बृ॰ शु॰ श॰ चंद्रारसौम्यामरपूज्यशुक्रा व्ययाश्रिताः संजनयंति मर्त्यं चौर्यानुरक्तं गुरुतल्पविरुद्धं हतस्वपक्षं व्रणपीडितं च १६ चं॰ मं॰ बु॰ बृ॰ शु॰ चंद्रारसौम्यामरपूज्य
सौरा व्ययाश्रिताः संजनयंति मर्त्यं भ्रष्टं सुमित्रैर्नियमैर्विरुद्धं सुनिर्घृणं मन्युपरं सदैव॰ १७ चं॰ मं॰ बु॰ बृ॰ श॰ चंद्रारसौम्यासुरपूज्यसौरा व्ययाश्रिताः संजनयंति मर्त्यं द्वेष्यं विव
र्णं प्रमदाभिरस्तं गतप्रजं पार्थिवदूषितं च १८ चं॰ मं॰ बु॰ शु॰ श॰ चंद्रारजीवासुरपूज्यसौरा व्ययाश्रिताः संजनयंति मर्त्यं कुस्त्रीषु रक्तं कुसुखं कुमित्रं कुधर्मविद्यान्वितमिष्टपा
पं १९ चं॰ मं॰ बृ॰ शु॰ श॰ चंद्रारजीवासुरपूज्यसौरा व्ययाश्रिताः संजनयंति मर्त्यं सदा व्रणार्तं कुधिया समेतं निर्लज्जमाजारहितं विरूपं २० चं॰ बु॰ शु॰ श॰ भौमज्ञजीवासुर
पूज्यसौराः व्ययस्थिताः संजनयंति मर्त्यं निश्रीकमुग्रं कलहानुरक्तं विशीर्णबुद्धिं धनवर्जितं च २१ मं॰ बु॰ बृ॰ शु॰ श॰ इत्येवं पंचविकल्पजाः रवींदुभौमज्ञसुरेज्यशुक्रशने
श्वराः संजनयंति मर्त्यं तेजोविहीनं परपक्षरक्तं व्रतघ्रमार्तं परवंचकं च १ सू॰ चं॰ मं॰ बु॰ बृ॰ शु॰ रवींदुभौमज्ञसुरेज्यसौरा व्ययाश्रिताः संजनयंति मर्त्यं कृतघ्रतायुक्तम
तिप्रधानं लज्जाविहीनं परतर्ककं च २ रवींदुभौमज्ञसितार्कपुत्रा व्ययाश्रिताः संजनयंति मर्त्यं महारुजं वित्तसुतैर्विमुक्तं सुनिर्दयं लोल्ययुतं कुदारं ३ सू॰ चं॰ मं॰ बु॰ शु॰ श॰
रवींदुभौमामरपूज्यशुक्रशनैश्वराः संजनयंति मर्त्यं स्वल्पायुषं वित्तयशोविहीनं वृथाश्रमं रौद्रविधानभाजं ४ सू॰ चं॰ मं॰ बृ॰ शु॰ श॰ रवींदुसौम्यामरपूज्यशुक्रशनैश्वराः
संजनयंति मर्त्यं सदालसं बुद्धिधनैर्विहीनं कुपुत्रदारैः सहितं सदैव ५ सू॰ चं॰ बु॰ बृ॰ शु॰ श॰ रवींदुसौम्यामरपूज्यशुक्रशनैश्वराः संजनयंति मर्त्यं शिराश्रयं नीचसखं दरि
द्रं विमुक्तसत्त्वं गुणवर्जितं च ६ सू॰ चं॰ बु॰ बृ॰ शु॰ श॰ चंद्रारसौम्यामरपूज्यशुक्रशनैश्वराः संजनयंति मर्त्यं ब्रह्मद्विषं कीर्तिसुखैर्विहीनं हतप्रभावं बहुरोगभोजं ७ सू॰ चं॰ मं॰ बु॰ बृ॰
शु॰ श॰ इत्येवं षड्विकल्पजाः रवींदुभौमज्ञसुरेज्यशुक्रशनैश्वराः संजनयंति मर्त्यं विरुद्धचेष्टं विगताभिमानं सदा दरिद्रं धनधान्यहीनं १ सू॰ चं॰ मं॰ बु॰ बृ॰ शु॰ श॰ इत्येवं सप्त
विकल्पजाः इति वृद्धयवनेव्ययभावाश्रययोगाध्यायः इति श्रीमद्दैवज्ञवर्यपंडितदामोदरात्मजबलभद्रविरचिते होरारत्ने दशाधिफलद्विग्रहादियोगाध्यायो नव
मः ९ अथ स्त्रीजातकाध्यायः होरासारे स्त्रीपुरुषयोः समानं योग्यादि शास्त्रपूर्वोक्तं यद्यद्योग्यं पतिसौभाग्यं स्त्रीणां तत्तत्सर्वं वदेल्लग्नेषु १ देहं धनं निधनगृहे पतिसौ ष्म:
भाग्यं सुखं च यामित्रे सौदर्य्यं लग्नगृहे विचिंतयेत्पुत्रसंपदं नवमे २ एषु स्थानेषु युवत्यः सौम्याः शुभदा बलान्विता यत्तयाः क्रूरास्तु नेष्टफलदाः भवनेशविवर्जिताः सद्भाविं १२

त्वाः ३ पुरुषर्क्षे पुरुषांशे लग्नेंदोः पापयुक्ते योऽजाता पुरुषाकृतिशीलयुता भर्तृयोषास मंजसो कन्या ४ समराशौ समभागे लग्नेंदोः स्त्रीगुणान्विता कन्या सौम्ययुते दृष्टवा सु
भगा साध्वी सुविख्याता ५ लग्नेंदोर्यो वलवान् तस्य त्रिंशांशकेः फलं वाच्यं त्रिंशांशे वलवांस्तत्रोक्तफलानि सम्यगायाति ६ भौमर्क्षे भौमांशे कन्या मृतसुते गुणैर्हीना।
मृदांशस्था प्रेष्या दुःशीला वहुविधा नारी ७ पुत्रवती जीवांशे वहुव्ययार्त्ता पतिव्रता कन्या सौम्यांशे वहुमाया मलिनाचारात्पसूतिः स्यात् ८ कन्याजननी कन्या शुक्रांशे राजा
रभोगसंतुष्टा भानोरप्येवमेवं त्रिंशांशफलं समादेश्यं ९ सितभवने भौमांशे दुष्टा खलप्रिया पतिद्वेष्या मंदांशे च पुनर्भूर्मृतप्रजा रोगसंयुता नित्यं १० रूपान्वितगुणाढ्या
जीवांशे भर्तृपुत्रसंपन्ना कुचरित्रा सौम्यांशे काव्यकलागेयसंतुष्टा ११ शुक्रांशे भोगवती विदग्धधैर्ययुता जगत्प्रियाख्याता पापयुते वलहीने त्रिंशांशे नैव पुष्टफलमति १२
वुधभवने भौमांशे कन्या जारप्रियाल्पपुत्रा स्यात् मंदांशे क्लीवसमा मृतप्रजावान्यभर्तृयुता १३ साध्वी पतिप्रिया वा जीवांशे क्षेत्रगते तुंगगे जीवे सौम्यांशे च कुलाढ्या पश्चु
धनधान्यान्विता शुक्रे १४ शशिभवने भौमांशे स्वच्छंदा कामिनी विनष्टसुता मंदांशे पतिहीना क्लेशोपजीवनं लभते १५ अल्पसुता क्षीणयुता जीवांशे शिल्पिनी वधा।
स्यांशे वंध्या मृतप्रजा वा शुक्रांशे स्त्रीपुष्टतमा १६ वाचाय रविभवे कुजभवागे जारिणी विदेशरता कुशला कुशीलदरिद्रा मंदांशे जारवल्लभा हेया १७ पुरुषाकृतिशीलयु।
ता सौम्यांशे कार्यचोरिणी कुलटा कुपतिप्रियाल्पसुता शुक्रांशे नित्यरोगिणी भवति १८ जीवर्क्षे भौमांशे कन्या परिचारिणी सुविख्याता सौरांशे तु दरिद्रा कन्याजननी स्वतंत्र
निरतास्यात् १९ जीवांशे तु धनाढ्या सौम्यांशे लोकपूजिता ललना पुत्रवती शुक्रांशे षड्गुणयुक्ता पतिव्रता साध्वी २० मंदर्क्षे भौमांशे दासी कुलटा मृतप्रजा कन्या मंदांशे
नीचाचारातिदुर्भगा वनिता २१ भर्तृप्रिया च सुभगा जीवांशे नैकतामभिख्याता भग्नव्रता च कुलटा वहुमाया सौमंजस्यांशे २२ शुक्रांशे प्रभुशीला वंध्या चारित्रलोचं
ना वनिता त्रिंशांशफलमेवं वक्तव्यं दैवविद्भिरवलायाः २३ चंद्रार्कस्फुटयोगात्त्रिंशांशफलं विनिर्दिशेत्तस्याः लग्नेंदोर्योगवशात्त्रिंशांशफलं विनिर्दिशेद्यवा २४
गर्गजातके शुद्धेस्तदुर्वलेयस्याः पापग्रहनिरीक्षते सौम्यग्रहदृशाहीने भर्त्ता कापुरुषो भवेत् १ वुधमंदयुते सप्तमे च पतिः क्लीवसमो भवेत् वंध्या वा दुर्भगा वापि सा
च नित्यप्रवासिनी २ सप्तमे चरराशौ च तदीशे चरभांशके भर्त्ता प्रवासशीलः स्यात्स्थिरभे स्वगृहे वसेत् अस्तगेर्के रिभिर्दृष्टे तथा त्यक्ता भवेत्स्वयं सप्तमस्थेर्कजे त १८०

हो॰ र॰ हद्दाल्पसाविधवाभवेत् भर्त्ताक्रोधपरोवापि अन्योन्यमृतिमाप्नुयात् मंदेसप्तमराशिस्थेतथाशत्रुनिरीक्षिते ५ कन्यैवविधवाभूत्वाराजानमधिगच्छति यूनेस्युभाशुभेयु-
१८३ क्तेपुनर्भूसाभविष्यति ६ अस्तगावारमंदोचेत्पापर्क्षेविधवाभवेत् मासिवर्षेतथावाहोभागोचसंविगछति ७ वलहीनेस्तगेपापेसौम्यग्रहनिरीक्षिते भर्त्ताविमुच्यतेनारी
नीचारिस्थेचवैरिणी ८ अन्योन्यसमितांशेचेज्जारसक्ताभवेद्वधू तथैवसप्तमेचंद्रेदुश्चरीपतिनासह ९ मंदारार्केविलग्नस्थाशशिशुक्रोयदातदा वंध्याभवतिसानारीपु
चमेपापदृष्युते १० अर्केराश्यंगतेभौमेसूर्यांशेस्वांशगेपिवासौरेकुजेक्रमाद्दृष्टेव्याधियोनिश्चदुर्भगा ११ अस्तर्क्षेशुभदृष्टेच शुभस्यांशेशुभेक्षिते चारुश्रोणीप्रियाभर्त्तु
र्वल्लभाभवनेवधूः १२ अस्तेर्केस्वांशगेस्वर्क्षेभर्तारतिपरोमृदुः चंद्रेस्तेस्वर्क्षगेस्वांशेमृदुस्सरवशःपतिः १३ भौमेस्तेस्वांशकेक्षेत्रेस्त्रीलोलानिर्धनःपतिःसौम्येर्केस्वां
शकेक्षेत्रेभर्ताविद्वान्भवेत्सुखी १४ जीवेस्तेस्वांशकेस्वर्क्षेगुणवान्विजितेंद्रियः शुक्रेस्तेस्वांशकेक्षेत्रेकन्यासौभाग्यवान्सुखी १५ मंदेस्तेस्वांशकेक्षेत्रेवृद्धोमूर्खोभवेत्पतिः एवंसप्त-
मराशिस्थैर्ग्रहैर्नृणांवदेत्फलं १६ अस्तराशिफलंप्रोक्तंलग्नराशिफलंतथा भवत्येवहिदंपत्योर्ग्रहयोगवलाद्भवेत् १७ सौम्यक्षेत्रोदयेचंद्रेसार्धंशुक्रेणसावधूः सुखीपितापति
द्वेष्यानित्यमस्थिरचारिणी १८ चंद्रशुक्रौयदिलग्नस्थौकुलाढ्याब्रह्मवादिनी नशुक्रोयदिलग्नस्थौसौम्यस्थानेकुलाढ्यता चांद्रीचंद्रसितांशेभवद्गौरत्यागुणान्विताजीवेलग्नेतिसे
पक्षापुत्रवित्तसुखप्रदा २० क्षेत्रोच्चसंस्थितालग्ने अशुभास्तेशुभप्रदाक्रूरेष्टमेचविधवापापक्षेत्रेविशेषतः २१ निधनेशांशके एतेर्दशायांनिश्चितंभवेत् सौम्येष्टमस्थेकन्यावकुः
प्रागेवसंमृतिः २२ पापसौम्ययुतेतस्मिन्समकालेयतोमृतिः वल्लावलंतयोर्ज्ञात्वापुरुषेषुविजानता २३ भाग्यस्थानेसितेसौम्येसपापेचाष्टमेपिवा भर्तृपुत्रसुतिःसार्द्धंवहुकालेपजी
वति २४ धनुःकर्कयमेलग्नेभर्तृपुत्रादिदुःखदा सिंहालिवृषकन्यासुचंद्रेतिष्टतिपंचमे २५ अस्यापत्यंविजानीयात्पुरुषेषुनचावदेत् लग्नाच्चाष्टमभागस्थेप्यापेदुःखकालान्विता २६ सौम्य
ग्रहैरसम्मिश्रैः सर्वथाक्लेशमाप्नुयात् क्रूरग्रहेसुखगतेवहुप्रसवमादिशेत् २७ कन्याप्रदानकालेषुप्रोक्तमार्गंविचिंतयेत् २८ सारावल्यांशुक्रासितौयदिपरस्परभागसंस्थौसौज्ञावदृष्टिपथ
गतौवुदयेघटांशः स्त्रीणांमतीवमदनाग्निमदःप्रवृद्धःस्त्रीभिःशमंचपुरुषाकृतिभिर्लभंते १ रिक्तेवुधेंदुभृगुजैः रविजेचमध्येशेषैर्वलेनसहितेर्विषमर्क्षलग्ने जातांसंग्रवेत्पुरुषिणीकुनवि- राम:
मदेवपुंश्चेष्टितावधुरातिप्रथितावलोके २ क्रूरेयामित्रगतेनवमेग्रहरिवेच्चाभवंतिनूनं. प्रव्रज्यामाप्नोतितदानवमेग्रहसंभवोनैव ३ वलिभिर्वुधगुरुशुक्रैः शशांकसहितेर्वि १८३

लग्नगे शशिभे स्त्रीब्रह्मवादिनी स्यादनेकशास्त्रेषु कुशला च ४ यवनजातके भद्रांतिथिर्यदाश्लेषा शतभिः कृत्तिका तथा मंदारविवारे सुविषकन्या प्रजायते द्वादशी वारुणांसूर्ये वि
शाखा सुसप्तमी कुजे मंदे श्लेषा द्वितीया च विषकन्या प्रसूयते त्रैलोक्यप्रकाशे रिपुक्षेत्रस्थितौ द्वौ तु लग्ने यत्र शुभग्रहौ क्रूरश्चैकस्तदा जातो भवेत् स्त्री विषकन्यका १ योगजात
के लग्ने सौरी रविः पुत्रे धर्मस्थो धरणीसुतः अस्मिन्योगे तु जाता स्त्री सा भवेद्विषकन्यका १ अस्यापवादः लग्नाद्विधोर्वा यदि जन्मकाले शुभग्रहो वा मदनाधिपश्च द्यूनस्थितो हं
त्यनं पत्यदोषं वैधव्यदोषं च विषांगनाख्यं १ रंध्रगौ सूर्यचंद्रौ चेद्विलग्नान्निजराशिगौ वंध्या यदि चंद्रमा सौम्यो काकवंध्या तदा भवेत् २ मृतापत्या च शुक्रे ज्ये सौरो रंध्रे भवेच्च वा भ
वेत् ३ शौनकः पापद्वयमध्यगते चंद्रे लग्ने च कन्यका जाता निजपितृकुलं समस्तं श्वशुरकुलं हंति विशेषात् १ व्ययाष्टगे कुजे क्रूरयुते पहो विलग्नगे रंडा यत लग्नगो सूर्यभौमे वा
दुर्भगा शनौ २ मूर्तौ राहुर्कभौमेषु रंडा भवति कामिनी एषु शुक्रे द्वितीयस्थे पतिमन्यं चिकीर्षति ३ लग्नेंदु चरराशौ केंद्रस्थो पापिनो वलिनः योषित ग्रहसंदृष्टो पतिपक्षे गच्छ
ते नारी ४ वीरजातके शनिभौमगृहे लग्ने चंद्रे च सितसंयुते पापदृष्टे च सा नारी वंध्यत्वमुपगच्छति १ सप्तमस्थः कुजश्चैव दृष्टः सौरेण सोपि चेत् गलद्गर्भा तु सा त्वेषा श
नैरोगयुतभजा २ रवौ मृतप्रजा ज्ञेया राहुणा पितथैव च चंद्रे बुधे तु सा नारी कन्याजन्मवती भवेत् ३ पंचमस्थौ गुरुसितौ वहुपुत्रयुता भवेत् सुभगा पतिपूज्या च गुणयुक्ता तु सु
व्रता ४ चंद्रे मंदे चंद्रयुते यदृष्टे शुक्रेण लोलस्तु पतिस्तु तस्याः चलस्वभावश्च पलो नितांतं भ्रमेण युक्तस्तु विवेकहीनः ५ समराशिगते तत्र सप्तमे शुभसंयुते शुभग्रहैस्तथा
दृष्टे राजपूज्यः पतिः स्मृतः ६ क्रोधान्विता सौख्यपरा सिते दैत्यलग्नस्थिते कांचनसंयुता च बुधे कलाढ्या सुखभावयुक्ता गुरौ युता शुक्रगुरू तथैव ७ यद्राशशी शुक्रवुधावि
लग्ने त्र योषिते जीवसिते द्रुजा सुः अनेकधा सौख्यगुणादियुक्ता नारी तु दासीभिरलंकृता स्यात् ८ तथाष्टगाः क्रूरखगा विलग्नात् द्वितीयगाः शोभनखेचराश्च सा भर्तुर
ग्रे म्रियते च नारी गोसिंहकौर्प्येंदुगते ऽल्पपुत्रा ९ अथ कन्याजन्मनि डिंभचक्रं जयार्णवे मस्तके त्रीणि ऋक्षाणि सप्तभानि मुखे न्यसेत् स्तनद्वये द्वे ऋक्षाणि हृदये त्रीणि भो
नि च १ नाभौ त्रीणि तथा गुह्ये त्रीणि सूर्यर्क्षतो न्यसेत् कन्याजन्मनि डिंभाख्यं च चक्रमुक्तं स्वयंभुवा २ शीर्षे संतापयुक्ता स्यान्मुखे धान्यधनान्विता हृदि सौभाग्ययुता गुह्ये
नारी स्याद्व्यभिचारिणी ३ असंतुष्टा स्वामिरता नाभौ स्याज्जन्मकालके अथ लग्नफलं वृद्धयवनः मेषोदये सत्यपरा नृशंसा नारी भवेत् क्रोधपरा सदैव स्वपक्षाधिकानि

प्र.र ष्ठुरवाक्ययुक्तारसदा विरक्ता निजवंधुवर्गे १ वृषोदयेसत्परता मनोज्ञा विनीतचेष्टा पतिवल्लभा च नारीभवेत्सर्वकलासुदक्षा स्ववर्गरक्ता पतिवाक्यमिष्टा २ तृतीयलग्नेतिकठोरवा
८४ क्यास्त्रीकामत्यक्ता गुणवर्जिताच ससनृशंसा कफवातयुक्ता महाव्ययाक्रूरविचेष्टिताच ३ लग्नेकुलीरेचभवेत्प्रसूता नारीसरूपार्थनयैः समेता वंधुप्रियासाधुसुशीलदक्षा प्रभा
न्विता सर्वसुखैः समेताः ४ सिंहेचलग्नेवनिताऽतितीक्ष्णा भवेत्कफाढ्या कलहप्रियावा इष्टैर्युता पुत्रशरीरगात्राः परोपकारेनिरता सदैव ५ कन्योदयेवावनिताभिजाता सौभाग्यसौ
ख्यैः सहिता हिताच भवेत्सुवर्गेवहुधर्मरक्ता जितेंद्रिया सर्वकलासुदक्षा ६ तुलाविलग्नेचिरकालकृत्या भवेत्सुमंदाप्रणयेनहीना सुरूपिताकांति विवर्जिता चतस्माधिका प्रीति
विवर्जितांगाः ७ नारीभवेद्वृश्चिकलग्नजाता सुरूपगात्रा नयनाभिरामा सुपुण्यशीलाचपतिव्रताच गुणाधिका सत्यपरासदैव ८ चापोदयेवावनिताभिजाता सा बुद्धिशौर्यपुरु
षानुकारा सामैकसाध्याविधिनाकठोरा निस्नेहयुक्ता प्रणयेनहीना ९ मृगोदयेस्त्री सुभगा सुसत्या तीर्थान्तरक्ताहतशत्रुपक्षा प्रधानकृत्यापरिपूजितान्नलोकेगुणान्विता
पुत्रवतीसदैव १० कुंभेविलग्नेप्रमदाभिजातास्त्रीजन्मदक्षाक्षतजार्दिताच नित्यंगुरूणां सुविरुद्धचेष्टा व्ययाधिकापुण्यपराकृतघ्ना ११ मीनोदयेस्त्रीवहुपुत्रपौत्राः प्र
तिप्रियावांधवलोकमान्या सुनेत्रकेशासुरविप्रभक्ता नयान्विता प्रीतिपरागुरूणां १२ इतिलग्नफलम् अथचंद्रराशिफलम् वृद्धयवनः चंद्रेक्रियस्थेवनिता प्रगल्भाज्ञा
ताभवेत्कृत्यपराप्रधाना सुरूपगात्रा पतिवल्लभाचसदागुरूणां प्रणयानुरक्ता १ वृषाश्रितेशीतकरेसुशीला विद्याविवेकागमशास्त्ररक्ता तीर्थप्रसक्ता वहुपुत्रपौत्रापतिप्रि
याविन्नपरिग्रहेण २ नृयुक्स्थितेशीतकरेविनीता भवेत्सुकायाप्रियदर्शनाच नानार्थमानैः सहिताविदग्धा परोपकारप्रवणासुनेत्रा ३ कर्कस्थितेशीतकरेतुजाता नारीभवेत्सु
व्रतमस्ववर्गात् सुमानिनीवांधवलोकमान्याहतारिपक्षा द्विजदेवभक्ता ४ सिंहस्थितेचंद्रमसिप्रधाना नारीभवेच्छौर्यसमन्विताच प्रियामिषाभूषणवस्त्रभोगा उदारचेष्टा सु
भगासुरूपा ५ कन्याश्रितेशीतकरेतुजाता नारीभवेद्वित्तचतुष्पदाढ्या प्रीतिप्रधानाजितशत्रुपक्षाक्षमान्विताशौचपरासदैव ६ तुलाधरस्थेशशिनिव्रताढ्या जाता भवेत्
स्त्रीहितवंधुवर्गा पतिव्रता पुत्रवती मनोज्ञा विवर्जितादंभमनोभवाभ्यां ७ चंद्रेलिसंस्थेतुसुगुप्तपापा स्थिरस्वभावासुविरुद्धचेष्टा हितागुरूणां नियमैः समेता प्रभूतकोशादि एम:
गताभिमाना ८ धनुर्धरस्थेशशिनिव्रताढ्या नारीभवेद्दानपरासुरागा गीतप्रियापापसहितानुकूलाप्रियागमास्त्रीजननीविनारिः ९ चंद्रेमृगस्थेविकल श्रीनारीभवेत्स्थो १६५

१८५ येपरामनोज्ञाविद्याधिकासत्यपरासुरूपासुसंयुतानीतिपराहतारिः २० घटाश्रितेशीतकरेतुजातानारीभवेच्चंद्र मस्मनुरक्तासुदानशीलासुतवित्तयुक्ता शुभ्रा च कार्यं प्रथिताभिमा
ना ११ मीनाश्रितेस्थेहिमगोसुताढ्यानारीभवेद्धर्मपरासुशीला जितेंद्रियासर्वकलासुदक्षालज्जान्वितामानपरामनोज्ञा १२ इति चंद्रराशिगुणाः अथ नक्षत्रफलम् हृद्द्यवनः जा
ताश्विनीषुप्रमदामनोज्ञाप्रभूतकोशाप्रियदर्शनाच प्रियंवदासर्वसहाभिरामावुध्यान्वितादेवगुरुप्रसक्ता १ स्त्रीवर्गयुक्ताभरणीषुजाताभवेन्नृशंसाकलहप्रियाच सदुष्टचित्ताविभ
वैर्विहीनाहतप्रतापासततंकुचैला २ जाताभवेत्स्त्रीत्वथकृत्तिकासुकोपाधिकामुद्वपराविरक्ताप्रद्वेषिणीवंधुजनेनहीनाश्लेष्माधिकाक्षामतनुःसदैव ३ जाताभवेत्स्त्रीत्वथरोहि
णीषुप्रभूतगात्राशुचिरप्रमत्ता पतिप्रधानापितृमातृभक्तासुपुत्रकन्याविभवैः समेता ४ मृगेतुमान्यावनितासुरूपाप्रसन्नवाक्याप्रियभूषणाच नानार्थविज्ञासत्वपरासुपुत्राधर्मोग्र
याशुभ्रतनुःप्रसक्ता ५ आर्द्रासुनारीकृतमन्युयुक्तादुष्टस्वभावाकफपित्तभाजा सुरेंद्रभावापरंप्रपक्षामहाव्ययाकृत्रिमपंडिताच ६ पुनर्वसौदंभविहीनभावा श्रुत्याधिकापुण्य
परासुभावा नारीभवेद्धर्मपरामनोज्ञासुपूजितानाथवतीसदैव ७ पुष्येषुजातावनितासुरूपाप्रसिद्धकृत्यासुभगासुगात्रा देवद्विजार्थप्रणयासुहर्म्यासुखाधिकावांधवेवल्लभा
च ८ सार्प्येकुरूपाव्यसनाभिभूताप्रियाविहीनातिकठोरवाक्यानारीभवेत्सत्यविहीनकृत्यादंभान्वितासत्यपराकृतघ्ना ९ मघासुमान्याबहुशत्रुपक्षाश्रियाधिकापापविवर्जि
ताच भक्तागुरूणांप्रणताद्विजानांनारीभवेत्पार्थिवसौख्ययुक्ता १० भाग्येजितारिःसुभगासुपुत्रानयान्वितासद्व्यवहारदक्षा. शास्त्रानुरक्ताप्रियवादिनीचस्वप्राप्तपुण्या।
हिभवेत्कृतज्ञा ११ जातार्यम्णासुस्थिरचित्तवित्तानयप्रधानागृहकृत्यदक्षा गुणानुरक्ताव्यसनैर्वियुक्तानारीभवेद्रोगविवर्जिताच १२ हस्तेतुहस्ताशुभनेत्रकर्णाक्षमान्विताशील
धनाविधिज्ञा भवेन्नितांतंवनिताशुभासामहासुखैर्वर्द्धितगात्रकीर्तिः १३ चित्रासुचित्राभरणासुरूपाचतुर्दशीमेकतमाहिहित्वा तथा चक्रूलेविषकन्यकास्यात् शुल्कि
दरिद्रालंपटबंधकीच १४ स्वातीषुसाध्वीसततंसुताढ्याचित्राधिकासत्पधनाल्पपाना नारीभवेत्कीर्तिसमन्विताचप्रभूतमित्राविजितारिपक्षा १५ भवेद्विशाखासुसुहृत्स्व
भावासुकोमलांगीविभवैःसमेता तीर्थानुरक्ताव्रतधर्मदक्षारामाभवेद्धाधववल्लभाच १६ मैत्रेसुमित्राविगताभिमानाप्रसन्नमूर्तिःप्रभुतासमेता विनीतवेषाभरणासुमध्याभक्ता
गुरूणांपतिनासदैव १७ ज्येष्ठासुरम्यावनिताप्रगल्भासुचारुवाक्याविनयान्विताच प्रभूतकोपासुभगासुताढ्याः बंधुप्रियासत्यसमन्विताच १८ मूलेल्पसौख्याविध। १८५

हो.र. वादरिद्रारोगाभिभूतावहुशत्रुपक्षा नारीभवेद्वा धवलोकहीनापराभिभूतावहुनीचसेवा १९ आप्येनुकूलाकुलवंधुमुख्यासुपूज्यकर्मातुलवीर्यसत्वा विशालनेत्राद्भुतरूपयुक्तानारी
१८५ भवेत्कीर्तियुतासदैव २० वैश्वेतुजातावनितामनोज्ञाभवेद्द्वितीयाप्रथितानृलोके नानार्थभोगैः सहिताप्रधानासंतुष्टचित्तापतिवल्लभाच २१ प्रभूतरूपाहरिभेसुचित्ताशास्त्रा
नुरक्ताप्रचुरप्रभावा स्त्रीसर्वदादानरतासुसत्यापरोपकारप्रगुणाचनित्यं २२ भवेद्धनिष्ठासुकथानुरक्तानारीप्रभूतान्नसुवस्त्रभाजा सानार्यदाप्राणिदयानिषिक्ता गुणाधिका
सद्गुणाचेष्टिताच २३ भवेत्सुदातात्वथवारुणोभेस्त्रीसमतापूज्यतमास्ववर्गे देवार्चनेश्रेष्ठजनानुरक्तासदाहितासर्वकुतूहलानां २४ अजैकपादेवनिताभिजाताप्रभूतकोशासु
तलालसाच सत्पात्रदासाधुसमागमोक्ताविद्यान्विताभूरिधनप्रधाना २५ उपांतिभेस्वामिहितानुरक्ताक्षमान्विताप्रीतिकरागुरूणां प्रशांतगर्वासुवशेसोख्ययुक्ताकिंतुनितांत
पमसदैव २६ पौष्णेसुपुष्टावहुमित्रपक्षास्वभावशुद्धाव्रतचारिणीच तेजोन्वितभूरिचतुष्पदाढ्या हतारिपक्षाप्रियदर्शनाच २७ इतिनक्षत्रफलाध्यायः अथकोदियहाणां
भावफलं वृद्धयवनः मूर्त्तौरविस्तीव्रसुखंप्रसूतेनारीं तथातीव्ररुजासमेतां दुष्टस्वभावां सुकृशांकृतघ्नांपरान्नरक्तांप्रभयाविहीनां १ धनाश्रितेर्केधनधान्यहीनां कठोरवा
क्यांगतिभक्तिभावां युद्धप्रियांद्वेषरतांखलांचनारींप्रसूतेगतसौहृदांच २ तृतीयगस्तीक्ष्णकरः प्रसूतेसौख्येनहीनांवनितांसदैव नीरोगदेहासुरूपवक्त्रांविशालवक्षां
जनितांनितांतं ३ चतुर्थगस्तीक्ष्णकरः प्रसूतेसौख्येनहीनांवनितांसदैव सरोगदेहांविकरालदंष्ट्रांप्रभाविहीनांजनताविरुद्धां ४ सुताश्रितः स्वल्पसुतांप्रसूतेनारींप्रभग्नांग
तसंयुतांच स्थूलास्पदांतांपितृमातृभक्तांप्रियंवदांब्राह्मणसंमतांच ५ षष्ठेदिनेशः कुरुतेप्रगल्भांहतारिपक्षांवनितांविदग्धां प्रशांतचर्यांप्रियधर्मकृत्यांधर्मानुरक्तांसुभ
गांसुरूपां ६ सूर्यस्तसंस्थेपतिभावमुक्तानारीतथासर्वसुखैर्विमुक्ता रुद्रैवरौद्राप्रगुणेनहीनाकफाश्रयाकिल्विषिणीकुरूपा ७ स्यानेष्टमेवासरपः प्रसूतेनारीं दुःखान्वितवंधुगो
त्रां नारींकुधर्मान्वितसर्वकृत्यांविषादयुक्तांक्षतजार्दितांगीं ८ धर्मस्थितोवासरपः प्रसूतेनारींकुधर्मांप्रियसाहसांच भाग्यैर्विहीनांवहुशत्रुपक्षांप्रभूतरोगांविभवैर्विहीनां ९
कर्माश्रितोवासरपः प्रसूतेकुकर्मरक्तांवनितांसदैव प्रभाविहीनांशिथिलांस्वकृत्येस्वभावदुष्टामभ्यधिकांनितांतं १० लाभाश्रितोपकुरुतेदिनेशोनारींसलाभां वहुपुत्रपौत्रां जितें
द्रियांसर्वकलासुदक्षांक्षमान्वितांवांधवपूजितांच ११ अंत्यस्थितोवांद्यमगोदिनेशोनारींप्रसूतेविनयेनहीनां वहुव्ययांपानपरांनृशंसांसर्वांगयांरोगांचविशीर्णां च १२ इतिर १८५

विफलम् चंद्रे विलग्ने परिमुक्तपक्षे नारीं प्रसूतेतिं सुरूपगात्रीं कलहप्रियादीनतरां भुरिरोगां विकटशीलां सततं कुचेलां १ धनाश्रितः शीतकरः प्रसूते प्रभूतवि... प्रधानां ध
र्मानुकूलां पतिकार्यदक्षां नयाधिकां ब्राह्मणसंमतां च २ चंद्रस्तृतीयस्थः कफवातसारां नारीं प्रसूते तिकठोरवाक्यां कुलस्थितां नीतिविवर्जितां च स्वभावदुष्टां कृपणां कृतघ्नां ३
चंद्रः सुखस्थो बहुसौख्ययुक्तां नारीं प्रसूतेद्भुतभूषणां च स्थिरस्वभावां श्रुतधर्मरूपां भोगाधिकां देवगुरुप्रसक्तां ४ सुताश्रितः शीतकरः सुपुत्रां करोति नारीं गुणसंगरवाढ्यां ॥
प्रभूतभृत्यां सुतसौख्ययुक्तां सुसंमतां भूतिपरां सुरूपां ५ चंद्रोरिसंस्थः कुरुतेल्पवृत्तां प्रभूतवैरां विनयेन हीनां चलस्वभावां क्षतसर्वगात्रां संगाभिभूतां तनुतासमेतां ६ चंद्रोस्त
संस्थः कुरुते विदग्धां पतिप्रियां धर्मविवेकयुक्तां सुचारुवाचां विभवैः समेतां तेजान्वितां शौचसमन्वितां च ७ चंद्रोष्टमस्थः कुरुते नृशंसां नारीं कुनेत्रां कुकुचां भगां च विहीन
वेषाभरणां सरोगां नितांतमत्यद्भुतगर्हणां च ८ धर्माश्रितः शीतकरः प्रसूते प्रभूतधर्मां वनितां सुमध्यां भाग्याधिकां कल्पतमां मनोज्ञां सुभृत्यपुत्रां च सुभूरिसौख्यां ९ कर्माश्रि
तः शीतकरः प्रसूते प्रभूतहेमद्रविणां प्रसिद्धां नारीं निरीहां कुलसर्वमुख्यां त्यागान्वितां पुण्यपरां सुसत्यां १० लाभाश्रितः शीतकरः सदा भामं भव्यां विधिज्ञां कुरुते सुदांतां ॥
नारीं प्रसन्नां प्रणयेन युक्तां सुनान्वितां व्याधिविवर्जितांगीं ११ करोति चंद्रो व्ययगो व्ययाढ्यां गतप्रभावां वनितां सुतीव्रां दीनाननां नीतिविवर्जितां च क्षमाविहीनां निधनां ॥
नितांतं १२ इति चंद्रफलम् लग्नाश्रितो भूतनयः प्रसूते नारीं महारक्तसुदुःखितांगीं गतप्रभावां पतिना निरस्तां सुदुर्भगां गर्वसमन्वितां च १ धनाश्रितो भूतनयो विशालां धनेन
हीनां कुरुते कुकांतां वराधिकां कामपरां सरोगां रोगाधिकां क्लेशविवर्जितां च २ तृतीयसंस्थः कुरुते महीजो नारीं नितांतं सुभगां सुशीलां बंधुप्रियां साधुरतां प्रशस्तां विलीनरो॥
गां प्रथितप्रभावां ३ चतुर्थगो भूतनयः प्रसूते नारीं हताशां हृतकर्मकृत्यां सौख्येन हीनां विधनां विशीलां जनैर्निरस्तां सततं सरोषां ४ सुताश्रितो भूतनयः प्रसूते नारीं कुपुत्रां नृप
याविहीनां कुसंमतां पापविधानरक्तां श्रुतेन हीनां हतबंधुवर्गां ५ रिपुस्थितो भूतनयः प्रसूते नारीं सनाथां हतशत्रुपक्षां प्रभूतकेशां सुजनानुरक्तां विद्याधिकां रोगविवर्जितां
च ६ अस्तस्थितो वै धरणीसुतस्तु बाल्ये प्रसूते विधवां च नारीं दुष्टस्वभावां विभवेन हीनां सुकुत्सितांगीं गुणवर्जितां च ७ मृत्युस्थितो भूमिसुतः प्रसूते प्रभूतरोगां सुकृशां वि
नाथां दरिद्रदुःखां कृतशोकभाजां हिंसाधिकां कांतिविवर्जितां च ८ धर्माश्रितो भूतनयो विधर्मां करोति नारीं सुमुखां सरोगां भाग्यैर्विहीनां स्वजनैर्निरस्तां प्रियमिषापान

परांसदैव ९ कर्माश्रितोभूतनयः प्रसूतेनारीकुकर्मश्रवणांकुभावां शीलेनहीनांनिरतांविधर्मां लज्जाविहीनांमतिवर्जितांच १० लाभाश्रयस्थः कुलतेमहीजः प्रभूतला
भांवनितांनिरीहां शुभस्वभावांविविधोपचारांजामेरतांप्रीतिपरांसुधर्मे ११ व्ययस्थितोभूतनयः प्रसूतेनारींहतप्रांशुणवर्जितांगी असद्व्ययांपानपरांनृशंसांसदातुरांप्रा
णविवर्जितांच १२ इतिभौमफलम् करोतिसौम्यस्तनुगांसुरूपांयतप्रधानांनयधर्मयुक्तांविशालनेत्रांप्रचुरान्नपानांप्रियंवदांसत्यसमन्वितांच १ धनस्थितः सोमसु.
तः प्रसूतेधनान्वितांशुद्धियुतांसुरूपां नारींद्विजाराधनतत्परांच क्रतुप्रियांश्रीसहितांगुणाढ्यां २ तृतीयगः सोमसुतोधनाढ्यांनारींप्रसूतेसुतमानभाजां जनानुकू
लांप्रभुतांसमेतांबंधुप्रियांत्राणयुतांसुभासां ३ सौम्यः सुखस्थः सुसुखांप्रसूतेनतांप्रभूतैः सुजनैः सुभृत्यैः देवद्विजाराधनतत्परांचप्रख्यातवेशांप्रियधर्मकर्माम्
४ सुतस्थितः सोमसुतोल्पपुत्रांस्वल्पान्नवित्तांकलहंप्रियांचं वृथाटनांगर्हितसर्वकृत्यांलज्जाविहीनांहतसाधुपक्षां ५ सौम्योरिपुस्थोहतशत्रुपक्षांनारींप्रभूतैर्विभ
वैः समेतां गतांपुषांतीव्रकरांसुकामांपरोपकारव्यसनाभिभूतां ६ सौम्यः कलत्रेप्रवरांविदग्धांशास्त्रानुरक्तांशुभभर्तृकांच. करोतिनारींनियमेरुपेतांशुभप्रभावांप्रणया
न्वितांच ७ मृत्युस्थितः सोमसुतः कृतघ्नांनारींप्रसूतेविगताभिमानांनिरस्तधर्मांजनसंविरुद्धांसदातुरांभीतिसमन्वितांच ८ धर्माश्रितः सोमसुतः सुधर्मांधन्यांप्रसूतेवनितांवि
नीतां भाग्याधिकांकीर्तिपरांसुदक्षांक्षमाधिकांसत्यसमन्वितांच ९ कर्माश्रितः सोमसुतः सुकर्मांपतिप्रधानांवनितांप्रसूते प्रभूतकोशांविनयप्रधानांसुवर्णभाजांविन
यैः समेतां १० लाभाश्रितः सोमसुतः प्रसूतेनारींप्रभूतप्रियपुष्टवित्तां सुलाभयुक्तांशुभशीलभाजांपतिव्रतांबांधवसंमतांच ११ व्ययाश्रितः सोमसुतः प्रसूतेनारींविं
लक्ष्मींविगतप्रतापां विवादशीलांविकलांकृशांगीगुणैर्वियुक्तांसुजनैर्निरस्तां १२ इतिबुधफलम् लग्नाश्रितोदेवगुरुः प्रसूतेसुसत्ययुक्तांसुमनोज्ञभोगांगंभीरवाक्यां
प्रियसाधुपक्षांसुरूपगात्रांप्रमदोत्तमांच १ धनस्थितोदेवगुरुः प्रसूतेप्रभूतवित्तांसुभगांमनोज्ञांसुधर्मिणींनीतिपरांप्रधानांगतस्पृहांहानिविवर्जितांच २
तृतीयसंस्थः कुरुतेसुरेज्योनारींनितांतंविहतप्रभावांसुदोषयुक्तांगुणतांविहीनांविवर्जितांगांनिधनैः सदैव ३ चतुर्थसंस्थः कुरुतेसुरेज्योनारींसुवस्त्रांबहन्नपा
नां प्रभूतविद्याभ्यसनांप्रसिद्धांसुपूजितांगींगुणगौरवांच ४ सुतस्थितोदेवगुरुः सपुत्रांनारींप्रसूतेहतपापपक्षां सदानुकूलांव्रतधर्मदक्षांसुहृत्प्रियां रम्यसेमां

राम:
१८९

सुभव्यां ५ जीवो रिपुसंस्थो वृद्धशत्रुपक्षां नारीं सुधत्ते नयसंयुतां च ६ छद्मप्रदात्रासमन्विताङ्गीं प्रधानदर्प्याकृतकोपवासां ६ कलत्रगो देवगुरुः प्रसूते सुभावयुक्तां प्रमदां सुपुण्यां
जनानुरक्तां बहुशास्त्रभाजां पतिप्रियां कीर्तिसमन्वितां च ७ जीवोऽष्टमस्थः कुरुतेऽल्पसत्वां नारीं विशीलां पतिना विमुक्तां स्थूलाङ्घ्रिदन्तां व्यसनप्रधानां वक्त्राशान्तां शमसमन्वितां च ८
जीवो तपःस्थो मरुत्प्रयुक्तां तडागवृक्षोच्चयकल्पतुष्टां रम्यां प्रशस्तां द्विजभक्तियुक्तां महाधनाढ्यां च जनानुरक्तां ९ कर्माश्रितो देवगुरुः प्रसूते प्रख्यातकर्मां प्रगुणां सुपुण्यां प्रभू-
तसत्त्वां विनयप्रगल्भां नारीं प्रसूते द्रुतवेष्टितां च १० लाभाश्रितो देवगुरुः प्रसूते नारीं सुदान्तां बहुकीर्तियुक्तां श्रेयोऽन्वितां शिल्पपरां सुसत्यां सदानुरक्तां गुणकीर्तनेन ११ व्ययस्थितो दे-
वगुरुः प्रसूते साधुव्ययां रोगसमन्विताङ्गीं लाभाभिभूतां कुलधर्महीनां निसर्गदुष्टां परधर्मपक्षां १२ इति गुरुफलम् लग्नाश्रितो दैत्यगुरुः प्रसूते नारीं सुकान्तां सुभगां विदग्धां वि-
लासिनीं दोषविवर्जिताङ्गीं हतारिपक्षां सततं सुशीलां १ शुक्रो धनस्थः सधनां प्रसूते विदग्धचेष्टां प्रमदां सुरूपां धर्मध्वजां धर्मपरां सधन्यां विख्यातकर्मां मृदुभाषिणीं च २ तृतीय-
गो दैत्यगुरुः प्रसूते [illegible] सौख्यां वनितां धनाढ्यां विलासशीलां परधर्मकृत्यां जितेन्द्रियां वंशविभूषणां च ४ करोति शुक्रः खलु पञ्चमस्थो नारीं समृद्धां बहुवत्सकाढ्यां रम्यानुरक्तां ख-
लु संग्रहीनां नित्यप्रधानां निजवंशमध्ये ५ शुक्रो रिपुसंस्थः प्रकरोति नारीं ईर्ष्याप्रधानां बहुकोपयुक्तां तीव्रस्वभावां विजितारिपक्षां सदा निरस्तां मृतिपुत्रवर्गैः ६ कलत्रगो दैत्यगुरुः
प्रसूते नारीं प्रभूतां द्रविणप्रभावां पतिप्रियां शास्त्ररतां प्रगल्भां हितां द्विजानां जनवत्स्वभां च ७ शुक्रोऽष्टमस्थः कुरुते शमन्तां विषादभाजां विभवैर्वियुक्तां दयाविहीनां परवञ्चनां तां कु-
वेलिनीं धर्मविवर्जितां च ८ धर्माश्रितो धर्मपरां प्रसूते शुक्रो समुख्यां वनितां च लोके नानार्थवस्त्राश्रयभोजनाढ्यां सुपुष्टचित्तां पुरुषानुकारां ९ कर्माश्रितो दैत्यगुरुः प्रसूते ना-
रीं यशस्यां सुधनैः समेतां प्रसिद्धकर्मव्रतिपूजिताङ्गीं प्रज्ञाधिकां कल्पतरां सुसत्यां १० लाभाश्रितो दैत्यगुरुः प्रसूते प्रभूतलाभां वनितां सदैव विमुक्तदोषां बहुशास्त्ररक्तां महाप्रभां
विविधाश्रयां च ११ व्ययाश्रितो सद्व्ययदुःखभाजां नारीं प्रसूते भृगुजः सभायां मायाधिकां कृत्रिमवाक्यरक्तां रोगाभिभूतां मतिवर्जितां च १२ इति शुक्रफलम् करोति सौरः खलु लग्नसं-
स्थो विरूपदेहां वनितां निजाते श्रमाधिकां कीर्तिविवर्जिताङ्गीं स्थूलास्थिदन्तां नयनैर्विहीनां १ धनाश्रितः सूर्यसुतः प्रसूते धनेन हीनां वनितां निरस्तां सदाभिभूतां प्रणयेन हीनां
नृशंसभावां नयसंकुलां च २ तृतीयसंस्थो रविजः प्रसूते रक्षाप्रधानां वनितां सुधन्यां बहुप्रजां त्राणविधानरक्तां प्रशंसितां साधुजनेन नित्यं ३ करोति मंदः सुखगोऽल्पसौख्यां ६८७

हो. र. मतिप्रहीनां वनितां कृतघ्नां चलस्वभावां विभवैर्विहीनां सदाहितां नीचसमागमां च ४ सुताश्रितो भास्करजो विपुत्रां नारीं प्रसूते घृणया विहीनां प्रभूतरूपां गणिकानुकारां विव
१८७ र्जितां साधुसमागमेन ५ मंदोरिसंस्थः कुरुते विमंदां नारीं प्रधानां तनयैः समेतां प्रभूतवस्त्राभरणैः समेतां गुणानुरक्तां सुतवल्लभां च ६ सौरेः स्त्रसंस्था विधवां प्रसूते विवर्जितां
वा पतिना सदैव रोगाधिकां पानपरां कुमित्रां प्रभूतदोषां वहुपापभाजां ७ स्थानेष्टमे सूर्यसुतः प्रसूते नारीं चरित्रम्धां निजकर्मदोषां दुष्टस्वभावं गतकर्मसत्त्वां मलिम्लुचां वंचन
तत्परां च ८ धर्माश्रितः सूर्यसुतः प्रसूते कुकर्मरक्तां वनितां सदैव व्ययाधिकां लुब्धसुहृत्समेतां विद्याविहीनां न नतां कदाचित् ९ कर्माश्रितः सूर्यसुतः प्रसूते कुकर्मरक्तां विक
तानुकारां कुशास्त्रसंगव्यसनाभिभूतां निसर्गदुष्टां धनवर्जितां च १० लाभाश्रितो भास्करजः प्रसूते रक्ताधिकां वातकफप्रगल्भां विवेकहीनां कुटिलस्वभावां सदा निरस्तां व्य
सनाकुलां च ११ इति शनिफलम् एतत्फलं स्त्रीषु विशेषतश्च प्रोक्तं स्वभावे फलदं सदैव शेषं नराणां विधिना प्रवाच्यं हित्वा तु योगान्नृपसंभवाश्च १ इति वृद्धयवने स्त्रीजातके
स्वस्थानफलाध्यायः अथ राजयोगः वृद्धयवनः मूर्तौ सुरेज्यो स्वगतः शशांको थवा स्ववर्गे गगने च शुक्रः जातां सजानामपि हि तिरत्र योगे भवेत्स पार्थिववल्लभा च १ केंद्रेषु सौम्या
यदि वृद्धिभाजः पापाः कलत्रे च मनुष्यराशिः राज्ञी भवेत्स्त्री वहुशोकयुक्ता नित्यं प्रशांतारिसुखेन पुष्टा २ एकोपि जीवो रसवर्गशुद्धः केंद्रे यदा चंद्रनिरीक्षितश्च राज्ञी भवेत्स्त्री सधना
श्रीतावरेभदानाङ्नितं वदेशां ३ लाभाश्रितः शीतकरो भृगुश्च कलत्रगः सोमसुतेन युक्तः जीवेन दृष्टः कुरुते नराज्ञीं लोके सुतां वरदिवैरैः सदैव ४ बुधे विलग्ने यदि तुंगसंस्थे स्वा
भाश्रितो देवपुरोहितश्च नेत्रे स्थ पत्नी वनितात्र योगे भवेत्प्रसिद्धा धरणीतले स्मिन् ५ तृतीयगः सोमसुतो बुसंस्थः षड्वर्गशुद्धो यदि देवमंत्री सूतो भृगुः पार्थिवसंमता च करोति ना
रीं वहुवाजिवृंदां ६ कर्कोदये सप्तमगे शशांके चतुष्टयं पापविवर्जितं च राज्ञी भवेद्वरिगजाश्वयुक्ता पतिप्रधाना विजितारिपक्षा ७ षड्वर्गशुद्धैस्त्रिभिरेव राज्ञी चतुर्भिरीशस्य
तथैव पत्नी पंचादिभिर्देवविमानभाजां लोकत्रनाथा च मदांतदा स्यात् ८ वाचंस्पतौ नवमपंचमकंटकस्थे जातांगना भवति पूर्णविभूतियुक्ता साध्वी सुपुत्रजननी सगुणा सु
रूपा नूनं कुलद्वयमहोन्नतकारिणी च ९ तुंगाश्रिते शशी वक्रे रैसुखस्थे जीवेन दृष्टे परिपूर्णदेहे विद्याधरी वात्र भवेत्प्रधाना राज्ञी जितारिर्वहुपुत्रपौत्रा १० स्वक्षेत्रगः सो एप:
मसुतो बुसंस्थः षड्वर्गशुद्धः सुरराजमंत्री शुक्रेण दृष्टः प्रमदा प्रसूते राज्ञीं महाशब्दसमन्विता च ११ वक्रस्तृतीये रिपुसंस्थितो वा षड्वर्गशुद्धो रविजश्च लाभे स्थिरे विलग्ने गुरुः १८७

एणचयुनेराशीभवेत्स्त्रीपतिवल्लभा च १२ आयस्थितस्त्रीक्षणाकरः स्वतुंगेमूर्तौशशंकः परिपूर्णदेहः सौम्योवरस्थःकुरुतेवराङ्गीपतिप्रधानांवहुपुत्रपौ।
त्रां १३ षड्गेषु हे दिवसाधिनाथे तृतीयगे सूर्यसुते रिपुस्थे भवेन्नृजाता प्रमदासुराङ्गी धर्मप्रधाना पतिवल्लभा च १४ स्थिरे विलग्ने रसवर्गशुद्धे सौम्यैनयु
क्तैः ।वीक्षितेवा तुंगाश्रिते चैकतमे च राज्ञी वरे भट्टदानुगताय दास्यात् १५ इति स्त्रीजातकविचारः वसिष्ठगर्गादिमुनिप्रणीतान्वरांहकल्याणकृत्ता
न्विरीक्ष्य सञ्जातका जन्मफलक्रमार्थंसुसंप्रदायाद्रचितं मयेदं १ औदार्यगांभीर्यविराजमानः स्वतेजसारातिहताभिमानः वलान्वितः सद्गुणसंता
निधानः पृथ्वीपतिः शाहसुजाभिधानः २ तदंतिकस्थेन कृतं मयैतत्तव चंद्र १७ १० समेंदुमितेब्दकाले मधौ चतुर्थ्यां सितपक्षजायां विमत्सराणां कु
तिन्मुखाय ३ इति श्रीमद्दैवज्ञवर्यपंडितदामोदरात्मजवलभद्रविरचिते होरारत्ने स्त्रीजातकाध्यायः दशमः १० श्रीगुरुचरणकमलेभ्यो नमः

॥ श्री काशी विश्वनाथपुरी में ढुंढिराजगणेशके पा शदाऊ अग्निहोत्रीके यहां सिद्धविनायक यंत्रमें
भि ज्योतिष होरा रत्न बहुत शुद्ध करके छापागया ॥ ॥ जिसको लेना होय ढुंढिराजगणेशके पास दाऊ
जी अग्निहोत्रीके दुकानपर मिलेगा लिखनेवा ला विशेशरदयाल छापनेवाला लल्लू सं: १९२५ ॥